Digitization by Arya Samaj Charitable Foundation, Chennai

BHARTRIHARI NITISATAKAM

With Explanation, English Translation, Sanskrit Commentary, Grammatical Notes and a Short Note on the Author's Life, Work and Time, etc. and Important University Questions with suggested answers

BY

Sahityacharya Professor P. P. SHARMA, M. A. (Gold Medalist), M. A., B. L, Vidyaratna, etc.
Senior Professor of Sanskrit, St. Columbia's College Hazaribagh

5643

1
23b

ALLAHABAD
RAM NARAIN LAL
PUBLISHER AND BOOKSELLER

1st Edition] 1943 [*Price Re. 1/8/-*

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

BHARTRIHARI NITISATAKAM

With Explanation, English Translation, Sanskrit Commentary, Grammatical Notes and a Short Note on the Author's Life, Work and Time, etc. and Important University Questions with suggested answers

BY

Sahityacharya Professor P. P. SHARMA, M. A.
(Gold Medalist), M. A., B. L., Vidyaratna, etc.
Senior Professor of Sanskrit, St. Columbia's
College Hazaribagh

Philosophy
Ethics

ALLAHABAD
RAM NARAIN LAL
PUBLISHER AND BOOKSELLER
1st Edition] **1943** [*Price Re. 1/8/-*

Digitization by Arya Samaj Charitable Foundation, Chennai

mpn: 4976

स्मारक पुस्तकालय ★ डाक्टर

5643

171
Sh23b

Digitization by Arya Samaj Charitable Foundation, Chennai

भर्तृहरिनीतिशतकम्

INTRODUCTION.

Bhartrihari :—Our first great monument after Kalidasa of the lyric and gnomic kinds of verses in which Indian poets admittedly excel is to be found in the Shatakas of Bhartrihari. These Shatakas have been handed down to us as three collections, theoretically each of a hundred verses in varied metres of the picture of love (श्रृङ्गारशतक), of renunciation of worldly matters (वैराग्यशतक), and of wise conduct (नीतिशतक). Such form of poem is surely liable to receive interpolation and addition in course of time and these Shatakas also have swelled now to contain nearly about 400 verses. Therefore the task of arriving at a definite original text is probably not possible for us. We can trace out the original verses only by means of comparing the various manuscripts and finding out the common verses occurring in all or most of them. Such verses alone can be said to form the genuine original text of the Shatakas. There are later interpolations. The most perplexing fact is that these Shatakas contain stanzas from well-known works. Such as the तन्त्राख्यायिका, the Shakuntala of Kalidasa ; the Mudrarakshasa of Vishakhadutta and stanzas which in the

Digitization by Arya Samaj Charitable Foundation, Chennai

anthologies are ascribed to authors other than Bhartrihari. This fact has led some scholars to believe, though not rightly, that these Shatakas are " mere anthologies" *i. e.*, collections of poems of various poets but our Indian tradition unquestionably sets down that these Shatakas are the work of one man and does not consider them as anthologies at all. Of this man unfortunately we know very little. Our tradition makes him a prince of royal descent who met with sore disappointment in life and his faith in the virtue of woman was perhaps shaken by his bitter experiences in his own life or of those he had around him. He was perhaps a courtier as he says that the life of a courtier in serving the great is very very difficult. He seems to have renounced the world after enjoying all sorts of worldly pleasures. He was originally a Shaiva by religion but later on became a Budhist, which religion also he seems to have changed in his old age.

Itsing, the Chinese traveller, who visited India first in the end of the 7th C. A. D. writes that about forty years before he wrote *i. e.* in about 651 A. D. there died in India a grammarian, Bhartṛihari, the author of Vakyapadiya ; the last independent contribution to Sanskrit grammar. Itsing says that Bhartṛihari ever wavered between the monastic and the family-life moving some times between the monas-

Digitization by Arya Samaj Charitable Foundation, Chennai

tery and home. On one occasion, when entering the monastery, he bade a student have a chariot ready for him outside so that he might depart in it if his worldly longings overcame his hard-won resolution. Itsing also cites a verse in which Bhartṛihari reproaches himself for his inability to decide finally between the attractions of the two lives. Itsing does not clearly mention his Shatakas. He refers in vague terms to Bhartṛihari's writing on the principles of human life. It is clear that Bhartṛihari in Shatakas is not a Budhist but a shaiva of Vedanta type ; to whom Shiva appears as the most perfect presentation of the final reality, the Brahman. " We may, of course, suppose that Bhartṛihari was such a courtier—as his reflections on the miseries of serving the great attest and a Shaiva, and that in old age, he became a Budhist and that Itsing either did not learn of his Shatakas or deliberately ignored them ! Or he might have composed the Shatakas in his old age after changing his religion again from Budhism to Saivaism. Such a fact of his renouncing in his old age Budhism Itsing would not record with pleasure even if he knew of it. So our Bhartṛihari is the same man who wrote Vakyapadiya before 651 A. D. He should not be confused with Bhartṛihari Bhatta, the Maha Brahman grammarian poet of Balavi Court in Gujarata who wrote Bhatti Kavya under king Shridharsena in the 2nd half of the 7th century.

Digitization by Arya Samaj Charitable Foundation, Chennai

Two Bhartriharis :—(I) Bhartṛihari, the author of Shatakas was a Kshatriya prince ; Bhartṛihari the author of Bhattikavya, was a Maha Brahman. (II) In Shatakas we are confronted here and there with very ugly form of a word and a clumsy construction while Bhattikavya is a perfect piece of composition even from a grammatical point of view, *i. e.* The author of Shatakas does not seem to be such a perfect grammarian as the writer of Bhattikavya. (III) In religion, too, they differ. The writer of Shatakas is a pacca 'Shaiva' though a professed unitarian as regards Shiva and Viṣṇu, but the writer of Bhatti is a devotee of Visnu. (IV) In ancient works distinction is made between the quotations from the works of these two poets. So they must not be one and the same man.

Merits of Shatakas :—" Bhartṛiharis poetry exhibits Sanskrit to the best advantage. In Shatakas each stanza normally can stand by itself and serves to express one idea, be it a sentiment of love, of resignation, or of policy, in complete and daintily finished form. The extraordinary power of compression which Sanskrit possesses is seen here at its best ; the effect on the mind is that of perfect whole in which the parts coalesce by inner necessity." It follows inevitably that the series of stanzas of this kind is not a very heavy burden for the minds of the readers to remember ; the readers can easily remember

Digitization by Arya Samaj Charitable Foundation, Chennai

these verses to cite on fit occasions, when considered however each in itself, as they should be; these stanzas, like those of the Greek anthology, present us with an utmost infinite number of brilliant poems in miniature of which it would often be hard to improve. It should be remembered that the use of longer metres like शार्दूलविक्रीडित and स्रग्धरा etc. gives the Sanskrit poet the opportunity of compressing into a single stanza materials sufficient to fill a compact English sonnet. So the Sanskrit poets are not in bad need of restricting within very narrow limits either their thoughts or expressions. Bhartṛihari very wisely used longer metres शार्दूलविक्रीडित, शिखरिणी, वसन्ततिलका and स्रग्धरा in his Shatakas to express his thoughts fully though in compressed form.

Teachings of Shatakas :—Like a true Vedantist Bhartrihari speaks of being absorbed in Brahman, as the highest bliss and this blissful position, he says can be attained by the eradication of Karma and by the annihilation of infatuations through the help of real knowledge. Here and there he refers to Yoga, to the ten incarnations, to the Ganges, and to the sacred regions of the Himalayas also. In the Nitishataka, Bhartṛihari teaches certain principles meant for guiding men in the daily conduct of their life. The first and the foremost of these teachings is self-respect. He describes the value of independence and

Digitization by Arya Samaj Charitable Foundation, Chennai

asks his readers in impressive verses not to lose self-respect even in the midst of overwhelming difficulties. Another virtue to which the poet draws attention of his readers is perseverance. Men of firm mind, says he, carry to successful completion whatever they undertake. The third virtue, which we should admire and imitate is benevolence or service of our fellow-men. This lofty virtue he teaches in beautiful and instructive verses. Again Bhartṛihari inspires in us admiration for the sublime virtue of moral courage. According to our poet character occupies the highest place among the human virtues.

Fatalism in Shatakas :—Some people are lead to think that Shatakas teach, or at least countenance fatalism. In this land of India where the doctrine of transmigration of soul prevails from the earliest possible time it is but natural that the conception of fate should exert its influence on moral poetry. There is no doubt that Bhartṛihari's mind, like all Indian minds, leaned towards fatalism. But his fatalism, like that of most writers, is not a fatalism of inaction, one that will paralyse all efforts on the part of man. Side by side with fatalistic verses there are verses which impress the necessity of industry and perseverance. Bhartṛihari exhorts his readers to put forth strenuous exertions and perseverance in their works till they are accomplished.

Digitization by Arya Samaj Charitable Foundation, Chennai

Literary Value of Shatakas :—Prof. Lassen says, "It is the verse and the epigramatic character of Bhartṛihari's short poems which makes them conspicuous among the productions of Indian muse; and the perfect art with which they are composed makes them worthy of being ranked among the master-pieces of Indian genius. The style is on the whole simple but sometimes the necessity is obscure owing to an attempt of the poet at brevity at the sacrifice of clearness of meaning. Some of the shorter verses are written in perfectly graceful and forcible style which has endeared them to the general readers so much so they are always dancing on their lips of the tongue. The longer verses are on the whole free from long and perplexing compounds. In some cases, the last lines of the longer verses contain compounds. True it is that there is no malady in the verses but their artless and simple diction corresponds with the subject, the moral and the religious instruction the Shatakas inculcate. The verses are further embellished with good figures of speech. To impress a principle on the mind of the readers, Bhartṛihari puts forth a wealth of illustrations drawn from nature and from his own experiences of the world. He seems to be a minute observer of the world—a fact which has enabled him to discharge successfully his duty as a didactic poet.

His success—This field is well attested by the

Digitization by Arya Samaj Charitable Foundation, Chennai

high popularity he enjoys among the readers of Sanskrit literature.

The Themes of Nitishataka :—

1. Salutation of Brahman.
2. अज्ञनिन्दा or Censure of ignorance.
3. विद्वत्पद्धति or Praise of learning.
4. मानशौर्यपद्धति or Praise of Self-respect and fortitude.
5. अर्थपद्धति or Praise of wealth.
6. दुर्जनपद्धति or Description of the wicked.
7. सुजनपद्धति or Praise of the good.
8. परोपकारपद्धति or Praise of the benevolent.
9. धैर्यपद्धति or Description of Courage.
10. दैवप्रशंसा or Praise of Fate.
11. कर्मपद्धति or Workings of the power of Karman.

Stanzas quoted from other sources :—

(1) प्रारभ्यते न खलु etc. (मुद्राराक्षसम्);
(2) कुसुमस्तवकस्येव etc. (Similar idea in उ० च०);
(3) यदचेतनोऽपि etc. (Similar idea in उ० च०) किरात
(4) तानीन्द्रियाणि etc. (पञ्चतंत्रम्, तंत्राख्यायिका)
(5) दानभोगो etc. (पञ्चतंत्रम्, तंत्राख्यायिका)
(6) भवन्तिनम्राः etc. (शकुन्तलानाटकम्)
(7) शशिदिवाकरयो etc. (तन्त्राख्यायिका *i. e.* पंचतंत्रम्)

N. B.—There are some more verses ascribed to other authors by the anthologists.

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीगणेशाय नमः

नीतिशतकम्

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥ १ ॥

अन्वयः—दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये, स्वानुभूत्येकमानाय शान्ताय तेजसे नमः ।

WORDS—अवच्छिन्न = lit., cut off, bounded, determined. अनवच्छिन्न = undetermined, undefined, unconditioned; अनन्त = infinite, limitless ; चिन्मात्र = pure knowledge, चित् = knowledge ; intelligence ; मूर्त्ति = form ; अनुभूति = self-perception ; manifestation of Brahma in contemplation ; मान = measure, means of knowledge, source of knowledge (in logic), शान्त = peaceful, तेजस् = light.

English Translation—Adoration to that peaceful Energy (Light) whose form is pure intelligence, infinite and unconditioned by space, time etc., and the principal means of knowing which is self-perception.

हिन्दी अनुवाद—जो दिशाकालादि द्वारा अपरिमेय, जो अनन्त तथा चैतन्य-स्वरूप और जिसके अस्तित्व का एकमात्र प्रमाण मनुष्य

Digitization by Arya Samaj Charitable Foundation, Chennai

का अपना निजी अनुभवमात्र ही है, उस शान्तिमूर्ति ज्योतिःस्वरूप परमब्रह्म को मेरा प्रणाम ॥ १ ॥

भूमिकाभाग :—" अत्र मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते, वीरपुरुषाणि आयुष्मत्पुरुषकाणिच भवन्ति, अध्येतारश्च प्रवक्तारो भवन्ति, इति भगवद्भाष्यकारवचनप्रामाण्यात् 'आशीर्नमस्क्रिया-वस्तुनिर्देशो वापि तन्मुखम्' इत्यादिदण्डिवचनात् च आदौ नमस्कार-रूपम्, अन्ते परब्रह्म स्मरणलक्षणम्, मध्ये तदुभयात्मकं च मङ्गलम् श्रीभर्तृहरियोगीन्द्रः सुभाषितत्रिशती काव्यस्य निर्विघ्नसमाप्तये आचरति ।

व्याख्या—दिशः दिशाः प्राच्यादिदिशाः च, कालाः भूतभविष्यद्वर्त-मानरूपाः कालाः च इति दिक्कालाः, ते आदयः येषाम् ते दिक्कालादयः । आदिशब्देन गुणादयः ग्राह्याः । दिक्कालादिभिः अनवच्छिन्नम् अपरिमितम् इति दिक्कालाद्यनवच्छिन्नम् । न विध्यते अन्तः यस्य तत् अनन्तम् । चित् एव इति चिन्मात्रम्, चिन्मात्रम् मूर्त्तिः यस्य तत् चिन्मात्रमूर्त्ति, केवलं ज्ञानस्वरूपम् । दिक्कालाद्यनवच्छिन्नम् च अनन्तम् च चिन्मात्रमूर्त्ति च (त्रिपदविशेषणकर्मधारयः) तस्मै । यथा श्रुतिकदम्बकम्—'सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं यत्सानन्दं ब्रह्म केवलम्' इत्यादिकम् । स्वस्य अनुभूतिः अनुभवः ब्रह्मणः साक्षात्कारः एवं एकम् मुख्यम् मानम् प्रमाणम् यस्य तस्मै । शान्ताय शान्तिस्वरूपाय । निष्कलं निष्क्रियं शान्तम् निरवद्यं निरञ्जनम् इति श्रुतेः । तेजसे परस्मै ज्योतिषे ज्योतीरूपाय ब्रह्मणे नमः । एष प्रसादः......परं ज्योतिरुपसम्पद्य इति छान्दोगोपनिषत् । तद्देवा ज्योतिषा ज्योतिः (उपासते) इति श्रुतेः । स्वभावोक्तिः अलङ्कारः । श्लोकभेदः वृत्तम् ।

NOTES :—(A) दिक्कालाद्य etc.—दिशश्च कालाश्च इति दिक्कालाः (द्वन्द्वः), दिक्कालाः आदयः येषाम् ते दिक्कालादयः (ब० व्री०) ; आदयः means रजोगुण, तमोगुण, सत्त्वगुण and others. दिक्काला-दिभिः अनवच्छिन्नम् इति दिक्कालाद्यनवच्छिन्नम् (३या तत्) ; न विद्यते अन्तः यस्य तत् अनन्तम् (ब० व्री) । चित् एव इति चिन्मात्रम् (मयूर-

Digitization by Arya Samaj Charitable Foundation, Chennai

व्यसंकादित्वात् नित्यसमासः), चिन्मात्रं मूर्त्तिः यस्य तत् चिन्मात्र-मूर्त्ति (ब० व्री०)। All ब० व्री० Compounds are adjectival. Now, let us join all the three compounds into one. दिक्कालाद्यनवच्छिन्नम् च तत् अनन्तम् च इति दिक्कालाद्यनवच्छिन्नानन्तम् (विशेषणोभयपदकर्मधारय like खञ्जकुब्जः) Then दिक्कालाद्यनवच्छिन्नानन्तम् च तत् चिन्मात्रमूर्त्ति च इति दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्ति, (पूर्ववत्स) तस्मै, Qualifies तेजसे (ब्रह्मणे)। The Energy, which is unconditioned by time, space etc., is infinite and whose form is pure intelligence. This is the best way of taking the compound.

(B) दिक्कालाद्यनवच्छिन्ना अनन्ता चिन्मात्रा च इति (द्वन्द्वः) दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रा मूर्त्तिः यस्य तत् (ब० व्री०) तस्मै। or दिक्कालाद्यनवच्छिन्ना च अनन्ता च चिन्मात्रा च मूर्त्तिः यस्य तत् (ब० व्री०), तस्मै।

N. B.—Mark well the Vedantic nature of the Verse. दिक्काल=time and space; अवच्छिन्न=what is cut off *i. e.*, is measured; अनवच्छिन्न=what is not measured, hence undefined, undetermined, unconditioned. आदि=refers to रजस्, तमस् and सत्त्वम् or to धर्म, अधर्म etc. as well as to कार्य (effects) etc.

Brahman, the Highest Light is undefined with respect to time, or space. It transcends time, space, or gunas. It is infinite and limitless. It is चिन्मात्रमूर्त्ति *i. e.*, its form is pure intelligence. We should remember in this connection. "सच्चिदानन्द" ephithet given to God.

Digitization by Arya Samaj Charitable Foundation, Chennai

तैतिरीयोपनिषद् 'sums up the attributes of Brahman. "सत्यं ज्ञानमनन्तं ब्रह्म" see व्याख्या। मूर्त्ति=मूर्च्छ+क्तिन् that which settles into a solid form. मूर्त्ति=literally means what is visible to senses, hence, what is perceptible to mind, Kale's notes.

दिक्काला......मूर्त्ति being Adjective to तेजस् is declined like शुचि neuter; so like शुचये or शुचिने in ४ थी Sing. we have दिक्का......मूर्त्तये or र्त्तिने optionally in ४थी Singular.

(2) स्वानुभूति etc.—स्वानुभूति=self-perception, manifestation of Brahman in contemplation. ब्रह्मसाक्षात्कारः। एक=मुख्य, chief, principal. एके मुख्यान्यकेवलाः इत्यमरः। मान=measure, means of arriving at knowledge. We generally get the word प्रमाण used in this sense in logic. Brahman is specially regarded by the Vedanties as प्रत्यक्षप्रमाणगम्य, 'capable of being realised by perception' although there are other means such as आगम etc. of knowing it. प्रमाण *i. e.*, source of knowledge, according to Charbaka is only one. (*a*) प्रत्यक्षं प्रमाणम् इति चार्वाकः, (*b*) प्रत्यक्षानुमाने प्रमाणे इति भिक्षुकाः (बौद्धाः) (*c*) प्रत्यक्षानुमानागमाः प्रमाणानि इति वेदान्तिनः (*d*) प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति गौतमः (नैयायिकाः)।

स्वस्य अनुभूतिः स्वानुभूतिः, स्वानुभूतिः एकमानम् मुख्यप्रमाणम् यस्य तत् (ब० व्री०), तस्मै। एकं मानम् इति एकमानं (कर्मधा) पूर्वकालैक etc.।

(3) शान्ताय—शान्तम् is one of the attributes of

Digitization by Arya Samaj Charitable Foundation, Chennai

'Brahman' of. निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् इति श्रुतिः ।

(4) तेजसे = To the Energy, to the Light. Refers to Brahman and not to any thing else. Brahman is often called परं ज्योतिः in our Upanisads " Compare " एष संप्रसादः...परंज्योतिरुपसंपद्य" इति छान्दोगोपनिषद्" तद्देवा ज्योतिषां ज्योतिः (उपासते) इति श्रुतिः ।

चतुर्थी has been used in तेजसे and all words qualifying it by "नमः स्वस्तिस्वाहास्वधालंवषट्योगाच्च" ।

Compare देशकालान्यवस्तूनां कल्पितत्वाच्च मायया,
न देशादिकृतोन्तोस्ति ब्रह्मानन्त्यं स्फुटं तथा" इति पञ्चदशी ।

Read carefully the description of divine nature :—
" It is neither in place, nor in time, but before these and above these in an unspeakable manner, contemplated itself by itself through faith alone, neither measured by ages nor moving alone with times." Geography Nyssen's description of the divine nature, quoted by Mr. Marsel in his philosophy of the unconditioned (p. 16)."

यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परिशुष्यति काचिदन्या
धिक्तां च तं च मदनं च इमां च मां च ॥ २ ॥

अन्वयः—(अहम्) याम् सततम् चिन्तयामि, सा मयि विरक्ता, सा अपि अन्यम् जनम् इच्छति, स जनः अन्यसक्तः । काचित् अन्या अस्मत्कृते च परिशुष्यति, धिक् ताम् च, तम् च, मदनम् च, इमाम् च, माम् च ।

Digitization by Arya Samaj Charitable Foundation, Chennai

व्याख्या—याम् रमणीम् स्वप्राणवल्लभाम्, सततम् सदा, चिन्तयामि मम प्राणप्रियेति विभावयामि, सा यथार्थतः मयि विरक्ता विरसा, अनुरागरहिता। सा अपि अन्यं जनं जारम् उपपतिम्, इच्छति कामयते, स जनः अन्यसक्तः अन्यास्यां नार्याम् सक्तः अनुरक्तः। काचित् अन्या प्रणयिनी अस्मत्कृते, अस्माकं कृते, परिशुष्यति उत्ताम्यति, अतः ताम् मत्प्रियां धिक्, तं च तस्याः अभीष्टं जनं च धिक्, सर्वमिदं मदनकृतमिति तं मदनमपि धिक्, इमां वेश्यामपि च धिक्, यतः एवं स्त्रीरूपेण वञ्चितोऽहम् अतः मां च धिक्। आलंकारिकाणां मते 'च इमां' इत्यत्र विसन्धिदोषः अत्रेयं किंवदन्ती श्रूयते—केनापि योगिराजेन जरामृत्युनाशकं फलं राज्ञे भर्तृहरये दत्तम्। राजा तदात्मप्रियायै दत्तवान्। सापि आत्मनः उपपतये दत्तवती। तेनापि स्वकीयायै कस्यैचित् प्रणयिन्यै दत्तम्, तयापि राज्ञे फलं दत्तम्, यतः तस्याः मते राज़ा एव सर्वरक्षकः सन् जरामरणराहित्यमर्हति। तद्दृष्ट्वा अस्यानुसन्धानं कुर्वाणः भर्तृहरिः परमं वैराग्यमापन्नो वनं गन्तुमिच्छन् इदं शतकत्रयं रचयामास इति। परन्तु नेयं श्रद्धेया कथा। कथं नीतिशास्त्रवित्कविः स्वयमेव स्वगृहच्छिद्रं प्रकटीकुर्यात्। वसन्ततिलकं वृत्तम्। ज्ञेयं वसन्ततिलकं तभजा जगौगः।

WORDS—सततम् = always सदा। विरक्त = indifferent unattached, उदास; सक्त = attached to, devoted to, अनुरक्त। कृते = for the sake of, लिये। परिशुष्यति = pines for, longs for. तड़पना।

English Translation—She, of whom I constantly think, is indifferent to me. She longs for another man, and he, too, is devoted to another woman. Some other woman pines for us. Fie, fie upon that woman, fie upon him, fie upon Cupid, fie upon this woman, and fie upon me.

हिन्दी अनुवाद—जिस स्त्री की चिन्ता मैं सदा किया करता हूँ वह

Digitization by Arya Samaj Charitable Foundation, Chennai

मुझसे विरक्त रहती है, वह किसी दूसरे पुरुष को चाहती है, वह पुरुष भी दूसरी स्त्री में प्रेमासक्त है, कोई दूसरी हमारे लिये झुरा रही है ; उस स्त्री को धिक्कार, उस मर्द को धिक्कार, कामदेव को धिक्कार, और धिक्कार है इस स्त्री को और मुझको ॥ २ ॥

NOTES :—1. सततम्—अव्यय ; संततम् is the optional form ; सम्+तन्+क्त (भाव)=संतत or सतत ; क्रियाविशेषणे २या ; संततम् or सततम् ; म् of सम् is optionally dropped by "समो वा हिततयोः" ।

2. मयि—विषयाधिकरणे ७मी ; the object of love, respect, disrespect etc. take सप्तमी (वैषयिक अधिकरण) मद्विषयका विरक्तिः ।

3. अन्यसक्तः—अन्यस्यां सक्तः इति (७मी तत्) ; "सर्वनाम्नो-वृत्तिमात्रे पुंवद्भावः"—अतः अन्या becomes अन्य in वृत्तिमात्र । समास is a वृत्ति, सञ्ज+क्तः (कर्त्तरि)=षञ्ज संगे भ्वा, पर, सजति, ससंज, असांक्षीत् ।

4. अस्मत्कृते—For the sake of us, अस्माकं कृते also is correct if not compounded, अमीषां प्राणानां कृते वैश ३६ ; It is often compounded, when not compounded, it governs Genitive.

5. परिशुष्यति—Pines away ; परि+शुष्=to dry up. परितुष्यति also is the reading, अस्मत्कृते च परितुष्यति=is delighted in what I do. But परिशुष्यति is preferable.

6. "तां च तं च मदनं च इमां च मां च"—धिक्-शब्द योगे २या Fie upon Cupid, for he has done all this, fie upon me as I have been allured by the beauty of a woman. Mark the use of 'च' after each and every word

Digitization by Arya Samaj Charitable Foundation, Chennai

joined. मदयति हर्षयति इति मदनः मद्+णिच्+ल्युट्। "नन्दिग्रहिपचादिभ्यः ल्युणिन्यचः"—मद्, falls in नन्दि group.

7. Question:—Why no सन्धि in च इमां according to आद्गुणः ? Ans. संहितैकपदे नित्या नित्या धातूपसर्गयोः। नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते"।

This Kārikā on this point lays down ; "संहिता (संधि) is compulsory. (*a*) between the component letters of one and the same word. (as पवन, and not पो अन), (*b*) between the उपसर्ग and a root (as प्रत्यगच्छत् and not प्रति अगच्छत्) ; (*c*) and between the component members of a compound (as देवालय and not देव आलय), while in case of a sentence ; संधि depends on the option of the writer ; So we can write राज्ञा उक्तम् or राज्ञोक्तम् acc. to our option. But वामन says. नित्यं संहितैकपदवत् पादेषु अर्द्धान्तवर्जम् V. 1. 2. संधि is compulsory among the members of the पादs (poetical feet), as in case of one and the same word ; but no संधि between the last letter of the 2nd. पाद and the first letter of the third पाद। But this law of वामन is not universally obeyed. *cf.* यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते (हितोपदेशः I) बुद्धिर्यस्य बलं तस्य अबोधस्य कुतोबलम् (पञ्चतंत्र I) Rhetoricians like Mammatta consider it a "blemish of style" called विसन्धि दोष See Kav. Pra. VII. for the occasion of this verse read व्याख्या—

N. B.—This verse is so very indecent and it offends our moral sense so much that it does not

Digitization by Arya Samaj Charitable Foundation, Chennai

deserve a place in a *belles lettres*. Wonder of wonders that a writer of gnomic verses himself should proclaim to the world the unchastity of his wife, nay of his own self even. It does not therefore justly find place in some of the old manuscripts.

अथ मूर्खपद्धतिः ।

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥ ३ ॥

अन्वय :—बोद्धारः मत्सरग्रस्ताः, प्रभवः स्मयदूषिताः । अन्ये च अबोधोपहताः, (अतः) सुभाषितम् अङ्गे जीर्णम् ।

WORDS—मत्सरः—envy, jealousy, डाह, स्मय=गर्व, pride, सुभाषितम्=a witty saying, a pithy saying, apothegm. सूक्ति ।

English Translation—The learned are seized with jealousy. Kings are defiled with self-conceit and others are *damned souls* for want of knowledge. So apothegm has withered within my body (for want of expression).

हिन्दी अनुवाद :—पण्डितगण द्वेष से ग्रस्त हैं, और नृप वर्ग गर्व से चूर । दूसरे लोग तो अज्ञान के मारे हुए हैं । अतः बेचारा सुभाषित मेरे शरीर के भीतर ही बुढा गया, (अभी तक भी बाहर नहीं निकला, किससे कहा जाय, तौ भी कुछ कहता हूँ) ॥ ३ ॥

व्याख्या—बोद्धारः परिज्ञातारः, मत्सरेण असूयया परोत्कर्ष। सहनेन, ग्रस्ताः आक्रान्ताः । अतो न अनुमोदन्ते । प्रभवः राजानः ये गुणग्राहिणः

Digitization by Arya Samaj Charitable Foundation, Chennai

भवेयुः ते अपि, स्मयदूषिताः गर्वदुर्विनीताः न तु विनयशीलाः अतः न शृण्वन्ति । अन्ये अपरे जनाः, अबोधेन अज्ञानेन उपहताः नष्टाः, अबोधविक्लवाः ते अवगन्तुं न शक्नुवन्ति । तस्मात् सुभाषितं साधुभाषणम्, अङ्गे अन्तरङ्गे मदीये अङ्गे जीर्णम् अजीर्यत् अन्तर्हितम् ; न तु अद्यापि बहिःप्रवृत्तम् । तथापि वक्ष्यामि इतिशेषः । श्लोकवृत्तम् ।

Notes :—1. बोद्धारः—बुध् + तृच् = बोद्धृ like कर्तृ ; Knower, *i. e.*, learned man.

2. मत्सरग्रस्ताः—मत्सरेण ग्रस्ताः (३या तत्) seized with jealousy. Those who can know and appreciate are all jealous of one another. So they can't appreciate ; ग्रस् + क्त (कर्मणि) ।

3. स्मयदूषिताः—स्मयेन दूषिताः इति (३या तत्) ; polluted with pride, puffed up with pride. Patrons, like kings and princes, are all puffed up with pride and so they donot listen to witty sayings. स्मि + अच् (एरच्) = स्मयः (गर्वः) *cf.* भाग्यैश्चलैर्विस्मिताः proud of his fickle fortunes. (स्वप्नवासवदत्तम्) । दूष् दिवा पर + णिच् = दूषयति or ते ; दुष् + णिच् + क्त (कर्मणि) ; defiled or tainted.

4. अबोधोपहताः—न बोधः अबोधः, अबोधेन उपहताः इति (३या तत्) ; बुध + घञ् = बोधः ; उप + हन् + क्त (कर्मणि) ; Others are suffering from want of knowledge. They are ignorant, so they can't understand my pithy sayings. Then before whom should I recite them ?

5. सुभाषितम्—सु + भाष् + क्त (भावे) ; कर्तृपदम् of जीर्णम् ।

6. अङ्गे—मदीये अङ्गे अन्तः करणे ;

7. जीर्णम्—has grown old, has withered away, for

Digitization by Arya Samaj Charitable Foundation, Chennai

want of proper expression. *i. e.*, finding none to appreciate, none to patronise, none to understand. I have not as yet recited my witty sayings to any and so they have remained hidden as yet in my heart and have not flown out. Still I am going to say out those apothegms.

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ ४ ॥

अन्वय :—अज्ञः सुखम् आराध्यः, विशेषज्ञः सुखतरम् आराध्यते, ब्रह्मा अपि ज्ञानलवदुर्विदग्धम् नरम् न रञ्जयति ।

WORDS—अज्ञ = ignorant मूर्ख, आराध्य = can be pleased (प्रसन्न किया जा सकता है) विशेषज्ञ = a specialist, a learned man, दुर्विदग्ध = un-skilled, badly learned, puffed up विदग्ध = skilled, learned, विद्वान्, पण्डित ।

English Translation—An ignorant man can be pleased easily. More easily is propitiated a learned man. Even god Brahma does not gratify a man foolishly puffed up with a grain of knowledge.

हिन्दी अनुवाद—अज्ञानी मनुष्य आसानी से प्रसन्न किया जा सकता है, विशेषज्ञ (पण्डित भी) तो और भी आसानी से प्रसन्न किया जा सकता है । लेकिन रञ्च ज्ञान के कारण गर्वित मूढजन को ब्रह्माबावा भी प्रसन्न नहीं कर सकते ॥ ४ ॥

व्याख्या—अज्ञः मूर्खः मूढः अज्ञानी, सुखम् अनायासेन लीलया, आराध्यः समाधातुं शक्यः संतर्पणीयः । विशेषं जानाति इति विशेषज्ञः तत्त्ववेत्ता तत्त्वज्ञानी, पण्डितः, सुखतरम् अत्यन्तम् अनायासेन, आराध्यते समाधीयते, प्रीयते । किन्तु ज्ञानस्य लवेन अल्पमात्रया दुर्विदग्धम् पण्डित-

Digitization by Arya Samaj Charitable Foundation, Chennai

मानिनं नरम् मूर्खजनं, ब्रह्मा विधाता सर्वशक्तिमान् चतुर्मुखः अपि, न रञ्जयति न प्रीणयति, रञ्जयितुं न शक्नोति । का कथा तर्हि इतरेषां नराणाम् । रञ्जनसंबन्धेऽपि असंबन्धाभिधानात् अतिशयोक्तिः अलङ्कारः । वृत्तम् आर्याभेदः ।

NOTES :—1. अज्ञः—जानाति इति ज्ञः, ज्ञा + कः (इगुपधज्ञाप्रीकिरः कः) न ज्ञः इति अज्ञः (नञ् तत्) ।

2. सुखम्—सुखतरम् क्रियाविशेषणे २या used as an adverb. सुख + तरप् (द्विवचन विभज्योपपदे तरबीयसुनौ) ।

3. आराध्यः—आ + राध् + ण्यत् । राध्यति रराध, अरात्सीत् ।

4. विशेषज्ञः—विशेषं जानाति इति विशेष + ज्ञा + कः (आतोऽनुपसर्गेकः) ।

5. ज्ञानलवदुर्विदग्धम्—ज्ञानस्य लवः अणुमात्रम्, (षष्ठीतत्), तेन दुर्विदग्धम् (३या तत्) तम् । Qual. नरम् । विदग्ध = polished, cultured, refined, hence learned, दुर्विदग्धः—दुष्टं यथा तथा विदग्धः badly learned ; ill-read, not wel-read. वि + दह् + क्त (कर्मणि) well-burnt.

6. नरम्—कर्मणि २या ; कर्म of रञ्जयति । ब्रह्मा is nomi. of रञ्जयति ।

7. रञ्जयति—रञ्ज भ्वा उभ + णिच् + लट् III. S. रञ्जयति पक्षिणः अन्न-कणदानेन । (Pleases birds by giving grains) रजयति मृगान् (Hunts deer.) "रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः" मृगरमणम् आखेटकम् । रञ्जयति means here to gratify, to propitiate and so न is not dropped. It is dropped in the sense of hunting.

8. The reading ब्रह्मापि तं नरं is against आर्याच्छन्दः Hence rejected.

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरा-
त्समुद्रमपि संतरेत्प्रचलदूर्मिमालाकुलम् ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ५ ॥

अन्वयः—मकरवक्त्रदंष्ट्रान्तरात् प्रसह्य मणिम् उद्धरेत् । प्रचलदूर्मिमालाकुलम् समुद्रम् अपि संतरेत् । कोपितम् भुजङ्गमपि शिरसि पुष्पवत् धारयेत् । तु प्रतिनिविष्टमूर्खजनचित्तम् न आराधयेत् ।

Words—प्रसह्य = forcibly, perforce जोर से । वक्त्र = mouth मुख । दंष्ट्र = large tooth, fang, ऊर्मि = wave तरंग, प्रतिनिविष्ट = दुराग्रहाविष्ट obstinate, perverse ; stubborn. जिद्दी, हठी ।

English Translation—One can, by force, take out a gem from among the fangs of a shark. One can swim across even the sea, full of surging waves. One can place upon his head even an angry serpent, like a flower, but one cannot please the heart of an obstinate fool (or the obstinate mind of a fool).

हिन्दी अनुवाद—कोई चाहे तो मगर के मुँह में हाथ डालकर उसके दाँतों के बीच से मणि को जबर्दस्ती खींचकर निकाल सकता है। लहराती तरंगों से उमड़ते समुद्र को हाथों से तैर कर पार कर सकता है, अपने शिर पर क्रोध से जलते हुए साँप को पुष्पमाला के जैसा धारण कर सकता है परन्तु जिद्दी मूर्ख के मन को कोई प्रसन्न नहीं कर सकता ॥ ५ ॥

व्याख्या—मकरः नक्रः ग्राहविशेषः, तस्य वक्त्रे मुखे, दंष्ट्राणाम् अग्रदशनानाम्, अन्तरात् अन्तरालात् मध्यात् । अतिसंकटात् इत्यर्थः । प्रसह्य बलात्कारेण; मणिम् रत्नम् उद्धरेत् उद्धर्तुं शक्नुयात्, ग्रहीतुं

Digitization by Arya Samaj Charitable Foundation, Chennai

शक्यम् । जनः इति शेषः । तथा प्रचलन्तः दोलायमानाः उच्चैः उत्तिष्ठन्तः, ऊर्मयः तरङ्गाः, तेषां मालाभिः श्रेणीभिः, आकुलम् संकुलम् । उल्लोल-कल्लोलोज्जृम्भितम् । समुद्रम् अपि जलधिमपि तु संतरेत् दुस्तरमपि समुद्रम् तरितुं शक्नुयात् बाहुभ्यां वा केनचित् प्लवनसाधनेन वा । तथा कोपितम् क्रुद्धम् फूत्कारं कुर्वाणम्, भुजङ्गमपि सर्पमपि शिरसि मस्तके, पुष्पवत् कुसुमतुल्यम् ; धारयेत् धारयितुं शक्नुयात् । तु किन्तु प्रतिनिविष्टम् दुराग्रहाविष्टम् दुरभिनिवेशम् ; मूर्खजनस्य दुर्विदग्धस्य मूढनरस्य, चित्तम् मनः, न आराधयेत् न समाधातुं शक्नुयात् । सर्वेषाम् उपायानाम् प्रतिहतत्वात् । अत्र उत्तरस्मिन् पद्ये च शक्यार्थे विधिलिङ् । अपिशब्दः समुच्चये संभावनायां च । अत्र मण्युद्धरणाद्यसंबन्धेऽपि तत्संबन्धाभिधानात् अतिशयोक्तिरलंकारः । पृथ्वीवृत्तम् ।

NOTES :—1. मकरवक्त्रदंष्ट्रान्तरात्—मकरस्य वक्त्रम् (षष्ठी तत्), तस्मिन् दंष्ट्राः (७मी तत्), तासाम् अन्तरम् मध्यम् (षष्ठी तत्) तस्मात् अपादाने पञ्चमी । ध्रुवमपाये अपादानम् or भीत्रार्थानां भयहेतुः, वच्+ष्ट्रन्=वक्त्रम् । दंश्+ष्ट्रन्=दंष्ट्रा अन्तरम्=अन्तरालम्, मध्यभागः । There is another पाठ, दंष्ट्रांकुरात् ; from the tips or points of the jaws.

2. प्रसह्य—A अव्ययम् ; बलात्कारेण, perforce ; with great force.

3. उद्धरेत्—शक्यार्थे विधिलिङ् ; उद्धर्तुं शक्नुयात् । "शकि लिङ् च" मणिम् is its object.

4. प्रचलदूर्मिमालाकुलम्—प्रचलन्तः ऊर्मयः, प्रचलदूर्मयः (कर्मधा) तेषां मालाः (षष्ठी तत्) ; ताभिः आकुलम् (३या तत्) ; Adj. qual. समुद्रम् । प्र+चल्+शतृ=प्रचलत् ।

5. समुद्रम् अपि—कर्म of संतरेत् । अपि is used here to denote two senses "and क possibility." अपिशब्दः समुच्चये

Digitization by Arya Samaj Charitable Foundation, Chennai

संभावनायां च तदनुवादः इति विवेकः। उभयथापि अनुशासनसंभवात्। "गर्हासमुच्चयप्रश्नशंका संभावनासु अपि" इत्यमरः। One may *possibly* swin across *even* a sea.

6. संतरेत्—सम्+तॄ+विधिलिङ् III. S., "शकि लिङ् च" शक्यार्थे लिङ। 'लंघयेत्'—is also seem then हनुमान् इव केनचित् शक्तिविशेषेण लंघितुं शक्नुयात् इति भावः।

7. कोपितम्—Adj. Qual. भुजङ्गम्; कोपः संजातः अस्य इति कोपितः, कोप+जातार्थे इतच्; "तदस्य तारकादिभ्यः इतच्" कुप्+क्त (कर्मणि) gives us कुपितः, and not कोपितः, कुप्+घञ्=कोपः।

8. भुजङ्गम् अपि—दुर्धरमपि सर्पम् इति भावः कर्मणि२या; कर्म of धारयेत्, भुजं यथा तथा गच्छति goes crookedly, भुज+गम्+खच्=भुजंगमः or भुजंगः "गमेः सुपि वाच्यः"—अनेन खच्। "खच्च डिद्वा वाच्यः" अनेन मकारस्य विकल्पेन लोपः। "अरूर्द्विषजन्तस्य मुम्" by this म् comes after भुज। भुज=curved, crooked.

9. पुष्पवत्—पुष्पेण तुल्यम्; like a flower; पुष्प+वतिः "तेन तुल्यं क्रिया चेत् वतिः"—व तः or वत् is added to a noun in the sense of 'equally with that' when this refers to an action. (क्रिया); The word thus formed is used like an adverb. (अव्यय)।

10. प्रतिनिविष्टमूर्खजनचित्तम्—मूर्खः एव जनः इति मूर्खजनः (मयूरव्यसंकादित्वात् समासः रूपकरूपः) प्रतिनिविष्टः दुराग्रहः मूर्खजनः इति प्रतिनिविष्टमूर्खजनः (कर्म धा); तस्य चित्तम् (षष्ठी तत्); कर्मणि२या; कर्म of आराधयेत्—प्रति+नि+विश्+क्त (कर्मणि); मुह+खः=मूर्खः; मुहेः खो मूर्च"। नि+विश्=निविशते; आत्मनेपदी by, नेर्विशेः।

Digitization by Arya Samaj Charitable Foundation, Chennai

11. आराधयेत्—आ + राध् + णिच् + लिङ् III. S. ; "शक्ति लिङ्" च ।

लभेत सिकतासु तैलमपि यत्नतः पीडय-
न्पिबेच्च मृगतृष्णिकासु सलिलंपिपासार्दितः ।
कदाचिदपि पर्यटञ्शशविषाणमासादये-
न्नतु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ६ ॥

अन्वयः—यत्नतः पीडयन् सिकतासु अपि तैलम् लभेत ; पिपासर्दितः मृगतृष्णिकासु सलिलम् पिबेत् च । पर्यटन् कदाचित् शशविषाणम् अपि आसादयेत् । तु प्रतिनिविष्टमूर्खजनचित्तम् न आराधयेत् ।

Words—यत्न = effort, यत्नतः = assiduously, diligently; मृगतृष्णिका = mirage ; अर्दित = पीडित, suffering from ; troubled with, शश = hare, खरहा ; विषाण = horn, सींग ।

English Translation—Diligently pressing, one may get oil even from sands ; parched with thirst one may drink water even in a mirage ; roaming about, one may find, perchance, a hare's horn ; but none can propitiate the heart of a stubborn blockhead.

हिन्दी अनुवाद—परिश्रमपूर्वक बालू को पेरता-पेरता कोई तेल निकाल ले, प्यास से व्याकुल कोई मृग-तृष्णा का जल पी ले, इधर-उधर घूमता फिरता कोई खरहे का सींग पा ले, लेकिन जिद्दी मूर्ख जन के मन को कोई भी प्रसन्न नहीं कर सकता ॥ ६ ॥

व्याख्या—यत्नतः प्रयासेन महता प्रयत्नेन, पीडयन् केनचित् अद्भुत यन्त्रेण मर्दयन्, सिकतासु वालुकासु अपि, तैलं स्नेहं, लभेत प्राप्नुयात् लब्धुं शक्नुयात् । तथा च पिपासार्दितः पिपासया पातुम् इच्छया अर्दितः पीडितः आकुलः जनः इति शेषः, मृगतृष्णिकासु मरुमरीचिकासु, सलिलं

Digitization by Arya Samaj Charitable Foundation, Chennai

जलं, पिवेत् पातुं शक्नुयात् । तथा पर्यटन् इतस्ततः भ्रमन् ; कदाचित् कस्मिश्चित् समये, शशस्य शशकस्य विषाणं शृङ्गम्, आसादयेत् प्राप्नुयात्, प्राप्तुं शक्नुयात् । न तु प्रतिनिविष्टः दुराग्रहः, मूर्खजनः शठः, तस्य चित्तम् मनः न आराधयेत् आराधयितुं शक्नुयात् । सिकतातैललाभादिवत् अत्यन्तदुर्घटं मूर्खचित्तानुरञ्जनम् इतिभावः । अतिशयोक्तिरलंकारः । वृत्तं पृथ्वी । अत्र सिकता सुतै-लमपि इत्यत्र, मृगतृष्णिका सुसलिलम् इत्यत्र, मूर्खजन चित्तम् इत्यत्र च अष्टमे वर्णे विहितस्य विच्छेदस्य अभावात् यतिभ्रष्टनामा दोषः" । तदुक्तं विद्यानाथेन । "यत्र स्थाने यतिभ्रंशस्तद्यतिभ्रष्टमुच्यते" । अत्र केचित् सिकतासुतैलम् एवं मृगतृष्णिकासुसलिलम्, अर्थात् सुतैलम् सुसलिलम् इति एकपदं पठन्ति ।

NOTES :—1. यत्नतः—यत्न + तसिल् (पञ्चम्याः तसिल्) ; यत्नात् । यत् + नः (यज – याचयत विच्छ प्रच्छ रक्षो नङ् ।

2. पीडयन्—पीडि + शतृ = पीडयत् ; pressing.

3. सिकतासु—सिकताः always plural femi.

"आपः सुमनसो वर्षा अप्सरसः सिकताः समाः
एते स्त्रियाँ बहुत्वे स्युः एकत्वेऽपि क्वचिन्मताः"

4. लभेत, पिवेत्, आसादयेत्, आराधयेत्—In all these शक्यार्थे लिङ्, by " शकि लिङ् च " ।

5. पिपासार्दितः—पिपासया अर्दितः (३या तत्) ; पातुम् इच्छा इति पिपासा ; पा + सन् + अ + टाप् ; (अ प्रत्ययात्) ; अर्द + क्त (कर्मणि) ; अर्दति or अर्दयति ।

6. मृगतृष्णिका—मृगतृष्णा + स्वार्थे कः ; प्रत्ययस्थात् कातपूर्वस्यात इदाप्यसुपः । by this इकार । मृगतृष्णा is a natural phenomenon observed in a sandy tract or in other hot places in the hot summer when heat is very intense. The floating vapour or air heated by the tropical

Digitization by Arya Samaj Charitable Foundation, Chennai

sun presents the appearance of water. It is called मृगतृष्णा, for the deer and other animals thinking it to be water, run after it to quench their thirst but are deceived in the end.

7. शशविषाणम्—शशस्य विषाणः शृङ्गम्; (षष्ठी तत्) तम्। कर्मणि रया; कर्म of आसादयेत्—

8. All the absolute impossibilities are enumerated in one verse in सुरेश्वर वार्तिक।

"मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः"
एष बन्ध्यासुतो याति शशशृङ्गधनुर्धरः॥ सुरेश्वर वार्तिकम्

Bathed in the water of mirage, wearing a garland of the flower of sky, here goes the son of the barren woman holding bow of the horn of a hare.

9. In this verse there is. यतिभङ्गदोष ; *i. e.*, wrong Caesura. The metre being पृथ्वी " जसौ जसयलावसुग्रहयतिश्च पृथ्वी गुरुः" we should have यति on the 8th syllable in every line and this यति must not fall within a word. In लभेत सिकतासु तैलमपि, the यति falls on the 8th syllable तै *i. e.* in the middle of a word. Similarly in पिबेच्च मृगतृष्णिकासु the यति falls on the 8th letter का in the middle of the word तृष्णिकासु ; Similarly न्नतु प्रतिनिविष्टमूर्ख-जन, यति falls on मू in the middle of मूर्ख ; So we have यतिभ्रष्टदोष here by the dictum of विद्यानाथ "यत्रस्थाने यतिभ्रंशस्तद्यतिभ्रष्टमुच्यते"।

10. Some scholars read सिकता-सुतैलं excellent oil of

Digitization by Arya Samaj Charitable Foundation, Chennai

sands. मृगतृष्णिका-सुसलिलं good water in mirage, but it is not natural though very ingenuous.

व्यालं वालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
भेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यते।
माधुर्यं मधुविन्दुना रचयितुं क्षाराम्बुधेरीहते
मूर्खान्यः प्रतिनेतुमिच्छति बलात्सूक्तैः सुधास्यन्दिभिः॥ ७॥

अन्वय :—यः मूर्खान् बलात् सुधास्यन्दिभिः सूक्तैः प्रतिनेतुम् इच्छति, असौ बालमृणालतन्तुभिः व्यालम् रोद्धुम् समुज्जृम्भते ; शिरीषकुसुमप्रान्तेन वज्रमणिम् भेत्तुम् सन्नह्यते ; मधुविन्दुना क्षाराम्बुधेः माधुर्यम् रचयितुम् ईहते।

Words—व्याल—wicked elephant दुष्ट हाथी, रोद्धुम् = to chain, to bind ; समुज्जृम्भते = to try, to attempt यत्न करना। क्षाराम्बुधि = Salt-Sea ; सूक्त = pithy sayings, apothegm. सुधास्यन्दिन् = nectar-pouring ambrosial ; प्रतिनेतुम् = to win over, to propitiate अनुनेतुम् प्रसन्न करना।

English Translation—He, who wishes to win over perforce the block-head, by means of his nectar-pouring (ambrosial) wise sayings, tries to bind a wicked elephant with a tender fibre of a lotus-stalk ; attempts to cut a diamond with the edge of a Sirisa flower ; and strives to impart sweetness to the Salt-Sea by means of one drop of honey.

हिन्दी अनुवाद—जो अपनी अमृतवर्षिणी सूक्तियों द्वारा मूर्खों को बलात् प्रसन्न करना चाहता है, वह कोमल कमल के तन्तु से मदमत्त हाथी को बाँधना चाहता है, शिरीष पुष्प के किनारे से वज्रमणि हीरे को

Digitization by Arya Samaj Charitable Foundation, Chennai

काटना चाहता है और खारे समुद्र को दो-एक बूँद मधु डाल कर मीठा बनाने की चेष्टा करता है ॥ ७ ॥

व्याख्या—यः नरः, मूर्खान् विवेकशून्यान् मूढान्, बलात् वाक्पटुतया, सुधास्यन्दिभिः अमृतस्राविभिः अतिमधुरैः सूक्तैः सुभाषितैः प्रियभाषणैः, प्रतिनेतुम् अनुनेतुम् अनुरञ्जयितुम् इच्छति काङ्क्षति, असौ वालं च तन्मृणालं विसं तस्य तन्तुभिः सूत्रैः कोमलविससूत्रैः, व्यालं दुष्टगजं रोद्धुम् नियन्तुम् बन्द्धुम् उज्जृम्भते प्रयतते ; बज्रमणिम् हीराख्यमणिम् शिरीषकुसुमप्रान्तेन कोमलशिरीषपुष्पधारया छेत्तुम भेत्तुम् संनह्यते उद्युक्तो भवति बद्धपरिकरो भवति ; क्षाराम्बुधेः लवणसमुद्रस्य, मधु-विन्दुना क्षौद्रविन्दुमात्रेण माधुर्यम् मधुरताम् ; रचयितुम् संपादयितुम् ईहते प्रयासं करोति काङ्क्षति वा । यथा मृणालसूत्रैः गजबन्धनम् दुष्करम्; यथा शिरीषपुष्पधारया हीरकच्छेदनम् दुष्करं, यथा मधुनः विन्दुमात्रेण लवणसागरस्य मधुरीकरणं दुष्करम् , तथैव मधुरसूक्तिभिः मूर्खानुरञ्जनमपि अत्यन्तदुष्करम् इति भावः । मालानिदर्शनालङ्कारः । शार्दूलविक्रीडितं-वृत्तम् ।

NOTES :—1. बलात्—हेतौ पञ्चमी ।

2. सुधास्यन्दिभिः—सुधां स्यन्दन्ते इति सुधा + स्यन्द + णिनिः (शीलार्थे) सुधास्यन्दिनः ; तैः Nectar dripping ; qual. सूक्तैः ।

3. सूक्तैः—शोभनानि उक्तानि इति सूक्तानि, तैः करणे ३या, वच् + क्त (भावे) उक्तम् meaning वचनम् ।

4. प्रतिनेतुम् अनुनेतुम् समाधातुम् ; प्रति + नी + तुम्, There is a different reading नेतुं वाञ्छति यः खलात्पथि सतां etc. but the reading adopted in the verse seems better.

5 असौ—कर्तृपदम् of समुज्जृम्भते, संनह्यति and ईहते ।
" यत्तदर्थयोर्नित्योऽभिसंबन्धः" यत् and तत् are co-relative terms. Here we find अदस् instead of तत् । यच्छब्दो नित्यमेव तच्छब्दं तच्छब्दसमानादिकं अदःशब्दादिकमपेक्षते । K. P. VII.

Digitization by Arya Samaj Charitable Foundation, Chennai

6. बालमृणालतन्तुभिः—बालं च तत् मृणालं, (कर्मधा) तस्य तन्तुभिः सूत्रैः (षष्ठी तत्) करणे ३या ।

7. व्यालम्—कर्मणि२या ; कर्म of रोद्धुम् ; "व्यालो दुष्टगजे सर्पे" इति विश्वकोशः । Some scholars take व्याल here to mean serpent, but it is ridiculous as serpents are not bound with ropes while elephants are tied with ropes.

8. रोद्धुम्—रुध्+तुम् ; तुमुन् has come in connection with उज्जृम्भते which means metaphorically यतते *i. e.*, घटते strives by the rule शक् धृष् ज्ञा ग्ला घट रभ लभ क्रम सहार्हास्त्यर्थेषु तुमुन् । रुध रु. उ. ; रुणध्मि or रुन्धे, रुरोध or रुरुधे, अरुधत् or अरौत्सीत् or अरुद्ध ।

9. शिरीषकुसुमप्रान्तेन—शिरीषकुसुमस्य प्रान्तः (ष० त०) तेन ; करणे ३या ; शिरीषं चेदं कुसुमम् इति शिरीषकुसुमम् (कर्मधा) । शिरीष flower is known to be the softest flower ; to try to cut a diamond with the edge of a शिरीष flower is the act of highest folly. For similar idea. नूनं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति शाकुन्तलम् A. I.

10 संनह्यते—सम्+नह् दिवा उभय+लट् ते ; In the sense of putting on armour, it is आत्मनेपदी । सन्नह्यते=puts on the armour ; prepares himself for.

11. क्षीराम्बुधेः—क्षीरः चासौ अम्बुधिश्च इति (कर्मधा) तस्य, सम्बन्धे षष्ठी ; in connection with माधुर्यम् । मधुरस्य भावः मधुर+ष्यञ् =माधुर्यम् । अम्बु+धा+किः । अम्बूनि धीयन्ते अस्मिन् इति " कर्मणि अधिकरणे च "—अनेन घोः किः स्यात् ।

12. मधुविन्दुना—मधुनः विन्दुः (ष० त०) तेन ; करणे ३या ।

3. We have here मालानिदर्शनालंकारः ; There is a

Digitization by Arya Samaj Charitable Foundation, Chennai

string of illustrations उपमान s, *i. e.*, "the things compared to" are many. अभवन्वस्तुसंबन्धः उपमा परिकल्पिकः" का० प्र० when there is an implied comparison between two impossible things or possible things then it is निदर्शनालंकारः।

स्वायत्तमेकान्तहितं विधात्रा
विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ॥ ८ ॥

अन्वय :—अज्ञतायाः स्वायत्तम् एकान्तहितम् छादनम् विधात्रा विनिमितम्; विशेषतः सर्वविदाम् समाजे मौनम् अपण्डितानाम् भूषणम्।

Words—स्वायत्त स्वस्य आयत्तम् under one's own control; in one's own power; अपने अधीन। एकान्तहित = always efficacious, एकान्त = invariable, perpetual सर्वदा, हित = beneficial; छादन = cover, disguise, ढक्कन।

English Translation—The creator has created (silence) a perpetually beneficial cover of ignorance in one's own power; under one's own control. Silence is an ornament for the fools especially in an assembly of the learned men.

हिन्दी अनुवाद—विधाता ने मूर्खता को ढाँकने के लिये एक नितान्त हितकारी ढकना वनाया है जो सदा मूर्खों के हाथ में रहता है। वह है मौन धारण करना। चुप रह जाना मूर्खों का बड़ा भारी भूषण है, ख़ासकर पण्डितों के समाज में ॥ ८ ॥

व्याख्या—अज्ञतायाः मूर्खतायाः, स्वायत्तम् स्वाधीनं न तु अन्यापेक्षम् एकान्तहितम् नितान्तहितकारि, अत्यन्तहितकरम्; छादनम् अवगुणाच्छ-

Digitization by Arya Samaj Charitable Foundation, Chennai

दकम् ; विधात्रा स्रष्ट्रा, विनिर्मितम् रचितम् कृतम् । किं तत् छादनम् ? मौनम् तूष्णींभावः । मौनं तूष्णींभावः, विशेषतः विशेषरूपेण, सर्वविदां सर्वज्ञानां पण्डितानां, समाजे गोष्ट्याम् सभायाम . अपण्डितानाम् अविदुषाम् मूर्खाणाम् विभूषणम् अलंकरणम् गुण एव इति भावः । अतः सर्वत्र विशेषतः विद्वत्समाजेषु अपण्डितैः मौनिभिः स्थातव्यम् । अन्यथा स्वरूप-प्रकाशनेन तेषाम् उपहास्यास्पदता स्यात् इति भावः । उपजातिवृत्तम्, इन्द्रोपेन्द्रवज्रा युगिति लक्षणम् ।

NOTES :—1. अज्ञतायाः—कर्मणि षष्ठी in con. with छादनम् by कर्तृकर्मणि कृति षष्ठी । ज्ञा + कः = ज्ञः ; इगुपधज्ञाप्रीकिरः कः ; न ज्ञः इति अज्ञः (नञ् तत्) तस्य भावः अज्ञता, तस्याः ।

2. स्वायत्तम्—स्वस्य आयत्तम् or (षष्ठी तत्) "अधीनो निघ्नः आयत्तः" इत्यमरः—Adj. to छादनम् ।

3. एकान्तगुणम्—एकान्तःगुणः यस्य तत् ; qual छादनम् This is a variant reading. एकान्तहितम्—एकान्तं हितम् इति सुप्सुपासमासः । qual. छादनम्. एकः एव अन्तः यस्य तत् यथा स्यात् तथा एकान्तम् Adv. नितान्तम् exceedingly. हितम् means हितकरम् । धा + क्त = हितम् ।

4. छादनम्—छाद्यते अनेन इति छादनम् "करणाधिकरणयोश्च अनेन सूत्रेण करणे ल्युट् । उक्ते कर्मणि प्रथमा (प्रादिपदिकार्थमात्रे प्रथमा)—विधात्रा is the अनुक्त कर्त्ता of विनिर्मितम् ।

5. मौनम् अपण्डितानां विभूषणम् अस्ति । मुनेः भावः इति मुनि + अण् "इगन्तात् लघुपूर्वात् अण्" ।

6. विशेषतः—विशेष + तसिल् "सार्वविभक्तिकः तसिः" । वि + शिष + घञ् = विशेषः ।

7. सर्वविदाम्—सर्वं विदन्ति इति सर्वविदः, सर्व + विद् + क्विप् । तेषाम् । विद् ज्ञाने वेत्ति, विवेद, अवेदीत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

8. समाजे—अधिकरणे ७मी ; सम् + अज् + घञ् = समाजः (मनुष्याणां सङ्घः), सम् + अज् + अप् = समजः (पशूनां सङ्घः) "समुदोरजः पशुषु"—अज् गतिक्षेपणयोः। अजति, विवाय, अजीत् or अवैषीत्।

9. अपण्डितानाम्—न पण्डिताः अपण्डिताः (नञ् तत्) तेषाम् ; कर्मणि षष्ठी ; in conn. with भूषणम् or शेषे षष्ठी। पण्डा सदसद्विवेकबुद्धिः। पण्डा अस्य संजाता इति पण्डितः ; पण्डा + इतच्, "तदस्य संजातमिति तारकादिभ्यः इतच्"।

10. विभूषणम्—विभूष्यते अनेन इति वि + भूष् + ल्युट् (करणे) predi. of मौनम्।

यदा किञ्चिज्ज्ञोऽहं गज इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥ ६॥

अन्वय:—यदा अहम् किञ्चिज्ज्ञः सन् गज इव मदान्धः समभवम्, तदा सर्वज्ञः अस्मि इति मम मनः अवलिप्तम् (अभूत्) ; यदा बुधजनसकाशात् किञ्चित् किञ्चित् अवगतम् तदा मूर्खः अस्मि इति मे मदः ज्वरः इव व्यपगतः।

Words—मदान्ध = blind with pride ; सर्वज्ञ = omniscient ; अवलिप्त = arrogant, घमण्डी, vain, stuck-up ; बुध = wise man, learned man, पण्डित ; मद = pride, haughtiness or rut.

English Translation—When I, knowing a little, was blinded with pride like an infatuated elephant, then my mind was stuck-up with the thought that I knew everything. When I had learnt little by little, from the learned, then my pride disappeared like fever, at the thought that I was a dunce.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—जब मैं अल्पज्ञ होकर भी मतवाले हाथी के जैसा मदान्ध हो गया तब यह समझकर कि मैं सर्वज्ञ हूँ—सब कुछ जानता हूँ, मेरा मन आकाश पर चढ़ गया। जब मैं पण्डितों की संगति से थोड़ा-थोड़ा जानने लगा तब मैं अपने को मूर्ख समझने लगा और तब लगा मेरा गर्व बुखार के जैसा धीरे-धीरे हटने ॥ ६ ॥

व्याख्या—अहम् किञ्चिज्ज्ञः अल्पज्ञः सन् यदा यस्मिन् काले, गजः हस्ती इव मदेन दर्पेण अन्धः कर्त्तव्याकर्त्तव्यविवेकशून्यः, समभवम् जातः, तदा तस्मिन् काले, सर्वज्ञः अशेषज्ञः अस्मि इति विचारणे मम मनः चेतः अवलिप्तम् गर्वितम् अभवत्, अल्पज्ञता गर्वहेतुः। "अल्पविद्यो महागर्वी। यदा, बुधजनसकाशात् विद्वज्जनमुखात् किञ्चित्किञ्चित् अल्पमल्पम, अवगतम् ज्ञातम्, तदा मूर्खः मूढः अज्ञः अस्मि इति विचारेण मे मदः गर्वः दर्पः, ज्वरः इव व्यपगतः निर्गतः दूरीभूतः इति भावः। 'आचार्यवान् पुरुषो वेद' इति शास्त्रात् आचार्यात् लब्धविद्यस्य एव विवेकः भवति। अल्पज्ञोऽपि सन्यः आत्मानं सर्वज्ञं मन्यते स एव मूर्खः, यस्तु सर्वज्ञोऽपि आत्मानम् अल्पज्ञं मनुते स एव विद्वान्। शिखरिणी वृत्तम्।

NOTES :—1. किञ्चिज्ज्ञः—knowing a little, किञ्चित् जानाति इति किञ्चित्+ज्ञा+कः (आतोऽनुपसर्गेकः) ; जानाति, जज्ञौ. अज्ञासीत्।

2. मदान्धः—मदेन अन्धः (३या तत्) मद्+अप्=मदः "मदोऽनुपसर्गे अप"। मद has two meanings 1. pride. 2. rut or ichor, in case of elephant.

3. सर्वज्ञः—सर्वं जानाति इति सर्व+ज्ञा+कः (आतोऽनुपसर्गे कः) or सर्वेषां ज्ञः (षष्ठी तत्) ज्ञा+कः=ज्ञः by इगुप etc. इति denotes here हेतु।

4. अवलिप्तम्—Remember अल्पविद्यो महागर्वी ; अव+लिप्+क्त (कर्मणि) ; लिप तुदा उभ लिम्पति or लिम्पते। 'अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपिच"।

Digitization by Arya Samaj Charitable Foundation, Chennai

5. बुधजनसकाशात्—" आख्यातोपयोगे "—इति अपादाने पञ्चमी। बुधः एव जनः (मयूरव्यंसकादित्वात् स०) ; स च रूपकरूपः इति शेखरे नागेशः। तस्य सकाशम् (ष० त०) तस्मात्। बुध्+कः (इगुपधज्ञाप्रीकिरः कः)=बुधः।

6. किञ्चित्किञ्चित्—उक्ते कर्मणि १मा (प्रातिपदिकार्थमात्रे प्रथमा) Why duplication ? नित्यवीप्सयोः द्वित्वम्। वीप्सायां द्विरुक्तिः। It shows continuous increase of knowledge.

N. B.—Our scriptures say " आचार्यवान् पुरुषः वेद" A man who learns from his preceptor, acquires विवेकः (prudence) and this prudence (विवेकः) is the cause of his modesty.

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसप्रीत्या खादन्खरास्थि निरामिषम्।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम्॥ १०॥

अन्वयः—श्वा कृमिकुलचितम् लालाक्लिन्नम् विगन्धि जुगुप्सितम् निरामिषम् खरास्थि निरुपमरसप्रीत्या खादन् पार्श्वस्थम् सुरपतिम् अपि विलोक्य न शङ्कते। क्षुद्रः जन्तुः परिग्रहफल्गुताम् न गणयति।

Words—कृमि=worm ; कीड़ा, चित=व्याप्त, full of, लाला=लेर saliva, विगन्धि=stinking, giving out offensive smell. बदबूदार ; खर=ass गदहा, निरामिष=flesh-less, आमिष=flesh मांस, परिग्रह=belongings, possessions सामान, फल्गु=worthless insignificant, व्यर्थ, बेकार।

English Translation—While crunching with great delight and unparalleled relish, an ass-bone, fleshless, nauseating, stinking, clammed with saliva.

Digitization by Arya Samaj Charitable Foundation, Chennai

and covered with a swarm of worms, a dog does not blush to behold even Indra, the lord of gods standing near by. A mean wretch does not mind the worthlessness of his possessions or belongings.

हिन्दी अनुवाद—कीड़ों से भरी, लार से भींगी दुर्गन्धमय, हेय, निर्मांस, गदहे की हड्डी को बड़े चाव से चवाता हुआ कुत्ता अपने पास में खड़े हुए इन्द्र को भी देख कर नहीं लजाता नहीं परवाह करता। नीच अपनी ली हुई वस्तु की तुच्छता की परवाह नहीं करता—स्वगृहीत वस्तु की क्षुद्रता पर ध्यान नहीं देता ॥ १० ॥

व्याख्या—श्वा शुनकः कृमिकुलैः कीटसमूहैः, चितम् व्याप्तम् लाला-क्लिन्नम् लालया सृणिकया क्लिन्नम् आर्द्रम्, विगन्धि, दुर्गन्धि, जुगुप्सितम् निन्दितं हेयम्, निरामिषम् निर्मांसम्, खरास्थि गर्दभस्य अस्थि ; निरुपमा या रसप्रीतिः तया अथवा निरुपमः उपमानरहितो यो रसः स्वादः तत्र या प्रीतिः प्रेम, तया, खादन् भक्षयन् पार्श्वस्थं निकटस्थम् सुरपतिम् इन्द्रम् अपि, विलोक्य दृष्ट्वा न शङ्कते लज्जते। तथाहि क्षुद्रः नीचः जन्तुः जीवः, परिग्रहे स्वीकृतवस्तुनि, फल्गुतां तुच्छताम्, न गणयति मनुते। जुगुप्सित-कर्माचरणतत्परो मूर्खोऽप्येवं महतां विगर्हणात् न बिभेति इतिभाव। अर्थान्तरन्यासोऽलंकारः ; अप्रस्तुतप्रशंसा च। अत्रोभयोः संकरः। हरिणी वृत्तम्।

Notes:—1. श्वा—कर्तृपद of खादन्, विलोक्य & शङ्कते।

2. कृमिकुलचितम्—कृमीणां कुलानि (ष० त०) तैः चितम् करणे ३या। चि + क्त (कर्मणि)।

3. लालाक्लिन्नम्—लालया क्लिन्नम् (३या तत्); लाला = सृणिका, दन्तान्तर्जलम, saliva ; क्लिद् + क्त (कर्त्तरि)।

4. विगन्धि—विगतः गन्धः यस्य तत् विगन्ध + इत् by the rule गन्धस्य इत् उत्पूति सुसुरभिभ्यः। वि is a synonym of पूति, or विगन्धः आमगन्धः यस्य अस्ति इति विगन्ध + इन्=विगन्धिन्।

Digitization by Arya Samaj Charitable Foundation, Chennai

5. जुगुप्सितम्—निन्दनीयं हेयम् ; गुप गोपने-जुगुप्सते etc. गुप्+सन् (स्वार्थे)+क्त (कर्मणि) ।

6. निरामिषम्—निर्गतम् आमिषं यस्मात् तत् (ब० व्री०) ।

7. खरास्थि—खरस्य अस्थि ; नरास्थि also is the reading, कर्मणि २या ; कर्म of खादन् ।

8. निरुपमरसप्रीत्या—निर् नास्ति उपमा यस्य सः निरुपमः (ब० व्री०) ; निरुपमः रसः स्वादः (कर्मधा) ; निरुपमरसे प्रीतिः आनन्दः (७मी तत्) ; तया हेतौ or प्रकृत्यादिभ्यः करणे ३या ।

9. पार्श्वस्थम्—पार्श्वे तिष्ठति इति पार्श्वस्थः (उपपदस) पार्श्व + स्था + कः (सुपिस्थः कः) ।

10. सुरपतिम्—सुराणां पतिः (षष्ठी तत्) तम् । कर्मणि२या, कर्म of विलोक्य । पतिः सिमास एव, A samasa *ending in* पति is declined like मुनि ।

11. परिग्रहफल्गुताम्—परिग्रहाणाम् स्वीकृतवस्तूनां फल्गुता तुच्छता इति (षष्ठी तत्)—ताम, कर्म of गणयति । "पत्नीपरिजनादानमूल-शापाः परिग्रहाः" अत्र आदान *i. e.*, गृहीतानि वस्तूनि । belongings, possessions परि + ग्रह + अप् (ग्रहवृदृनिश्चिगमश्च) ।

12. अर्थान्तरन्यासः and अप्रस्तुत प्रशंसा ; both mixed here. 1. Particular proposition is supported by a general proposition, so अर्थान्तर । 2. Something not present is described to imply something present. (as here मूर्ख is implied) ; hence अप्रस्तुतप्रशंसा ।

> शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं
> महीध्राादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।
> अधोधो गङ्गेयं पदमुपगता स्तोकमथवा
> विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ ११ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्वय :—इयम् गङ्गा स्वर्गात् शार्वम शिरः, पशुपतिशिरस्तः क्षितिधरम्, उत्तुङ्गा , महीध्रात् अवनिम्, अवनेः च अपि जलधिम् अधोऽधः स्तोकम् पदम् उपगता। अथवा विवेकभ्रष्टानाम् शतमुखः विनिपातः भवति।

Words—शार्व = of Shiva, शर्व = Shiva ; उत्तुङ्ग = high, lofty ; महीध्र = mountain पहाड़, स्तोक = little, low, base अल्प, नीच; विवेक = discretion, भ्रष्ट = fallen, विवेकभ्रष्ट = He who has lost discretion ; शतमुख = in hundred ways, lit. hundred-faced or headed. विनिपात = downfall, destruction or great fall. पतन।

English Translation—This Ganga, falling from heaven on the head of Shiva, from the head of the Lord of all beings on the mountain, from the lofty mountain on earth, from earth into the ocean ; went (gradually) to a lower and lower position. Or downfall in hundred ways (lit. hundred-faced) overtakes those who have lost their discretion.

हिन्दी अनुवाद—गङ्गा स्वर्ग से शिव के मस्तक पर गिरी। शिव के शिर से पहाड़ पर, ऊँचे पहाड़ पर से पृथ्वी पर और पृथ्वी पर से गिर कर समुद्र में जा मिली। इस तरह यह नीचे से नीचे गिरती गई। (दरअसल में बात यह है कि) जिनका विवेक भ्रष्ट हो गया है उनका पतन सैकड़ों प्रकार से होता है ॥ ११ ॥

व्याख्या—इयम् गङ्गा जाह्नवी, स्वर्गात् स्वर्लोकात्, शार्वम् शैवम्, शिवस्य शर्वस्य, शिरः मस्तकम्, पशुपतेः शिवस्य, शिरस्तः मस्तकात्, क्षितिधरम् हिमाचलपर्वतम्, उत्तुङ्गात् उत्तालात् अत्युचात्, महीध्रात् पर्वतात्, अवनिम् पृथ्वीम्, अवनेः च, भुवः च अपि, जलधिम् समुद्रम्,

Digitization by Arya Samaj Charitable Foundation, Chennai

अधोऽधः नीचात् नीचम्, शनैः शनैः नीचैः गच्छन्, स्तोकम् अल्पम् नीचम् ; पदम् स्थानम् उपगता । अथवा विवेकभ्रष्टानाम् विवेकशून्यानाम् अविवेकिनाम्, शतमुखः बहुप्रकारः बहुविधः, विनिपातः अधःपतनम्, भवति । पुरा किल सगरस्य सुताः स्वपितुः अश्वमेधीयाश्वान्वेषणक्रमेण पातालं गत्वा महर्षेः कपिलस्य पृष्ठभागे अश्वं बद्धं दृष्ट्वा तमेव चौरं मत्वा पादाघातेन तिरश्चक्रुः । अनन्तरं तस्य कोपानलेन ते सर्वे दग्धाः । अनन्तरं सगरस्य प्रपौत्रः भगीरथो नाम तपः तप्त्वा सगरकुमाराणां स्वर्गप्राप्त्यर्थं स्वर्गलोकात् गंगाम् भुवि अवतारयामास । इयं पौराणिकी कथा रामायणे वर्णिता । पर्यायालंकार, अर्थान्तरन्यासश्च । शिखरिणी वृत्तम् ।

Notes—1. गंगा—कर्तृपदम् of पदमुपगता ।

2. स्वर्गात्—अपादाने पञ्चमी ।

3. शार्वम्—शर्वस्य इदम् इति शर्व (शिव) + अण् । "ईश्वरः शर्वः ईशानः" इत्यमरः । qual. शिरः ।

4. पशुपतिशिरस्तः—पशूनां पतिः (ष० त०) ; तस्य शिरः (ष० त०) ; तस्मात्, (अपादाने ५मी) पञ्चम्याः तसिः ।

5. क्षितिधरम्—कर्म of उपगता । धरति इति धरः, धृ + अच् (पचादित्वात्), क्षितेः धरः इति क्षितिधरः (षष्ठी तत्) ।

6. महीध्रात्—अपादाने ५मी । महीं धरति इति मही + धृ + कः (मूलविभुजादिभ्यः कः) यथाह वामनः "महीध्रादयः मूलविभूजादि-दर्शनात्" ।

7. जलधिम्—कर्म of उपगता । जलानि धीयन्तेऽस्मिन् इति जलधिः, जल + धा + किः (कर्मण्यधिकरणे च) ।

8. विवेकभ्रष्टानाम्—भ्रष्टः विवेकः येषां ते भ्रष्टविवेकाः or विवेकभ्रष्टा (ब० व्री०) by "वाहिताग्न्यादिषु" Or we may say विवेकात् भ्रष्टाः (५मी तत्), वि + विच् (जुहो) + घञ् = विवेकः । भ्रंश् + क्त (कर्त्तरि) ।

Digitization by Arya Samaj Charitable Foundation, Chennai

Ganga in her arrogance had thought that none would bear her force & that she would carry away in her violent current Lord Shiva, so she was punished for this arrogance. She had to go to a lower & lower position, step by step due to her want of discretion.

9. शतमुखः—शतं मुखानि यस्य स (ब० व्री०) qual. विनिपातः।

10. विनिपातः—Downfall, destruction or great fall. वि + नि + पत् + घञ्।

11. Bhagirath, a king of solar race, practised hard penance to bring Ganga to earth from heaven for securing salvation of the 60000 sons of Sagar burnt to ashes by Kapila, while searching for the sacrificial horse of their father. Ganga agreed to come down to earth provided somebody would bear her force when she would be falling from heaven to Earth. Bhagiratha, then, propitiated Shiva, who permitted Ganga to fall on his head & lo! she remained there entangled in the matted locks of the Lord. She was afterwards released & so she fell on the Himalaya, from there on earth & thence into the ocean. While passing to ocean she touched the dry bones of Sagar's sons. So they got salvation. This story occurs in the Ramayana.

12. Our Ganga occupies different receptacles, hence पर्यायालंकारः। Particular instance is supported by a general statement, so अर्थान्तर न्यास।

Digitization by Arya Samaj Charitable Foundation, Chennai

शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपः
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥ १२ ॥

अन्वय :—हुतभुक् जलेन वारयितुं शक्यः, सूर्यातपः छत्रेण, समदः नागेन्द्रः निशिताङ्कुशेन, गोगर्दभौ दण्डेन, भेषजसंग्रहैः व्याधिः, विविधैः मन्त्रैः प्रयोगैः विषम् च (वारयितुं शक्यते)। सर्वस्य शास्त्रविहितम् औषधम् अस्ति। मूर्खस्य औषधम् नास्ति।

WORDS—हुतभुक्=fire, निशित=तेज sharp, अंकुश=goad, hook, भेषज=medicine, मंत्र=spell, charm, प्रयोग=use; समद=rutting, ichorous, मदस्रावी। विहित=prescribed or laid down.

English Translation—It is possible to ward off fire with water & the heat of the sun with an umbrella. Possible it is to control a lordly elephant with a sharp goad and an infuriated bull and an ass with a cudgel. Illness can be prevented by taking medicines and poison can be counteracted by the use of spells. Everything has got a medicine prescribed for it in the Shastras but there is no medicine (prescribed) for a fool.

हिन्दी अनुवाद—आग जल से बुझाई जा सकती है। सूर्य का ताप छाते से रोका जा सकता है, तीक्ष्ण अंकुश से मतवाला हाथी वशीभूत किया जा सकता है, गदहा और बैल भी डण्डे से सीधे किये जा सकते हैं, रोग औषध-सेवन से हटाया जा सकता है, विष भी मंत्र-यंत्र से दूर किया जा सकता है। प्रत्येक वस्तु की दवा शास्त्र में विहित है, पर मूर्ख की दवा कुछ भी नहीं है ॥ १२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

व्याख्या—हुतभुक् अग्निः, जलेन पानीयेन उदकेन, वारयितुं निवारयितुं शमयितुम् , शक्यः योग्यः, सूर्यस्य रवेः आतपः घर्मः उष्णता, छत्रेण आतपत्रेण, समदः मत्तः, नागेन्द्रः गजेन्द्रः, निशिताङ्कुशेन तीक्ष्णांकुशेन, गौः वृषभः गर्दभः रासभः च, दण्डेन यष्टिप्रहारेण, व्याधिः रोगः, भेषजसंग्रहैः औषधिसेवनेन, विविधैः नानाप्रकारैः, मंत्रप्रयोगैः मंत्राणां प्रयोगैः च, विषम् गरलम् वारयितुम् शक्यम् इत्यर्थः । सर्वस्य सकलस्य, शास्त्रविहितम् शास्त्रकथितम् , औषधम् भेषजम् अस्ति। मूर्खस्य अज्ञस्य, औषधम् नास्ति । शार्दूलविक्रीडितं वृत्तम् ।

Notes—1. हुतभुक्—हुतं होमद्रव्यं हविः भुङ्क्ते इति हुतभुक्, हुत+भुज्+क्विप् । हु+क्त (कर्मणि) ; हूयते, जलेन—करणे ३या ; शक्+यत् =शक्य "शकिसहोर्यत्" ।

2. समदः—मदेन सह वर्त्तमानः (तुल्ययोगे ब० व्री०) ।

3. नागेन्द्रः—(*a*) नागानाम् इन्द्रः (राजा) ष० तत् (*b*) नागेषु इन्द्रः श्रेष्ठः (७मी तत्) ; (*c*) नागः इन्द्रः इव (उपमित समासः) । न गच्छति इति अगः or नगः mountain (नगोऽप्राणिषु अन्यतरस्याम्) ; नगे भवः इति नागः, नग+अण् ।

4. निशितांकुशेन—निशितः अंकुशः (कर्मधा) तेन, करणे ३या श्यो+क्त=शित or श्यात । श्यो to sharpen, श्यति etc.

5. गोगर्दभौ—गौः च गर्दभः च इति (द्वन्द्वः) ।

6. भेषजसंग्रहैः—भेषजानां संग्रहाः इति (ष० त०) ; तैः करणे ३या, संग्रहैः =संग्रहणैः सम् +ग्रह+अप् ।

7. विविधैः—विभिन्नाः विधाः येषां ते (ब० व्री०) qual मंत्रप्रयोगैः ।

8. मंत्रप्रयोगैः—(*a*) मंत्राश्च प्रयोगाश्च इति (द्वन्द्वः) or (*b*) मंत्राणां प्रयोगाः (ष० त०) । मंत्र=charm, spell ; प्रयोग means

Digitization by Arya Samaj Charitable Foundation, Chennai

employment of मंत्र s for practical purposes. मंत्राः— मंतारं त्रायन्ते रक्षन्ति इति मंत्राः ।

9. शास्त्रविहितम्—शास्त्रे विहितम् or शास्त्रेण विहितम् (७मी or ३या तत्) ; शास् + ष्ट्रन् ; वि + धा + क्त । (कर्मणि) ।

10. औषधम्—ओषधी एव इति औषधम् ; ओषधी + अण् (स्वार्थे), ओषः पाकः धीयतेऽस्याम् इति ओष + धा + कि (कर्मण्यधिकरणे च घोः किः) । ओषधि + स्त्रियां ङीप् = ओषधी ; by "कृदिकारादक्तिनः" ।

11. मूर्खस्य = " अश्वस्य घासः" इति वत् तादर्थ्ये षष्ठी ।

अथ विद्वत्पद्धतिः ।

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा ।
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।
तज्जाड्यं वसुधाधिपस्य सुधियस्त्वर्थं विनापीश्वराः
कुत्स्याः स्युः कुपरीक्षका न मणयो, यैरर्घतः पातिताः ॥१३॥

अन्वयः—शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमाः विख्याताः कवयः यस्य प्रभोः विषये निर्धनाः वसन्ति ; तत् वसुधाधिपस्य जाड्यम् । सुधियः तु अर्थम् विना अपि ईश्वराः । यैः मणयः अर्घतः पातिताः ते कुपरीक्षकाः कुत्स्याः स्युः ।

Words—उपस्कृत = refined, adorned. आगम = Veda ; here, knowledge; learning, ज्ञान । जाड्य = Stupidity, folly, मूर्खता । कुपरीक्षक = examiner, कुत्स्य = blamable, Contemptible. निंदनीय । अर्घ = value, मूल्य ।

English Translation—It is the folly of the King that renowned poets (learned men), whose

Digitization by Arya Samaj Charitable Foundation, Chennai

speech is charming owing to the use of words refined by the Sastras and whose knowledge is fit to be imparted to the disciples, live in poverty in his Kingdom. The learned are kings even without wealth. Jewels are not despicable, but the bad lapidaries are, by whom these jewels are undervalued.

हिन्दी अनुवाद—यह तो जड़ता उस राजा की है जिसके राज्य में ऐसे ऐसे प्रसिद्ध कवि धनहीन रहकर निवास करते हैं जिनकी वाणी परम मनोहर और शास्त्रों द्वारा परिस्कृत है और जिनका ज्ञान शिष्यमण्डली में वितरण करने योग्य है। सुधीगण तो धन के बिना भी महान् हैं, बड़े पूज्य हैं। मणि कुत्सित (खराब) नहीं, कुत्सित हैं वे रत्न-पारखी जो मणि को न पहचान कर उसका मूल्य बहुत कम कूतते हैं॥ १३॥

व्याख्या—शास्त्रैः व्याकरणलंकारादिभिः उपस्कृताः संस्कृताः अलंकृताः शब्दाः, तैः सुन्दराः रम्या गिरः वाचः येषां ते। अथवा शास्त्रेण व्याकरणेन "सर्वशास्त्रमुखं व्याकरणम्" इतिन्यायेन। शिष्येभ्यः अन्तेवासिभ्यः प्रदेया प्रदातुं योग्याः आगमाः शास्त्राणि येषां ते। अतएव विख्याताः प्रसिद्धाः, कवयः विद्वांसः, यस्य प्रभोः राज्ञः, विषये राज्ये, निर्धनाः धनहीनाः, वसन्ति तिष्ठन्ति। तत् निर्धनत्वेन अवस्थानं वसुधाधिपस्य नृपस्य एव जाड्यम्। मान्द्यम् गुणग्रहणविरहितत्वम् अस्ति। सुधियः विद्वांसः तु अर्थं धनं विना अपि ईश्वराः समर्थाः पूज्याः। विद्यैव तेषां महाधनम् इतिभावः। यैः कुपरीक्षकैः रत्नपरीक्षकैः, मणयः रत्नानि, अर्घतः मूल्यतः पातिताः। बहुमूल्या अपि मणयः अल्पमूल्यकाः निर्दिष्टाः ते कुपरीक्षकाः कुत्सिताः परीक्षकाः, कुत्स्याः निन्द्याः स्युः, न तु मणयः निंद्याः। "सदाश्रयेण शोभन्ते पण्डिता वनिता लताः।" यदि राजानः विद्वज्जनमनोरथं न पूरयेयुः, तर्हि इदं तेषामेव कुत्सितत्वम्, न तु विदुषाम्। इति तात्पर्यार्थः। शार्दूलविक्रीडितं वृत्तम्। विरोधाभासः। अन्तिमे चरणे दृष्टान्तश्च।

Digitization by Arya Samaj Charitable Foundation, Chennai

NOTES :—1. शास्त्रोपस्कृतशब्दसुन्दरगिरः—शास्त्रैः (grammar rhetoric etc.), उपस्कृताः इति शास्त्रोपस्कृताः (३यातत्) ; तादृशा, शब्दाः, (कर्मधा०) तै सुन्दराः (३या तत्) ; शास्त्रोपस्कृतशब्दसुन्दराः गिरः येषां ते (ब० व्री०) । उप+कृ+क्त (कर्मणि)=उपस्कृत ; सुट् is inserted between उप and कृ by the rule, उपात्प्रतियत्न वैकृतवाक्याध्याहारेषु च—*i. e.* स् comes after उप before कृ in the sense of प्रतियत्न, वैकृत and वाक्याध्याहार । चकारात् भूषणे समवाये च Here उप+कृ has become उपस्कृ in the sense of भूषण *i. e.* to decorate. See सि० कौ० ।

2. शिष्य प्रदेयागमाः—शिष्येभ्यः प्रदेयाः इति (४ थी तत्) ; शिष्यप्रदेयाः आगमाः येषां ते (ब० व्री०) ; शास्+क्यप्=शिष्य ; प्र+दा+यत् (आतो यत्) ; आ+गम्+अप् ; आगम means Vedas, but here it means literary acquirements, knowledge.

3. निर्धनाः—निर्गतं धनं येषां ते (ब० बी०) by प्रादिभ्यः धातुजस्य etc., ।

4. तत्—refers to living in poverty. निर्धनत्वेन अवस्थानम् ।

5. वसुधाधिपस्य—वसुधायाः अधिपः (ष० त०) तस्य, शेषे षष्ठी । अधि+पा+कः । जड+ष्यञ्=जाड्यम् ।

6. सुधियः—सुधीः सुधियौ सुधियः ; Nom. of सन्ति । सु+ध्यै +क्विप् (ध्यायतेः संप्रसारणम्) ।

7. ईश्वराः—rich. ईश्+वरच् । (स्थेशभासपिसकसोवरच्) ;

8. कुपरीक्षकाः—कुत्सिताः परीक्षकाः इति (कर्मधा०) परि+ईक्ष्+ण्वुल् (अक),

9. कुत्स्याः—कुत्स अवक्षेपणे चुरादि आत्मने कुत्सयते to censure, कुत्स्+ण्यत्=कुत्स्य ।

Digitization by Arya Samaj Charitable Foundation, Chennai

10. अर्घात् पातिताः—undervalued, valued less than their real worth ; अर्घ=value, price, पातिता=पत्+णिच्+क्त (कर्मणि)=lowered down, made to fall down (in price).

11. Fig. of sp. is विरोधाभास ; as कवयः निर्धनाः अपि ईश्वराः। In the last line we find. दृष्टान्तालंकारः।

N. B.—सदाश्रयेण हि शोभन्ते पण्डिता वनिता लता

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा-
प्यर्थिभ्यः प्रतिपद्यमानमनिशं प्राप्नोति वृद्धिं पराम्।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं-
येषां तान्प्रति मानमुज्झत नृपाः ! कस्तैः सह स्पर्धते ॥१४॥

अन्वय :—यत् विद्याख्यम् धनम् हर्तुः गोचरम् न याति, सर्वदा किम् अपि शम् पुष्णाति, अर्थिभ्यः अनिशम् प्रतिपद्यमानम् पराम् वृद्धिम् प्राप्नोति, कल्पान्तेषु अपि निधनम् न प्रयाति, तत् विद्याख्यम् अन्तर्धनम् येषाम् (अस्ति) तान् प्रति हे नृपाः ! मानम् उज्झत, कः तैः सह स्पर्धते ।

Words—हर्तृ=Stealer, thief चोर। गोचर=within the ken or vision of *i. e.* perceptible to senses. शम्=सुखम्, happiness ; पुष्णाति=to develop or to promote; अर्थिन्=suppliant—याचक । प्रतिपद्यमान=given, कल्प=a day of Brahma equal to 4 yugas (*i. e.* 4320000 years.) rolling on 1000 times; life of the creation ; अन्तर्धन=hidden treasure, secret wealth. गुप्त-धन। उज्झ्=to give up. छोड़ना।

English Translation—The hidden treasure called learning does not become visible to a thief, always promotes unspeakable happiness, ever increases greatly when given to suppliants, and it is not

Digitization by Arya Samaj Charitable Foundation, Chennai

destroyed even at the end of the life of the creation. O kings, cast away your pride, towards those people who have this treasure, who can rival them ?

हिन्दी अनुवाद :—जो गुप्त विद्या-धन चोरों को नहीं दीख पड़ता, जो सर्वदा सुख की वृद्धि करता, जो याचकों को देने पर भी सदा बढ़ता ही रहता है और जो कल्पान्त होने पर भी नष्ट नहीं होता, ऐसा विद्या-धन हे राजाओ ! जिन महापुरुषों के पास है, उनके प्रति घमण्ड करना छोड़िये. भूलकर भी घमण्ड न कीजिये। कौन उनकी बराबरी कर सकता है ? ॥ १४ ॥

व्याख्या—यत् विद्याख्यम् विद्यानामकम् धनम्, हर्तुः चोरस्य, गोचरं न याति। यत् चौरः द्रष्टुं न शक्नोति। तथा सर्वदा सदा कालत्रये अपि, किमपि अवर्णनीयम्, शम् कल्याणम् सुखं, पुष्णाति प्रवर्धयति। अनिशम् सर्वदा, अर्थिभ्यः विद्यार्थिभ्यः, शिष्येभ्यः, प्रपद्यमानम् दीयमानम्, परां वृद्धिम् परमाभ्युदयम्, प्राप्नोति। तथा कल्पान्तेषु संसारप्रलयेषु अपि, निधनं नाशम् न प्रयाति न नश्यति। तत् विद्याख्यम् अन्तर्धनम् अभ्यन्तर-स्थवित्तम्, येषाम् पुरुषाणाम् अस्ति इति शेषः। तान् विद्याधनान् विदुषः प्रति हे नृपाः राजानः ! मानम् अहङ्कारम्, उज्झत त्यजत ; तैः विद्वद्भिः सह कः नरः स्पर्धते विगृह्णाति। न कोऽपीत्यर्थः। अतः ते सदा सादरं माननीयाः इति तात्पर्यम्। अत्र "धनात् विद्या गरीयसी" इति प्रति-पादनात् व्यतिरेकालंकारः। वृत्तं शार्दूलविक्रीडितम्। द्वितीये चरणे विरोधाभासालंकारः।

NOTES :—1. विद्याख्यम्—विद्या इति आख्या नाम यस्य तत् ; Nom. of याति etc. विद् + क्यप् + स्त्रियां टाप्।

2. गोचरम्—गावः चरन्ति अस्मिन् इति गोचरः देशः a pasturage ; गो means, इन्द्रिय as well ; then गोचर् means, within the scope of the senses ; गो+चर्+घः by गोचर संचर etc. घः।

Digitization by Arya Samaj Charitable Foundation, Chennai

3. किमपि शं पुष्णाति = promotes unspeakable happiness; शम् = सुखम् । पुष् वपादि ; पुपोष, अपोषीत् ।

4. अर्थिभ्यः—विद्यार्थिभ्यः, सम्प्रदाने ४ थी ।

5. प्रतिपद्यमानम्—प्रति + पद् + शानच् । पद् दि० आ ; पद्यते, पेदे अपादि, being imparted to students.

6. कल्पान्तेषु—कल्पानाम् अन्ताः (ष० त०) तेषु । Plural shows the extremely indestructible nature of learning. Even after several kalps, विद्या is not destroyed. निधनं न प्रयाति । Remember well the सुभाषित—

न चोरहार्यं न राजहार्यं न भ्रातृभाज्यं न च भारकारि,
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनं प्रधानम्" ॥

7. अन्तर्धनम्—अन्तर्गतं धनम् इति अन्तर्धनम् (मध्यमपदलोपी) Hidden in one's own self.

8. येषाम्—सम्बन्धे षष्ठी ; विद्याख्यम् अन्तर्धनम् अस्ति ।

9. उज्झत—उज्झ तु० पर लोट् II. P. उज्झति ।

10. Figures here are व्यतिरेक and विरोधाभास । स्वर्ण-धनात् विद्याधनम् अधिकतरम्-अतः व्यतिरेकः ।

प्रपद्यमानम् अपि वृद्धिं प्राप्नोति अतः विरोधाभासः ।

अधिगतपरमार्थान्पण्डितान्मावमंस्था-
स्तृणमिव लघुलक्ष्मीर्नैव तान्संरुणद्धि ।
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति विसतन्तुर्वारणं वारणानाम् ॥ १५ ॥

अन्वय :—हे नृप ! अधिगतपरमार्थान् पण्डितान् मा अवमंस्थाः, तृणम् इव लघुलक्ष्मीः तान् नैव संरुणद्धि । विसतन्तुः अभिनवमदरेखा-श्यामगण्डस्थलानाम् वारणानाम् वारणम् न भवति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

Words—परमार्थ=तत्त्वज्ञान ; knowledge of the real nature of things. अप+मन्+to disrespect ; विस=lotus-stalk. कमल की डंडी। गण्डस्थल=big temple (of an elephant). वारण=elephant, हाथी। वारण=check, hinderance ; रुकावट।

English Translation—Do not disregard the learned who have attained the highest truth (about Brahma). Wealth that insignificant thing like a straw does not obstruct them. A lotus-fibre does not become a hindrance, (*i. e.* tether). to elephants whose temples are darkened with stream of fresh ichor.

हिन्दी अनुवाद—तत्त्वज्ञान प्राप्त किए हुए पण्डितों का अनादर मत कर। तृण के समान तुच्छ लक्ष्मी उनको बाँध नहीं सकती। नवीन मद-रेखा से जिन मातङ्गों के गण्डस्थल काले हो गये हैं उन मातंगों को बाँधने के लिये कमल की डण्टी का सूत सीकर नहीं हो सकता ॥ १५ ॥

व्याख्या—अधिगतपरमार्थान् लब्धतत्त्वज्ञानान्, पण्डितान् विदुषः, मा अवमंस्थाः मा अवमानय। तृणम् घासः इव लघुः तुच्छा निःसारा, लक्ष्मीः संपत्तिः तान् विदुषः न संरुणद्धि, रोद्धुं शक्नोति। तत्र दृष्टान्तः दीयते। अभिनवो नवीनो यो मदो दानं तस्य रेखाभिः धाराभिः, श्यामानि कृष्णानि गण्डस्थलानि येषां तेषां वारणानां मत्तगजानां, विसतन्तुः मृणालं-सूत्रं वारणं प्रतिबन्धकभूतः निरोधकः न भवति। अत्र दृष्टान्तालंकारः। मालिनीवृत्तम्।

Notes :—1. अधिगतपरमार्थान्—अधिगतः परमार्थः तत्त्वज्ञानं यैः (ब० व्री०) तान् Qual. पण्डितान्। परमः अर्थः इति (कर्मधा)= The highest object ; the highest truth ; the knowledge about Brahma or the supreme soul.

Digitization by Arya Samaj Charitable Foundation, Chennai

2. पण्डितान्—कर्म of अवमंस्थाः, मा अवमंस्थाः ; "माङि लुङ्" "न माङ्योगे अट्"। मन् दिवा० आ० मन्यते मेने, लुङि अमंस्तः ; In 2nd P. S. अमंस्थाः। But on account of "न माङ्योगे अट्" अ is not added, so simply मा मंस्थाः ; With अव upsarga, मा अवमंस्थाः।

3. लघुलक्ष्मीः—लघुः or लघ्वी लक्ष्मीः (कर्म०) ; Wealth that is insignificant thing, like a straw, cannot bind him.

4. अभिनवमदरेखाश्यामगण्डस्थलानाम्—अभिनवः मदः (कर्मधा०) तस्य रेखाः (ष० त०) ताभिः श्यामानि (३ या तत्) ; तादृशानि गण्डस्थलानि (कर्मधा०) ; प्रशस्ताः गण्डाः इति गण्डस्थलानि (नित्य स०) or गण्डानां स्थलानि (ष० त०) तानि सन्ति येषां तेषाम् (ब० व्री०)।

5. विसतन्तुः—विसस्य तन्तुः (षष्ठी तत्) ; मृणालसूत्रम्।

6. There is a resemblance ; suggested in the two separate sentences, hence, दृष्टान्तालंकारः। लक्ष्मीः तान् नैव संरुणद्धि, विसतन्तुः वारणानां वारणं न भवति।

अम्भोजिनीवनविहारविलासमेव
हंसस्य हन्तिनितरां कुपितो विधाता।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्धकीर्तिमपहर्तुमसौ समर्थः॥ १६॥

अन्वय :—विधाता कुपितः सन् हंसस्य अम्भोजिनीवनविहारविलासम् एव नितराम् हन्ति। तु असौ अस्य दुग्धजलभेदविधौ प्रसिद्धाम् वैदग्ध-कीर्त्तिम् अपहर्तुम् न समर्थः।

WORDS—अम्भोजिनी=lotus ; विलास=luxury, merriment, sport, pastime, विहार=sport, gambol. नितराम्=

डा० डिल्ली रमण रेग्मी
कल्याणी रेग्मी स्मारक
पुस्तकालय
5643

Digitization by Arya Samaj Charitable Foundation, Chennai

entirely (along with हन्ति), exceedingly (along with कुपित) ; भेद=differentiation, separation. विधि=process ; प्रक्रिया । वैदग्ध=skill, dexterity, कुशलता ।

English Translation—The Creator being angry can destroy entirely the luxury of the swan in sporting in the forest of lotuses, but he cannot rob the swan of his famous reputation for the skill in the process of differentiating milk from water.

हिन्दी अनुवाद—विधाता क्रुद्ध होकर हंसों के कमल वन में विचरण करने के सुख को एकदम नष्ट कर सकता है। पर उसके दूध और पानी को अलग-अलग कर देने वाले गुण को नहीं छीन सकता ॥ १६ ॥

व्याख्या—विधाता स्रष्टा ब्रह्मा, नितराम् अतिशयेन कुपितः क्रुद्धः सन्, हंसस्य मरालस्य, अम्भोजिनीवने पद्मिनीवने, विहारः क्रीडा, स एव विलासः, तमेव न अन्यत् हन्ति । अथवा नितराम् अतिशयेन हन्ति । तु किन्तु असौ विधाता, अस्य हंसस्य दुग्धजलभेदविधौ, नीरक्षीरविवेकविषये; प्रसिद्धां विख्याताम्, वैदग्धकीर्तिम् चातुर्ययशः, अपहर्तुम् न शक्नोति । एवं कुपितो राजा विदुषः स्वराज्यात् विवासयितुं शक्नोति, परन्तु तेषां विद्या-परिशीलनचातुर्यं हर्तुं न शक्नोति इति भावः । अतः अप्रस्तुतप्रशंसा-लंकारः । वृत्तम् वसन्ततिलकम् ।

NOTES :—**1.** विधाता—कर्तृपद of कुपित & हन्ति । वि+धा +तृच् ।

2. अम्भोजिनीवनविहारविलासम्—अम्भोजिनीनाम् पद्मिनीनां वनम् (षष्ठी तत्) ; तस्मिन् विहारः (७ मी तत्), तस्य विलासः (ष० त०); तम् or विहारः एव विलासः तम् (मयूरव्यंसकादित्वात् स०) ; वि+ हृ+घञ् । वि+लस्+घञ् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

3. नितराम्—नि + तरप् + आम् ; आम् comes by "किम्-एत् = तिङ्—अव्यय—घात् आमु अद्रव्यप्रकर्षे"। Here घ (तर, तम) comes after नि, an अव्यय & so आमु, We may construe, नितरां कुपितः or नितरां हन्ति।

4. दुग्धजलभेदविधौ—दुग्धं च जलं च (द्वन्दः) तयोः भेदः (षष्ठी तत्) तस्य विधौ (षष्ठी तत्) ; विषयाधिकरणे ७ मी।

5. वैदग्धकीर्त्तिम्—वैदग्धयेन कीर्त्तिताम्ः (३ या तत्) "कृत्यवस्तुषु चातुर्यं वैदग्ध्यं परिकीर्त्यते"। वि + दह् + क्त = विदग्ध = well-burnt, well-polished, hence refined or cultured ; विदग्धस्य भावः इति वैदग्धम् विदग्ध + ष्यञ्।

6. Something not present (हंस) is described to mean something present (विद्वान्), Hence. अप्रस्तुत-प्रशंसालंकारः।

केयूराणि न भूषयन्ति पुरुषं, हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम्॥ १७॥

अन्वय :—न केयूराणि, न चन्द्रोज्ज्वलाः ताराः, न स्नानम्, न विलेपनम्, न कुसुमम्, न अलंकृताः मूर्धजाः, पुरुषं भूषयन्ति। या संस्कृता धार्यते, सा एका वाणी पुरुषम् समलङ्करोति। अखिलभूषणानि क्षीयन्ते, वाग्भूषणम् भूषणम्।

Words—केयूर = बल्ला, bracelet ; विलेपन = anointing ; चन्दनलेपन ; मूर्धजा = locks ; केशपाश। संस्कृत = refined. क्षीयन्ते = perish ; सततम् = everlasting. चिरस्थायी, सदा।

Digitization by Arya Samaj Charitable Foundation, Chennai

English Translation—*Bracelets* do not beautify a man, nor the necklaces bright like the moon ; nor bath, nor sandal-besmearing, nor flower, nor the well-dressed locks. Speech alone, possessed in a refined form, beautifies a person. All other ornaments wear away, the ornament of speech is the real everlasting ornament.

हिन्दी अनुवाद—बाँह पर बिजौठा पहरने से मनुष्य की शोभा नहीं होती, और न चन्द्रमा के जैसे जाज्वल्यमान मुक्ताहार पहरने ही से। न स्नान करने से, न चन्दनादि अंगराग लगाने से, न पुष्पमाला धारण करने से और न केशपाशों को सजाने ही से उसकी शोभा होती है। सुसंस्कृत वाणी ही एक वस्तु है जो मनुष्य को सुशोभित करती है। और सब भूषण तो नष्ट हो जाते हैं। वाणीरूपी भूषण ही सदा बना रहता है, कभी नष्ट नहीं होता ॥ १७ ॥

व्याख्या—न केयूराणि अङ्गदानि, न चन्द्रः इव उज्ज्वलाः धवलाः देदीप्यमानाः, हाराः मुक्ताहाराः, न स्नानम् अभिषेकः न विलेपनम् चन्दनलेपनम् ; न कुसुमं पुष्पम्, न अलंकृताः भूषिताः मूर्धजाः केशपाशाः कुंतलाः, पुरुषं मनुष्यं भूषयन्ति अलंकुर्वन्ति । या संस्कृता उपस्कृता व्याकरणशुद्धिभूषिता वाणी धार्यते स्वायत्तीक्रियते सा एका केवला वाणी पुरुषं मनुष्यं समलंकरोति भूषयति। अखिलानि सकलानि भूषणानि अलङ्काराः क्षीयन्ते। वाग्भूषणम् वाणीभूषणं तु सततं नित्यम् अनपायि, भूषणम् अस्ति। व्यतिरेकालंकारः (वृत्तं शार्दूलविक्रीडितम्)।

NOTES :—1. केयूराणि—bracelets worn on the upper arms, armlets.

2. चन्द्रोज्ज्वला :—चन्द्रःइव उज्ज्वलाः इति (उपमानकर्म) "उपमानानि सामान्यवचनैः।" उत्+ज्वलः, ज्वल्+अच् (पचादित्वात्)=ज्वलः, burning.

Digitization by Arya Samaj Charitable Foundation, Chennai

3. मूर्धजाः—मूर्ध्नि जायन्ते इति (उपपद् तत्) मूर्धन्+जन्+ड । जनेः डः ।

4. संस्कृता—refined, polished with culture. सम्+कृ +क्त (कर्मणि) "संप्ररिभ्यां करोतौ भूषणे सुट्"। संस्कार means here correctness of grammar, rhetoric etc., व्याकरणादि-परिशुद्धा । Kalidasa also says "संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च"—Kumar. 1.28. where Malli says संस्कारः व्याकरणजन्या शुद्धिः ।

5. सततम्—lasting for good, everlasting; Qual. भूषणम् । सम्+तन्+क्त (कर्त्तरि); म् of सम् is optionally dropped by "समोवा हिततत्तयोः ।"

6. वाग्भूषणम्—वाक् एव भूषणम् इति "मयूरव्यसंकादित्वात्समासः, स च रूपकरूपः इति शेखरे नागेशः"। For practical purposes we call such समास, रूपकतत्पुरुष ।

7. अन्येभ्यः भूषणेभ्यः वाग्भूषणम् अधिकं चिरस्थायि । अतः व्यतिरेकालंकारः ।

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते, नहि धनं विद्याविहीनः पशुः ॥१८॥

अन्वयः—विद्या नाम नरस्य अधिकम् रूपम् (अस्ति) प्रच्छन्न-गुप्तम् धनम् (अस्ति), विद्या भोगकरी यशःसुखकरी (अस्ति), विद्या गुरूणाम् गुरुः (अस्ति), विद्या विदेशगमने बन्धुजनः (अस्ति), विद्या परा देवता (अस्ति)। विद्या राजसु पूज्यते, धनम् नहि पूज्यते । विद्या-विहीनः (नरः) पशुः अस्ति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

WORDS—प्रच्छन्न = hidden, गुप्त = रक्षित, protected ; preserved, भोगकरी = pleasure-giving ; परा देवता = highest god.

English Translation—Learning, is verily the greatest beauty for man. It is a well-protected hidden treasure. Learning promotes one's pleasure, and conduces to one's fame and happiness. Learning is the preceptor of the preceptors. Learning is a friend in foreign journey. It is the highest god. Learning is honoured among kings, and not wealth. One devoid of learning is a beast.

हिन्दी अनुवाद—विद्या ही मनुष्य की सब से बड़ी सुन्दरता है, यही उसका छिपा हुआ सुरक्षित धन है, विद्या ही भोग-विलास देने वाली यश और सुख देने वाली है, तथा गुरुओं का भी गुरु है, विदेश में विद्या ही मित्र बनती है, विद्या परम देवता है, राजाओं के बीच में विद्या ही पूजी जाती है, धन नहीं पूजा जाता। विद्याविहीन मनुष्य पशु के समान है ॥१८॥

व्याख्या—विद्या नाम प्राकाश्ये अभ्युपगमे वा, नरस्य मनुष्यस्य, अधिकं श्रेष्ठम् रूपम् आकारविशेषः। प्रच्छन्नं निगूढं गुप्तं रक्षितं च धनम् सम्पत्तिः। विद्या भोगान् करोति इति भोग्यवस्तुलाभहेतुः, यशश्च सुखंच यशःसुखे, ते करोति इति कीर्तिसुखहेतुः, विद्या गुरूणाम् आचार्याणाम् गुरुः आचार्यः; पूज्यानामपि पूज्या इति भावः। विद्या विदेशगमने प्रवासे बन्धुः सुहृज्जनः। विद्या परा उच्चतमा देवता, विद्या राजसु नृपेषु पूज्यते समाद्रियते पुरस्क्रियते वा, धनं संपत्तिः न पूज्यते। विद्यया विहीनः रहितः शून्यः जनः पशुः पशुप्रायः, कर्त्तव्याकर्तव्यविवेकशून्यः सन् पशुतुल्यः भवति इति तात्पर्यम्। "तद्रूपकम् अभेदो यः उपमानोपमेययोः" इत्यनेन उपमानोपमेययोः अभेदात् रूपकम्। अत्र अनेकानि रूपकानि, अतः मालारूपकालंकारः। वृत्तं शार्दूलविक्रीडितम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

NOTES :—1. विद्या + विद् + क्यप् + स्त्रियां टाप् । विदन्ति अनया इति विद्याः ।

2. नाम—प्रकाश्ये, " as is well-known " or उपगमे—*i. e.* I admit verily, indeed. नाम प्राकाश्य संभाव्य क्रोधोपगम-कुत्सने इत्यमरः ।

3. प्रच्छन्नगुप्तम्—प्रच्छन्नं तत् च गुप्तम् च इति (विशेषोभयपद कर्म०) like खञ्ज-कुब्जः, प्र + छद् + क्त (कर्मणि), गुप्त + क्त (कर्मणि), or प्रच्छन्नं यथा तथा गुप्तम् where प्रच्छन्नं has क्रिया वि० २ या modifying गुप्तम् । Secretly protected.

4. भोगकरी यशःसुखकरी—भोगान् करोति contributing to pleasures. भोग + कृ + ट + स्त्रियां ङीप् (टिड्ढाणञ् etc.,) ट is added to कृञ् in the sense of (1 हेतौ, यशस्करी विद्या, (2) ताच्छील्ये, श्राद्धकरः ब्राह्मणः (3) आनुलोम्ये, वचनकरः " कृञो हेतु-ताच्छील्यानुलोम्येषु " टः ।

यशश्च सुखं च इति यशःसुखे, ते करोति इति यशः सुख + कृ + ट + ङीप् = यशःसुखकरी ट । in both cases is added in the sense of हेतु ।

5. गुरूणां गुरुः—गुरुणाम् — निर्धारणे षष्ठी " यतश्च निर्धारणम् " the preceptor of the preceptors, the greatest of the great. " गुरुः is femi. qual. विद्या, By वोतोगुणवचनात् " गुरु has two femi. forms. गुरु or गुर्वी Here गुरुः is used. in femi. form गृणन्ति हितम् उपदिशन्ति इति गॄ + कुः (उणादिः) = गुरुः = उपदेष्टा ।

6. बन्धुजनः—बन्धुः एव जनः इति (मयूरव्यसंकादित्वात् रूपक-समासः) बध्नाति मनः स्नेहात् इति बन्ध + उः (उणादि) = बन्धुः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

राजसु पूजिता—It is an unusual construction, by क्तस्य च वर्त्तमाने we expect राज्ञां पूजिता as the sense is of present sense, but not so here.

7. राजसु—अधिकरणे ७ मी० । If the reading be राजसु-पूजिता then राजभिः सुपूजिता इति (३ या तत्) ; If राजसु पूजिता, then there is a trouble in explaining सप्तमी is राजसु We can however say. विषयाधिकरणे ७ मी, in राजसु विषये पूजिताः ।

8. विद्याविहीनः—विद्यया विहीनः इति (३ या तत्) ; हा+क्त (कर्मणि)=हीन ; ओहाक् त्यागे ।

9. There is an identity of उपमान and उपमेय in this verse, विद्या and रूपम्, विद्या and धनम् etc. & so रूपकालंकार, but as there are many Rupakas here so we have. माला-रूपकम् ।

क्षान्तिश्चेत्कवचेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनाम्
ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम् ।
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्यानवद्या यदि
व्रीडा चेतत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ॥ १६ ॥

अन्वय :—देहिनाम् क्षान्तिः चेत् (अस्ति) कवचेन किम् । क्रोधः चेत् अस्ति अरिभिः किम् ? ज्ञातिः चेत् (अस्ति) अनलेन किम् ? यदि सुहृत् (अस्ति) दिव्यौषधैः किं फलम् । यदि दुर्जनाः (सन्ति) सर्पैः किम् ? यदि अनवद्या विद्या अस्ति, धनैः किम् ? व्रीडा चेत् (अस्ति) भूषणैः किम् ? यदि सुकविता अस्ति, (तर्हि) राज्येन किम् ?

Words—देहिन्=one having body, *i. e.* man ; कवच =armour बखतर । ज्ञाति=kinsman, relation ; अनवद्या= blameless, faultless. बे-दाग, निष्कलंक । व्रीडा=shyness, shame. लज्जा ।

Digitization by Arya Samaj Charitable Foundation, Chennai

English Translation—If men have forgiveness, what is the use of armour (to them) ; if they have anger, why should they require enemies? If there are relations, what is the necessity of fire ? If there is friend, what is the use of the efficacious medicines ? If there are villains, what is the use of serpents ? If there is flawless learning, what is the necessity of wealth ? What is the use of ornaments (to men) if they have the sense of modesty ? If they have sweet poetry, what have they to do with a kingdom ?

हिन्दी अनुवाद—यदि मनुष्य के पास क्षमा है तो बख्तर की क्या जरूरत ? यदि क्रोध है तो शत्रुओं की क्या कमी ? यदि ज्ञाति-वर्ग हैं, अपने दायाद हैं, तो आग की क्या कमी ? यदि मित्र हैं तो लाभदायी औषधों का क्या प्रयोजन ? यदि साथ में दुष्ट लोग हैं तो साँपों की क्या आवश्यकता है ? यदि निष्कलंक विद्या पास में है तो धन की क्या आवश्यकता ? यदि मन में लाज है तो भूषणों का क्या प्रयोजन ? यदि काव्य करने की शक्ति है तो राज्य की क्या जरूरत ? ॥ १६ ॥

व्याख्या—देहिनां प्राणिनाम् क्षान्तिः क्षमा अस्ति, चेत् तर्हि ; कवचेन वर्मणा, किम् प्रयोजनम् ? क्रोधः कोपः, चेत् यदि अस्ति अरिभिः शत्रुभिः किम् प्रयोजनम् ? नास्ति किमपि इतिभावः, स एव अन्तः-शत्रुत्वात् उपद्रवहेतुः । ज्ञातिः दायादः चेत् यदि अस्ति, अनलेन अग्निना किम् ? ज्ञातिः एव सर्वार्थनिर्मूलननिदानम् । सुहृद् मित्रम् चेत् अस्ति, दिव्यौषधैः सिद्धौषधैः किम् फलम् । सुहृद् एव आरोग्यकरः । दुर्जनाः दुष्टाः खलाः यदि सन्ति, सर्पैः भुजगैः किम् । खलाः एव प्राणापहारिणः । अनवद्या अनिन्द्या विद्या यदि अस्ति तर्हि धनैः किम् ? विद्या एव अखिल-भोगकरी । व्रीडा लज्जा चेत् , भूषणैः अलङ्करणैः किमु ? सा एव लोकोत्तर-

Digitization by Arya Samaj Charitable Foundation, Chennai

भूषणम् । सुकविता सत्पाण्डित्यं यदि अस्ति तर्हि राज्येन भूमण्डलाधिपत्येन किम् प्रयोजनम् अस्ति । सा एव सकललोकवशीकरी । वृत्तं शार्दूल-विक्रीडितम् ।

NOTES :—1. देहिनाम्—शेषे षष्ठी ; देहः+इनिः=देहिन्= Being.

2. कवचेन—"गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका" अनेन करणे ३या। कवचेन किं <u>साध्यते</u>; साधनक्रियां प्रति कवचः करणम्। Similarly in अरिभिः अनलेन, औषधैः सर्पैः, धनैः भूषणैः and राज्येन ; करणे तृतीया is used.

3. ज्ञातिः—ज्ञा+क्तिच् (कर्त्तरि), ज्ञातयः=संबन्धिनः । Because kinsmen are the fire that internally consume ; they are the cause of ceaseless trouble.

4. सुहृत्—शोभनं हृदयं यस्य स सुहृद् मित्रम् "सुहृद्दुर्हृदौ मित्र-मित्रयोः। अनेन सूत्रेण हृदयस्य हृद्-भावः। अन्यथा सुहृदयः—having good heart ; दुर्हृदयः—having bad heart. Friends are the best medicines of life.

5. अनवद्या—न अवद्या इति (नञ् तत्) ; अ+वद्+यत् अवद्य by "अवद्यपण्यवर्यागर्ह्य-पणितव्या-निरोधेषु"। अवद्य means "not fit to be spoken." अवद्यं-पापम् । न+वद्+क्यप्= अनुद्यम्=should not be spoken ; अनुद्यं गुरु नाम ।

6. सुकविता—कवयति वर्णयति इति कविः, तस्य भावः, कविता= सुकविता means here "good power of composition." poetic genius.

7. राज्येन—करणे तृतीया See कवचेन। राज्ञः भावः कर्मवा; राजन्+यक्=राज्यम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जने आर्जवम्।
शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥ २० ॥

अन्वय :—स्वजने दाक्षिण्यम्, परिजने दया, दुर्जने सदा शाठ्यम्, साधुजने प्रीतिः नृपजने नयः, विद्वज्जने आर्जवम्, शत्रुजने शौर्यम्, गुरुजने क्षमा कान्ताजने धृष्टता, एवम् कलासु ये च पुरुषाः निपुणाः तेषु एव लोकस्थितिः अस्ति।

Words—दाक्षिण्य=courtesy. शाठ्य=roguery, cunning, नय=diplomacy, diplomatic conduct ; आर्जव=straight-forwardness. सरलता, सिधाई। क्षमा=forbearance, forgiveness, endurance, धृष्टता=boldness, ढिठाई। लोकस्थिति=preservation of social order, लोकमर्यादा, or stability of the worldly order.

English Translation—The stability of the social order solely depends upon those men who are thus expert in the following fine arts—courtesy towards their relations, kindness towards attendants, cunning always towards the wicked, affection for the good, diplomacy towards kings, simplicity or straight-forwardness towards the learned, bravery towards enemies, forbearance or endurance towards elders ; boldness towards beloved women.

हिन्दी अनुवाद—जो अपने लोगों पर अनुकूलता दिखाते, नौकर-चाकरों पर दया दिखाते, दुष्टों के साथ शठता का व्यवहार करते, साधुओं से प्रीति करते, राजाओं के प्रति नीति के साथ वर्ताव करते, विद्वानों के

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रति सिधाई से पेश आते, शत्रुओं के प्रति वीरता दिखाते, अपने गुरुजनों के प्रति सहनशीलता दिखाते, अपनी कान्ता के प्रति ढिठाई दिखाते, इस तरह से जो लोग ललित कलाओं में निपुण रहते हैं उन्हीं के ऊपर लोकमर्यादा, लोकस्थिति का भार रहता है ॥ २० ॥

व्याख्या—स्वजने बन्धुजने । जातौ एकवचनम् एवमुत्तरत्रापि । दाक्षिण्यम् छन्दानुवर्त्तनम्, अन्यथा निन्देयुः । परिजने भृत्यवर्गे दया दयालुता, अन्यथा त्यजेयुः । दुर्जने खलेषु सदा शाठ्यम् । शठे शाठ्यं समाचरेत् इतिन्यायात् । साधुजने सज्जनेषु प्रीतिः स्नेहः आदरः, नृपजने राजसु नयः नीतिः नीतिपालनमिति भावः । अन्यथा दण्डयेयुः । विद्वज्जने पण्डितजनेषु आर्जवम् सरलता अवक्रता अकुटिलता । शत्रुजने अरिषु शौर्यम् विक्रमः अन्यथा निपातयेयुः । गुरुजने पित्रादिषु क्षमा सहिष्णुता, अन्यथा शपरेन् । कान्ताजने धृष्टता प्रागल्भ्यम्, अन्यथा वशीकुर्युः । इत्येवम् उक्तविधासु कलासु शिल्पेषु ये च पुरुषाः कुशलाः निपुणाः, तेषु पुरुषेषु एव न तु अन्येषु जनेषु लोकस्थितिः लोकमर्यादा । अवतिष्ठते इति शेषः । ते एव जनाः लोकव्यवस्थासंस्थापकाः । न तु उक्तगुण-विरहिताः लोकाः । एवंभूताः तु विद्वांसः एव, न अन्ये इति हृदयस्थः भावः ।

NOTES :—1. स्वजने—स्वस्य जनः (ष० त०) or स्वःजनः (कर्मधा), विषयाधिकरणे ७ मी । "जातौ एकवचनम्" । Similarly परिजने दुर्जने etc.

2. दाक्षिण्यम्—दक्षिणस्य भावः इति दक्षिण + ष्यञ् । courtesy.

3. दया—दय् + अङ् + स्त्रियां टाप् । शठस्य भावः शठ + ष्यञ् = शाठ्यम् । This is to pay one back in one's own coin, tit for tat.

4. साधुजने—साधुः जनः (कर्मधा०) or साधुः एव जनः इति (मयूरव्यंसकादित्वात् रूपकरूपः समासः) ।

Digitization by Arya Samaj Charitable Foundation, Chennai

5. नयः—नीतिः, diplomatic conduct ; नी+अच्=नयः। सप्तमी in this verse is विषयाधिकरणे ७ मी in all cases.

6. लोकस्थितिः—लोकस्य स्थितिः (ष० त०), the preservation of social order, stability of social system.

N. B.—Only those people who acquit themselves so wisely, in their dealings with others can be called the real. लोकसंरक्षक—लोकव्यवस्थासंस्थापक and not others.

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम् ॥ २१ ॥

अन्वयः— सत्संगतिः) धियः जाड्यम् हरति, वाचि सत्यम् सिञ्चति, मानोन्नतिम् दिशति, पापम् अपाकरोति, चेतः प्रसादयति, दिक्षु कीर्तिम् तनोति, कथय सत्संगतिः पुंसाम् किम् न करोति ?

Words—धी=intellect, जाड्य=dullness, stupidity, मूर्खता मन्दता। सिञ्च्=to sprinkle, to infuse (here) ; दिश्= to give, to bestow ; तनोति=spreads.

English Translation—Good company removes the dullness of intellect ; infuses truth into speech, bestows high honour, removes sin, clarifies or purifies the mind, spreads fame in all directions. Say what does not good company do for men ?

हिन्दी अनुवाद—सत्संगति बुद्धि की जड़ता हरती, वाणी में सत्यता सींचती, मान बढ़ाती, पाप को मार भगाती, मन को प्रसन्न करती, सब दिशाओं में कीर्ति फैलाती है। भला कहो सत्संगति मनुष्यों की कौन सी भलाई नहीं करती ? ॥ २१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

व्याख्या—सत्संगतिः सत्संगः, धियः बुद्धेः, जाड्यं मान्द्यम्, हरति निरस्यति। वाचि वचने, सत्यं सुनृतभावं सिञ्चति, आप्लावयति। मानोन्नतिम् बहुमानातिशयं दिशति प्रयच्छति। पापं किल्विषं कश्मलम् अपाकरोति नाशयति। धर्मोपदेशादिभिः इति भावः। चेतः मनः प्रसादयति निर्मलयति। ज्ञानोपदेशादिना। दिक्षु सर्वासु दिशासु कीर्तिम् यशः तनोति विस्तारयति। अतः सत्संगतिः सज्जनसमागमः पुंसाम् नराणाम् किं श्रेयः मङ्गलं वा न करोति, कथय—इति पृथग्जनसंबोधनम्। सर्वमपि श्रेयः करोत्येव इत्यर्थः। अतः सज्जनैः एव सह संगतिः कर्तव्या, न तु कदापि दुर्जनैः सह इति तात्पर्यम्। अत्र बहूनां क्रियापदानां एककर्तृकत्वात् दीपिकालंकारः। वृत्तं वसन्ततिलकम्।

Notes :—1. सत्संगति :—सतां संगतिः इति (षष्ठी तत्) or सती संगतिः (कर्मधा०) ; अस्+शतृ=सत्, सम्+गम्+क्तिन् कर्तृ-पदम् of हरति सिंचति......करोति etc.

2. धियः जाड्यम्—धियः has संबन्धे षष्ठी ; जडस्य भावः जड+ष्यञ् =जाड्यम्=sluggishness, dullness ; कर्म of हरति।

3. वाचि सत्यं सिञ्चति="Sprinkles truth on one's speech" infuses truth in one's speech. *i. e.*, it makes man truthful. सत्+यत्=सत्यम्।

4. दिशति=प्रयच्छति, gives, bestows.

5. प्रसादयति—प्र+सद्+णिच्+लट् III. S.=प्रसन्नं निर्मलं करोति=makes serene, or clear.

6. पुंसाम्—संबन्धे षष्ठी ; connected with किम् (श्रेयः)।

Remember. "महाजनस्य संसर्गः कस्य नोन्नतिकारकः"

Also "सतां हि संगः सकलं प्रसूते"

" "त्यज दुर्जनसंसर्गं भज साधुसमागमम्"

Digitization by Arya Samaj Charitable Foundation, Chennai

6. The Fig. is दीपकालङ्कारः, when one & single case-noun is connected with many verbs we have दीपकालंकार "सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ।

जयन्ति ते सुकृतिनः रससिद्धाः कवीश्वराः ।
नास्ति येषांयशः काये जरामरणजं भयम् ॥ २२ ॥

अन्वय :—सुकृतिनः रससिद्धाः ते कवीश्वराः जयन्ति । येषाम् यशः-काये जरामरणजम् भयम् नास्ति ।

WORDS—सुकृतिन् = blessed, रससिद्ध = Conversant in sentiments ; जरा = old age.

English Translation—Victorious are those blessed lords of the poets accomplished in sentiments whose body of fame has no fear due to old age and death.

हिन्दी अनुवाद—वे सुकृती (पुण्यवान्) श्रृङ्गारादि रसों में सिद्ध कवीश्वर विजयी होते हैं, उनके यशरूपी शरीर में जरा-मरण का भय नहीं रहता ॥ २२ ॥

व्याख्या—सुकृतिनः धन्याः रससिद्धाः श्रृङ्गारादिरसेषु सिद्धहस्ताः, ब्रह्मसाक्षात्कारवन्तः वा रससिद्धाः सिद्धरसाः "रसो वै सः" इति श्रुतेः । ते प्रसिद्धाः पूर्ववर्णिताः वा, कवीश्वराः कविप्रधानाः कविश्रेष्ठाः जयन्ति, जयं साफल्यं प्राप्नुवन्ति । तेषां कवीश्वराणां यशःकाये कीर्त्तिशरीरे जरामरणाभ्यां जातं भयम् नास्ति । रससिद्धानां सिद्धपारदगुटिकानाम भौतिकशरीरे एव जरामरणभयं नास्ति । यशःशरीरे तु किं वक्तव्यम् । कवीश्वराणां यशःशरीरम् कल्पान्तस्थायि इति भावः । अत्र कथं न जरामरणभयम् ? यतः ते रससिद्धाः सिद्धपारदगुटिकाः । अतः अत्र काव्यलिङ्गालंकारः । "काव्यलिङ्गं हेतोर्वाक्यपदार्थता" । अनुष्टुभ् वृत्तम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

NOTES :—1. सुकृतिनः—सुकृतम्+इनि (अस्त्यर्थे) ; " अतः इनिठनौ "। सु+कृ+क्त (भावे) ।

2. रससिद्धाः—रस has many meanings, रस=(*a*) sentiment. श्रृङ्गार, वीर, हास्य etc., (*b*) रस=mercury, पारद, a medical term & hence we have. रसायनशास्त्र । (*c*) "रसो वै सः" इति श्रुतिः ।। रस=ब्रह्मसाक्षात्कार, vision of God ; सिद्धः रसः यैः ते सिद्ध रसाः or रससिद्धाः, " वाहिताग्न्यादिषु " ।

3. कवीश्वराः—कविषु ईश्वराः or कवीनाम् ईश्वराः (७ मी or ६ ठी तत्) ईशन्+वरच् । " स्थेशभासपिसकसो वरच् " ।

4. यशः काये—यशः एव कायः (मयूरव्यसंकादित्वात् समासः रूपकरूपः) तस्मिन् । चि+घञ्=कायः ।

5. जॄ+अङ्+टाप् जरा । Mark " कल्पान्तकोटिबन्धुः स्फुरति कवीनां यशःप्रसरः " जरामरणजम्=जरा च मरणं च इति जरामरणे (द्वन्दः) ताभ्यां जायते इति जरामरण+जन्+ड=जरामरणजम् Qual. भयम् ।

There is श्लेष—here. 1. सुकृतिन्–(*a*) meritorious, whose poetic works are nice. (*b*) adepts in preparing medicines.

2. रससिद्धाः—(*a*) accomplished in poetic sentiments. (*b*) Skilled in managing mercury, which when prepared according to certain formula, is supposed to grant immunity from old age, just as Pandit M. M. Malaviya has been enjoying in his कायाकल्प treatment.)

6. Fig. here must be श्लेष ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ मानशौर्यपद्धतिः

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥२३॥

अन्वय :—क्षुत्क्षामः अपि जराकृशः अपि शिथिलप्रायः अपि कष्टाम् दशाम् आपन्नः अपि विपन्नदीधितिः अपि प्राणेषु नश्यत्सु अपि मत्तेभेन्द्र-विभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः मानमहताम् अग्रेसरः केसरी किम् जीर्णम् तृणम् अत्ति ।

Words :—क्षुत् = hunger, क्षाम = emaciated ; क्षुत्क्षाम = hunger-stricken. भूख से पीड़ित । शिथिल = languid, दीधितिः = कान्ति, lustre, energy. इभ = गजशावक, young elephant ; कुम्भ = temple, कनपट्टी । ग्रास = eating, devouring, खाना । अग्रेसर = first & foremost.

English Translation—Though parched with hunger, emaciated with old age, almost languid, reduced to a sad plight, with all energy lost and life perishing, will the lion, the first and foremost among those great in self-respect; ever eat the withered grass; when his desire is solely fixed on eating the flesh of the cloven (by his paws) temple of the infatuated lordly elephant ?

हिन्दी अनुवाद—यद्यपि सिंह क्षुधा से पीड़ित रहता, बुढ़ापे के मारे निर्बल बन जाता, शिथिल प्राय हो बड़ी दुर्दशा में रहता, उसका सारा तेज नष्ट हो जाता, जान जाने-जाने को हो जाती है, तौभी मानधनियों में अग्रगण्य वह केसरी मदमत्त गजेन्द्र के मस्तक को फाड़कर उसके

Digitization by Arya Samaj Charitable Foundation, Chennai

मांस ही को खाने की इच्छा करता है; क्या कभी वह सूखी घास खाता ? ॥ २३ ॥

व्याख्या—क्षुत्क्षामः क्षुधा क्षुधया क्षामः क्षीणः अपि, जरया वार्द्धक्येन कृशः दुर्बलः अपि, शिथिलप्रायः बाहुल्येन विश्लथदेहः अपि, कष्टां आहारलाभाभावात् कृच्छ्रां दशाम् अवस्थाम् आपन्नः प्राप्तः अपि, अतएव विपन्नदीधितिः नष्टकान्तिः नष्टचेताः अपि, प्राणेषु असुषु जीवने, नश्यत्सु वहिंर्गच्छत्सु सत्सु अपि। प्राणसंकटे उपस्थिते अपि । मत्तः मदमत्तः इभेन्द्रः गजेन्द्रः , तस्य विभिन्नौ विदारितौ कुम्भौ, तयोः पिशितम् मांसम्, तस्य ग्रासे भक्षणे कवलने एकं मुख्यं यथा तथा बद्धा निहिता स्पृहा वाञ्छा यस्य स, मानमहताम् आत्मसम्मानेन महताम् उन्नतानाम् स्वाभिमानिनाम्, अग्रेसरः अग्रगण्यः, केसरी सिंहः, किम् जीर्णं शीर्णं शुष्कं तृणं घासम् अत्ति खादति ? न अत्ति इतिभावः। नरेण आत्मसम्मानिना भवितव्यम् इति फलितार्थः। अप्रस्तुतप्रशंसालंकारः। वृत्तं शार्दूलविक्रीडितम् ।

NOTES :—1. क्षुत्क्षामः—क्षुधा क्षामः इति (३ या तत्) क्षुध्+क्विप्=क्षुध्, hunger. क्षै+क्तः=क्षामः, "क्षायो मः" इति मत्वम् ।

2. जराकृशः—जरया कृशः इति (३ या तत्) जॄ+अङ्+स्त्रियां टाप्=जरा, "षिद्भिदादिभ्यः अङ्" ।

कृश् कृश्यति+क्त=कृशः, त is dropped by "अनुपसर्गात् फुल्लक्षीवकृशोल्लाघाः"। After an उपसर्ग, कर्शित as in प्रकर्शितः।

3. शिथिलप्रायः—प्रायेण बाहुल्येन शिथिलः इति शिथिलप्रायः सुप्सुपेति समासः । "प्रायो बाहुल्यतुल्ययोः" इति मेदिनी । प्रायः means, plenty or abundance and equal." शिथिलप्रायः means almost languid, mostly unnerved. Mark at the end of a compound, the word प्राय can be translated as. (1) almost, for the most part or mostly, as in प्रियप्राया

Digitization by Arya Samaj Charitable Foundation, Chennai

वृत्तिः (उ० च० II. २), मृतप्रायः, almost dead (2) abounding in, full of, as in शालिप्रायः देशः (3) like, resembling (तुल्य), वर्षशतप्रायं दिनम्, day equal to hundred years.

4. आपन्नः—आ + पद् + क्त ; रदाभ्यां निष्टातो नः पूर्वस्य च दः ।

5. विपन्नदीधितिः—विपन्ना नष्टा दीधितिः कान्तिः तेजः यस्य स (ब० व्री०) ।

6. प्राणेषु नश्यत्सु अपि—भावे ७ मी । यस्य च भावेन भावलक्षणम् । प्राण and असु are always used in plural.

7. मत्तेभेन्द्र etc.,—इभानाम् इन्द्रः इभेन्द्रः (ष० त०), मत्तः इभेन्द्रः (कर्मधा०) ; विभिन्नौ कुम्भौ (कर्मधा०) मत्तेभेन्द्रस्य विभिन्नकुम्भौ (षष्ठी तत्), तयोः पिशितम् (षष्ठी or सप्तमी तत्), तस्य ग्रासः (षष्ठी तत्), एकं यथा तथा बद्धा इति एकबद्धा (सुप्सुपा०), मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासे एकबद्धा स्पृहा यस्य सः (ब० व्री०) ।

whose desire is solely fixed etc., एकबद्धा=solely or mainly fixed. मद् + क्त (कर्त्तरि) = मत्त ; भिद् + क्त = भिन्न, ग्रस् + घञ् = ग्रासः ; बन्ध् + क्त = बद्ध ; स्पृह + अङ् + टाप् = स्पृहा ।

8. मानमहताम्—मानेन महान्तः इति (३ या तत्) ; तेषाम् great on account of self-respect or honour.

9. अग्रेसरः—अग्रे + सृ + टः ; "पुरोऽग्रतोऽग्रेषु सर्त्तेः" । अग्रं सरति or अग्रेण सरति or अग्रे सरति इति अग्रेसरः । अग्रसर is also correct. (बाहुलकात् इति हरदत्तः) ।

10. केसरी—Also केशरी ; both correct ; though केसरी is more popular. केसर + इनिः (मत्त्वर्थ), कर्तृपद of अत्ति ।

11. अत्ति—अद् अदादि अत्ति अत्तः अदन्ति । आद or जघास, अघसत् ।

N. B.—Figure is अप्रस्तुतप्रशंसालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वल्पस्नायुवसावसेक मलिनंनिर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥ २४ ॥

अन्वय :—श्वा स्वल्पस्नायुवसावसेक मलिनम् निर्मांसम् अपि अस्थिकं लब्ध्वा परितोषम् एति । तत् च तस्य क्षुधाशान्तये न अस्ति । सिंहः अङ्कम् आगतम् अपि जम्बुकम् त्यक्त्वा द्विपम् निहन्ति । कृच्छ्रगतः अपि सर्वः जनः सत्त्वानुरूपम् फलम् वाञ्छति ।

Words—स्नायु = Sinew, muscle, नस । वसा = fat, चर्वी । अवसेक = sprinkling, मिलावट । जम्बुक = jackal ; सत्त्वानुरूपम् = in accordance with one's strength or greatness of heart. शक्ति के योग्य ।

English Translation—On getting even a little bone, fleshless & dirty, with a little sprinkling of fat and muscles, a dog is well satisfied although it does not satisfy his hunger. (But) a lion kills an elephant, leaving a jackal though fallen into his clutches. Everybody though in difficulty, wishes for a fruit according to his own greatness of heart.

हिन्दी अनुवाद—तांत और चर्वी की कुछ-कुछ मिलावट के कारण मैली एवं मांस-रहित हड्डी के टुकड़े को पाकर कुत्ता संतुष्ट हो जाता है, पर इससे उसकी क्षुधा शान्त नहीं होती । सिंह अपनी गोद में आये हुए शृगाल को छोड़ कर हाथी को ही मारता है । विपत्तिग्रस्त होने पर भी सब कोई अपने बल के योग्य फल की ही कामना करता है ॥ २४ ॥

व्याख्या—श्वा शुनकः स्वल्पयोः लेशमात्रयोः स्नायुवसयोः स्नायु-मेदसोः अवसेकेन मेलनेन मलिनं मलदूषितम् अपि निर्मांसम् मांसरहितम्

Digitization by Arya Samaj Charitable Foundation, Chennai

अपि अस्थिकम् क्षुद्रम् अस्थि कीकसम् लब्ध्वा प्राप्य परितोषम् एति, परितुष्टः भवति । तत् अस्थि च तस्य शुनः क्षुधायाः बुभुक्षायाः शान्तये निवारणाय न पर्याप्तं भवति । सिंहः मृगराजः तु अङ्कम् आगतम् समीपवर्त्तिनम् अपि जम्बुकम् क्रोष्टारम् त्यक्त्वा विहाय द्विपम् गजम् एव निहन्ति मारयति । तथाहि कृच्छ्रगतः अतिसंकटस्थः अपि सर्वः सकलः जनः लोकः सत्त्वानुरूपम् स्वशक्त्यनुगुणम् फलं लाभं वाञ्छति काङ्क्षति । न तु दुर्वलः उत्तमफलकाङ्क्षी । न च प्रवलः निकृष्टफलाभिलाषी च भवति । अर्थान्तरन्यासोलंकारः । वृत्तं शार्दूलविक्रीडितम् ।

NOTES :—1. स्वल्पस्नायु etc.—स्नायुः च वसा च स्नायुवसे स्वल्पे स्नायुवसे (कर्मधा०) स्वाल्पस्नायुवसयोः अवसेकः (षष्ठी तत्) तेन मलिनम् (३ या तत्) : Qual. अस्थिकम् ।

2. निर्मांसम्—निर्गतं मांसम् यस्मात् तत् (ब० व्री०) ; Qual. अस्थिकम् ।

3. अस्थिकम्—अस्थि + कन् ; कुत्सितम् अस्थि इति " कुत्सिते कन् " । कर्म of लब्ध्वा ।

4. तत् तस्य क्षुधाशान्तये न भवति । क्षुधायाः शान्तिः तस्यै तादर्थ्ये ४ थी वक्तव्या or क्लृपि संपद्यमाने ४ थी वक्तव्या । क्षुध् = क्षुध् + क्विप् । क्षुध् + आप् (स्वार्थे) = क्षुधा ।

" वष्टि भागुरिल्लोपोऽवापयोरुपसर्गयोः
आपं चैव हलन्तानां यथा वाचा दिशा निशा ॥"

5. सिंहः—हिनस्ति इति हिंस् + अच् = सिंहः ।

"भवेत् वर्णागमात् हंसः सिंहोवर्ण विपर्ययात् ।
गूढोत्मा वर्णविकृतेः वर्णलोपात् प्रषोदरः " ॥

6. द्विपम्—द्वाभ्यां शुण्डमुखाभ्यां पिवति इति द्वि + पा + कः ; कर्मका० ।

7. सत्त्वानुरूपम्—सत्त्वस्य अनुरूपम् इति (ष० त०) ; in

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वल्पस्नायुवसावसेक मलिनंनिर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥ २४ ॥

अन्वय :—श्वा स्वल्पस्नायुवसावसेक मलिनम् निर्मांसम् अपि अस्थिकं लब्ध्वा परितोषम् एति । तत् च तस्य क्षुधाशान्तये न अस्ति । सिंहः अङ्कम् आगतम् अपि जम्बुकम् त्यक्त्वा द्विपम् निहन्ति । कृच्छ्रगतः अपि सर्वः जनः सत्त्वानुरूपम् फलम् वाञ्छति ।

Words—स्नायु=Sinew, muscle, नस । वसा=fat, चर्वी । अवसेक=sprinkling, मिलावट । जम्बुक=jackal ; सत्त्वानुरूपम्=in accordance with one's strength or greatness of heart. शक्ति के योग्य ।

English Translation—On getting even a little bone, fleshless & dirty, with a little sprinkling of fat and muscles, a dog is well satisfied although it does not satisfy his hunger. (But) a lion kills an elephant, leaving a jackal though fallen into his clutches. Everybody though in difficulty, wishes for a fruit according to his own greatness of heart.

हिन्दी अनुवाद—तांत और चर्वी की कुछ-कुछ मिलावट के कारण मैली एवं मांस-रहित हड्डी के टुकड़े को पाकर कुत्ता संतुष्ट हो जाता है, पर इससे उसकी क्षुधा शान्त नहीं होती। सिंह अपनी गोद में आये हुए शृगाल को छोड़ कर हाथी को ही मारता है। विपत्तिग्रस्त होने पर भी सब कोई अपने बल के योग्य फल की ही कामना करता है ॥ २४ ॥

व्याख्या—श्वा शुनकः स्वल्पयोः लेशमात्रयोः स्नायुवसयोः स्नायु-मेदसोः अवसेकेन मेलनेन मलिनं मलदूषितम् अपि निर्मांसम् मांसरहितम्

Digitization by Arya Samaj Charitable Foundation, Chennai

अपि अस्थिकम् क्षुद्रम् अस्थि कीकसम् लब्ध्वा प्राप्य परितोषम् एति, परितुष्टः भवति। तत् अस्थि च तस्य शुनः क्षुधायाः बुभुक्षायाः शान्तये निवारणाय न पर्याप्तं भवति। सिंहः मृगराजः तु अङ्कम् आगतम् समीपवर्त्तिनम् अपि जम्बुकम् क्रोष्टारम् त्यक्त्वा विहाय द्विपम् गजम् एव निहन्ति मारयति। तथाहि कृच्छ्रगतः अतिसंकटस्थः अपि सर्वः सकलः जनः लोकः सत्त्वानुरूपम् स्वशक्त्यनुगुणम् फलं लाभं वाञ्छति काङ्क्षति। न तु दुर्बलः उत्तमफलकाङ्क्षी। न च प्रबलः निकृष्टफलाभिलाषी च भवति। अर्थान्तरन्यासोलंकारः। वृत्तं शार्दूलविक्रीडितम्।

Notes :—1. स्वल्पस्नायु etc.—स्नायुः च वसा च स्नायुवसे स्वल्पे स्नायुवसे (कर्मधा०) स्वाल्पस्नायुवसयोः अवसेकः (षष्ठी तत्) तेन मलिनम् (३ या तत्) : Qual. अस्थिकम्।

2. निर्मांसम्—निर्गतं मांसम् यस्मात् तत् (ब० व्री०); Qual. अस्थिकम्।

3. अस्थिकम्—अस्थि + कन्; कुत्सितम् अस्थि इति "कुत्सिते कन्"। कर्म of लब्ध्वा।

4. तत् तस्य क्षुधाशान्तये न भवति। क्षुधायाः शान्तिः तस्यै तादर्थ्ये ४ थी वक्तव्या or क्लृपि संपद्यमाने ४ थी वक्तव्या। क्षुध् = क्षुध् + क्विप्। क्षुध् + आप् (स्वार्थे) = क्षुधा।

"वष्टि भागुरिल्लोपोऽवापयोरुपसर्गयोः
आपं चैव हलन्तानां यथा वाचा दिशा निशा॥"

5. सिंहः—हिनस्ति इति हिंस् + अच् = सिंहः।

"भवेत् वर्णागमात् हंसः सिंहोवर्ण विपर्ययात्।
गूढोत्मा वर्णविकृतेः वर्णलोपात् प्रषोदरः"॥

6. द्विपम्—द्वाभ्यां शुण्डमुखाभ्यां पिबति इति द्वि + पा + कः; कर्मका०।

7. सत्त्वानुरूपम्—सत्त्वस्य अनुरूपम् इति (ष० त०); in

Digitization by Arya Samaj Charitable Foundation, Chennai

keeping with, according to Malli's commentary of Raghu V. 21., it means " in accordance with one's inherent disposition or character. " Kales. अनुगतं रूपम् इति अनुरूपम् (प्रादितत्पु) ।

8. Figure here is अर्थान्तरन्यासः general statement supports the particular statement.

लाङ्गूलचालनमधश्चरणावपातं भूमौ निपत्य वदनोदरदर्शनं च ।
श्वापिण्डदस्य कुरुतेगजपुंगवस्तुधीरंविलोकयति चाटुशतैः च भुङ्क्ते २५

अन्वय :—श्वा लाङ्गूलचालनम् अधश्चरणावपातम् भूमौ निपत्य वदनोदरदर्शनम् च पिण्डदस्य कुरुते । गजपुंगवः तु धीरम् विलोकयति चाटुशतैः च भुङ्क्ते ।

Words—अवपात=falling, दर्शन=showing, exhibiting, पिण्डद=अन्नदाता bread-giver, food-giver. पुंगव=श्रेष्ठः, excellent, धीरम्—seriously, gravely. चाटुशतानि= hundreds of flattering & coaxing words, खुशामदी बातें ।

English Translation—A dog wags his tail, falls down at the feet, and falling on ground exhibits his face and maw to his bread-giver but a lordly (an excellent) elephant looks seriously or gravely and eats when cajoled with hundreds of coaxing words.

हिन्दी अनुवाद—कुत्ता अपने अन्नदाता के सामने पूँछ हिलाता, उसके पैरों पड़ता और जमीन पर लोट कर उसे अपना मुँह और पेट दिखाता है, परन्तु गजेन्द्र अपने अन्नदाता के प्रति गम्भीरता पूर्वक ताकता और बहुत ललकारने-पुचकारने पर चारा खाताहै ॥ २५ ॥

व्याख्या—श्वा सारमेयः लाङ्गूलचालनम् पुच्छविवर्त्तनम्, अधः चरणयोः पादयोः अवपातः पतनम्, भूमौ पृथ्व्यां निपत्य पतित्वा वदनोदर-

Digitization by Arya Samaj Charitable Foundation, Chennai

दर्शनं वक्त्रकुक्षिप्रदर्शनं च पिण्डदस्य भोजनदायकस्य स्वस्वामिनः। पुरस्तात् इति शेषः। कुरुते नीचचेष्टाम् आविष्करोति। गजपुंगवः गजश्रेष्ठः गजेन्द्रः "श्रेष्ठो क्षाणौ तु पुंगवौ" इति वैजयन्ती। विलोकयति पश्यति। पिण्डदस्य संनिधौ इति भावः। चाटुशतैः बहुभिः प्रियोक्तिभिः अनुनयविनयैः च भुङ्क्ते खादति। भुजोऽनवने इति आत्मनेपदम्। नीचानीचजनयोः इमौ एव दृष्टान्तौ। अप्रस्तुतप्रशंसाभेदः अन्योक्तिः अलंकारः। वृत्तं वसन्ततिलकम्।

NOTES —1. श्वा—कर्तृपदम् of कुरुते।

2. लाङ्गूलचालनम्—लाङ्गूलस्य चालनम् इति (षष्ठी तत्) कर्म०।

3. अधश्चरणावपातम्—चरणयोः अवपातः (७ मी तत्) अधः चरणावपातः इति (सुप्सुपा स०); अव+पत्+घञ्। कर्मका०।

4. वदनोदरदर्शनम्—वदनम् च उदरम् च, तयोः समाहारः वदनोदरम् समाहारद्वन्दः by द्वन्दश्च प्राणितूर्या सेनाङ्गानाम्। वदनोदरस्य दर्शनम् (ष० त०)। कर्म of कुरुते।

5. पिण्डदस्य—पिण्डं ददाति इति पिण्ड+दा+कः "आतोऽनुपसर्गे कः" पिण्ड=cake; but here it means food; विवक्षया षष्ठी or in connection with पुरस्तात् word understood.

6. गजपुंगवः—गजः पुंगवः इव (उपमित कर्म) "उपमितं व्याघ्रादिभ्यः सामान्याप्रयोगे"। पुमान् गौः इति पुंगो+टच् (गोरतद्धितलुकि टच्)=पुंगवः (विशेषणसमासः कर्मधारयः)। "स्युरुत्तर पदे व्याघ्रपुंगवर्षभकुञ्जराः सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः" इत्यमरः।

7. धीरम् क्रियाविशेषणे २ या, धीरं यथा तथा gravely.

8. चाटुशतैः—चाटूनां शतानि, तैः (षष्ठी तत्); करणे ३ या।

9. भुङ्क्ते—"भुजोऽनवने" अनेन आत्मनेपदम्। भुज् is आत्मनेपद, but not in the sense of protecting.

10. अन्योक्तिः अलंकारः। अप्रस्तुतप्रशंसाभेदः।

Digitization by Arya Samaj Charitable Foundation, Chennai

परिवर्तिनि संसारे मृतः को वा न जायते।
स जातो येन जातेन याति वंशः समुन्नतिम् ॥ २६ ॥

अन्वय :—परिवर्त्तिनि संसारे कः न वा मृतः न वा जायते। स जातः येन जातेन वंशः समुन्नतिम् याति

English Translation—In this ever-changing world, who is not born and who is not dead? He alone is (truly) born, by whose birth the family attains eminence.

हिन्दी अनुवाद—इस परिवर्त्तनशील संसार में कौन नहीं जनमता और कौन नहीं मरता? पर यहाँ उसी का जन्म लेना सफल है जिसके जन्म लेने से वंश की उन्नति हो ॥ २६ ॥

व्याख्या—परिवर्त्तिनि परिवर्त्तनशीले संसारे जगति कः पुरुषः न वा मृतः म्रियते, कः न वा जायते उत्पद्यते। "जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च" इति गीतावचनात्। स पुमान् जातः उत्पन्नः येन जातेन उत्पन्नेन पुंसा करणेन वंशः कुलम् अन्वयः समुन्नतिम् उत्कर्षं याति प्राप्नोति। य स्ववंशम् उद्धारयति स एव जन्मनः लाभं प्राप्नोति"। इति तात्पर्यम्। अनुष्टुम् वृत्तम्।

Notes :—1. परिवर्तिनि—परि+वृत्+णिनि, तस्मिन्। Q. संसारे।

2. येन जातेन पुंसा—करणे ३ या। हेतौ ३ या अपि भक्तुं शक्यते।

3. समुन्नतिम्—कर्म of याति। eminence, elevation, rise in status.

कुसुमस्तवकस्येव द्वयी वृत्तिर्मनस्विनः।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥ २७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्वय :—कुसुमस्तवकस्य इव मनस्विनः द्वयी वृत्तिः। सर्वलोकस्य मूर्ध्नि वा, वने एव शीर्यते वा।

WORDS—मनस्विन् = spirited, highminded ; स्तवक = गुच्छा bunch, bouquet (of flowers) ; शीर्यते = fades ; झुराना।

English Translation—There is only two-fold course of action of the highminded, like that of a bunch of flowers. To be on the head of all or to wither away in a forest.

हिन्दी अनुवाद—फूल के गुच्छों की भाँति मनस्वियों की भी दो ही गतियाँ हैं। या तो सब लोगों के सिर पर चढ़े या वन ही में झुरा जाय॥ २७॥

व्याख्या—कुसुमस्तवकस्य पुष्पगुच्छस्य इव मनस्विनः धीरस्य द्वयी द्विविधा वृत्तिः व्यापारः। सर्वलोकस्य सर्वेषां जनानां मूर्ध्नि मस्तके उन्नतस्थाने तिष्ठति इति शेषः। अथवा वने अरण्ये एव शीर्यते जीर्यति। इयमेव पुंसां श्रेयस्करी वृत्तिः। पूर्णोपमालंकारः। अनुष्टुभ् वृत्तम्।

NOTES—1. कुसुमस्तवकस्य—कुसुमानां स्तवकः (ष० त०) तस्य कुसुमस्तवकस्येव "इवेनसह नित्यसमासः विभक्त्यलोपः"। अतः अत्र नित्यसमासः। विभक्ति is not dropped.

2. मनस्विनः—वृत्तियोगे कर्तरि षष्ठी by कर्तृकर्मणोः कृति ; मनस् + विन् = मनस्विन् ; "अस्मायामेधास्रग्विनिः"।

3. द्वयी वृत्तिः—We have "द्वे गतीति" in some editions. द्वौ अवयवौ यस्याः, "संख्यायाः अवयवे तयप्"। द्वित्रिभ्यां तयस्यायज्वा। द्वितीयम् or द्वयम्।

4. सर्वलोकस्य सर्वः लोकः जगत् तस्य। शेषे षष्ठी।

Digitization by Arya Samaj Charitable Foundation, Chennai

5. वने + एव = वन एव "लोपः शाकलस्य" अनेन यकारस्य लोपः ।

6. शीर्यते--शॄ दिवा-आत्म-शीर्यते wears away.

7. Similar idea. "नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा मूर्धनि स्थितिः न चरणैरवताडनानि" उ० च० ।

✓ सन्त्यन्येऽपि बृहस्पतिप्रभृतयः संभाविताः पञ्चषा-
स्तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते ।
द्वावेव ग्रसते दिवाकरनिशाप्राणेश्वरौ भास्वरौ
भ्रातः! पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः ॥२८॥

अन्वय :—अन्ये बृहस्पतिप्रभृतयः अपि पञ्चषाः संभाविताः सन्ति तान् प्रति एषः विशेषविक्रमरुचिः राहुः न वैरायते । भास्वरौ द्वौ दिवाकर-निशाप्राणेश्वरौ एव शीर्षावशेषाकृतिः दानवपतिः पर्वणि ग्रसते इति हे भ्रातः ! पश्य ।

Words—पञ्चषाः = five or six; विक्रम = valour, prowess. रुचि = interest, liking, taste, वैरायते = to declare hostility. भास्वर = bright, luminous; पर्वन् = the full-moon day and the new-moon day. शीर्षावशेषाकृति = whose head is the only remnant part of his body.

English Translation—There are even others, five or six honourable (planets), Brahaspati and others, but Ráhú, delighting in showing his valour, to distinguished enemies does not declare hostility towards them. See, brother, the lord of demons, with his head as the only remnant part of his body, devours only the two luminaries, the sun

Digitization by Arya Samaj Charitable Foundation, Chennai

and the moon on the new moon and the full-moon days.

हिन्दी अनुवाद—बृहस्पति आदि पाँच-छः और प्रतिष्ठित ग्रह भी आकाश में हैं पर अपना विशेष पराक्रम दिखलाने वाला राहु उन सबों से वैर नहीं करता। देखो भाई! यह दैत्यराज राहु जिसका मस्तक ही केवल बचा हुआ है अमावस्या और पूर्णिमा के दिन प्रकाशमान सूर्य और चन्द्रमा को ही ग्रसता (और किसी को नहीं) है ॥ २८ ॥

व्याख्या—अन्ये अपरे इतरे बृहस्पतिप्रभृतयः बृहस्पतिबुधशुक्रादयः पञ्चषाः पञ्च वा षड् वा संभाविताः बहुमताः ग्रहाः सन्ति। विशेषेषु तेजोगरिष्ठेषु विक्रमे रुचिः यस्य सः राहुः सैंहिकेयः वैरायते कलहं करोति। तेजिष्ठैः सहैव कलहायते। भास्वरौ तेजस्विनौ द्वौ उभौ दिवाकरनिशा प्राणेश्वरौ सूर्याचन्द्रमसौ एव शीर्षावशेषाकृतिः शिरोमात्रावशिष्टदेहः दानवपतिः दानवेश्वरः पर्वणि अमावस्यायां पूर्णिमायाम् च ग्रसते गिलति। हे भ्रातः! पश्य इदम्। पुरा किल देवानाममृतभोजनसमये विष्णुचक्रेण छिन्नमस्तकत्वात् शिरोमात्रावशिष्टदेहः अभूत् राहुः इति पौराणिकी कथात्रानुसंधेया। वृत्तं शार्दूलविक्रीडितम्। अप्रस्तुतप्रशंसालंकारः।

Notes :—1. बृहस्पतिप्रभृतयः—बृहस्पतिः प्रभृतिः येषां ते (ब० व्रो०) प्रभृति = femi. beginning with, commencement, when indeclinable, it is used as. अद्य प्रभृति, ततः प्रभृति बृहतां पतिः इति बृहस्पतिः। "तद् बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च"। By this त् of बृहत् is dropped & स् is added. So in तस्कर also.

2. पञ्च वा षट् वा इति पञ्चषट् + डच् = पञ्चषाः। संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये। अनेन बहुव्रीहिः। Then comes the rule बहुव्रीहौ संख्येये डच् अबहुगणात्—so डच् is added; पञ्चषट् + डच् = पञ्चषाः (डित्वात् टिलोपः) Why plural number in

Digitization by Arya Samaj Charitable Foundation, Chennai

पञ्चषाः ? why not singular ? "तत्र युक्तं बहुवचनम्" इति भाष्यकारः । तदपेक्षं बहुवचनमेव इति तत्त्वबोधिनी । see. सि० कौ० । तत्त्वबोधिनी calls such compound वार्थे बहुव्रीहिः ।

3. विशेषविक्रमरुचिः—(*a*) विशेषेषु तेजोगरिष्ठेषु विक्रमः (७ मी तत्) तस्मिन् रुचिः यस्य सः (ब० व्री०) । विशिष्यते इति विशेषः वि + शिष + अच् unusual, uncommon (*b*) विशेषः विक्रमः इति (कर्मधा०) ; विशेषविक्रमे रुचिः यस्य (ब० व्री०) having a liking for deeds of common valour. विशेषविक्रमरुचिः + राहुः ; "रो रि" इति रेकलोपे "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति दीर्घः ।

4. वैरायते—वैरं करोति ; वैर + क्यङ् । "शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे" इति क्यङ् ।

5. भास्वरौ—भास् + वरच् । "स्थेशभासपिसकसो वरच् ।

6. दिवाकर etc. :—प्राणानाम् ईश्वरः प्राणेश्वरः, (ष० त०) ; निशायाः प्राणेश्वरः (ष० त०) ; दिवाकरश्च निशाप्राणेश्वरश्च इति (द्वन्द्व) कर्म of ग्रसते । दिवा + कृ + टः = दिवाकरः, ट comes by the big rule दिवाविभा etc.,

7. दानवपतिः—दानवानां पतिः (ष० त०), दनोः अपत्यम् पुमान् दानवः = दनु + अण् । पा + डतिः = पतिः ।

8. शीर्षावशेषाकृतिः—शीर्षम् एव अवशेषः यस्याः सा शीर्षावशेषा (ब० व्री०) तादृशी आकृतिः यस्य सः (ब० व्री०) ।

ALLUSION :—When nectar that was churned out of the ocean was served to the gods, Rahu, attempted to drink it disguising himself as a god. The Sun and the Moon informed Vishnu of his fraud. At this, he cut off the demon Rahu's head with his discus. But by this time, the demon had tasted a little of

Digitization by Arya Samaj Charitable Foundation, Chennai

nectar, and so his head lived on. He is supposed to wreak vengeance on the two luminaries during eclipse when he devours them.

N. B.—Figure here is अप्रस्तुतप्रशंसा। राहु's action implies wicked man's action; which is being described here.

वहति भुवनश्रेणिं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स च धार्यते।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-
दहह! महतां निःसीमानश्चरित्रविभूतयः॥ २६॥

अन्वय :—शेषः फणाफलकस्थिताम् भुवनश्रेणिम् वहति । स च कमठपतिना मध्येपृष्ठम् सदा धार्यते । तम् अपि पयोधिः अनादरात् क्रोडाधीनम् कुरुते । अहह ! महताम् चरित्रविभूतयः निःसीमानः ।

Words—फणा = hood ; फलकम्—plank, board, तख़्ता । क्रोड = lap or Boar incarnation of Vishnu ; चरित्रविभूति = exuberance of character, चरित्रवैभव । निःसीमानः—unlimited, unbounded, सीमारहित ।

English Translation—Sesa bears the row of the worlds placed upon the flat surface of his expanded hoods. And he is held on his back by the Lord of the tortoise. Even him the ocean consigns with but scanty regard, to its lap (*i. e.* to the abyss of its water), or to the boar incarnation. Oh ! Unlimited is the exuberance of the character of the great.

हिन्दी अनुवाद—शेषनाग अपने विस्तृत फनों पर भुवनावली को ढोते, कच्छपराज इसको अपनी पीठ पर धारण करते, उसको भी

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रलय-समुद्र अनायास अपनी गोद में ले बैठता है। अहह ! बड़ों की चरित्र-महिमा असीम होती है ॥ २६ ॥

व्याख्या—शेषः शेषनागः फणाः स्फटाः सहस्रसंख्यकाः फणाः फलकानि इव तेषु स्थिताम् निहिताम् भुवनश्रेणिम् चतुर्दशलोकपङ्क्तिम् वहति धारयति। स च शेषः कमठपतिना आदिकूर्मेण मध्येपृष्ठम् पृष्ठ-मध्ये सदा धार्यते उह्यते। तम् अपि कमठपतिम् कच्छपदेवम् अपि पयोधिः समुद्रः अनादरात् अनायासात् क्रोडाधीनम् क्रोडे अधि, क्रोडः आदिवराहः तस्मिन् अधि कुरुते। अहह ! महताम् मानशौर्यशालिनाम् महानुभावानाम् चरित्रविभूतयः माहात्म्यसंपदः निःसीमानः निर्मर्यादाः अवाङ्मनसगोचराः सन्ति। अहह ! अद्भुतम् आश्चर्यम्। दीपकालंकारः। अर्थान्तरन्यासश्च। हरिणीवृत्तम्।

NOTES :—1. फणाफलकस्थिताम्—फणाः फलकानि इव (उपमित समास) तेषु स्थिताम् (७ मी तत्)।

2. कमठपतिना—कमठानाम् कच्छपानां पतिः इति (ष० त०) तेन "पति समास एव"—when at the end of a compound, पति is declined like मुनि ; not like its own original form पति।

3. मध्येपृष्ठम्—पृष्ठस्य मध्ये इति मध्येपृष्ठम्। "पारे मध्ये षष्ठ्याः वा" the words पार and मध्य are optionally compounded with a noun in genitive case forming an अव्ययीभाव। the final अ of these is irregularly changed to ए, "निपातनात् एदन्तत्वं चानयोर्निपात्यते। मध्येपृष्ठं मध्येपृष्ठे वा। असमासे मध्ये पृष्ठस्य।

4. पयोधिः—पयांसि धीयन्ते अस्मिन् इति पयस्+धा+किः "कर्मण्यधिकरणे च"।

5. अनादरात्—हेतौ पञ्चमी। न आदरः अनादरः (नञ् तत्); तस्मात्, आ+दृ+अप् (ग्रह वृद्द निश्चिगमश्च)।

Digitization by Arya Samaj Charitable Foundation, Chennai

6. क्रोडाधीनम्—अधि क्रोडे। "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी। अधिरीश्वरे" क्रोडे अधि becomes क्रोधाधि by सप्तमी शौण्डैः ; afterwards ख is added to it by अध्युत्तरपदात् इति खः। क्रोडाधि+ख=क्रोडाधि+इन=क्रोडाधीन ; ख changes to इन। The rule for adding ख is "अषडक्षाशितङ्ग्वलंकर्मालं-पुरुषाध्युत्तरपदात्खः"। ईश्वराधीनः ; नित्योऽयं खः। ख is necessarily added to a तद्धित ending in अधि।

7. निःसीमानः—निर् नास्ति सीमा यासां ताः निःसीमानः (*a*) निःसीमा like लता ; (*b*) निःसीमन् like आत्मन् fem. (*c*) निःसीम्नी these are the three forms in feminine of निःसीमन्।"

निःसीमानः—अवाङ्मनसगोचराः=are incomprehensible to mind and speech.

N. B.—Fig. of Sp. is मालादीपक in the first three lines, in the last line, we find अर्थान्तरन्यास।

वरं पक्षच्छेदः समदमधवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः।
तुषाराद्रेः सूनोरहह ! पितरि क्लेशविवशे
न चासौ संपातः पयसि पयसां पत्युरुचितः॥ ३०॥

अन्वय :—उद्गच्छद्बहुलदहनोद्गारगुरुभिः समदमधवन्मुक्तकुलिश-प्रहारैः तुषाराद्रेः सूनोः पक्षच्छेदः वरम्। अहह ! पितरि क्लेशविवशे सति पयसाम् पत्युः पयसि असौ संपातः न उचितः।

Words—उद्गच्छत्=rising, proceeding, उठता हुआ। बहुल=profuse, उत्कट violent (here) ; दहन=fire, उद्गार =outburst, गुरु=terrible, unbearable, भयानक। सूनु= son ; संपात=प्रवेश, entrance, plunge.

Digitization by Arya Samaj Charitable Foundation, Chennai

English Translation—Better it was for the son of the Himalaya to have his wings chopped off by the blows of the thunderbolt hurled down by proud Indra, the blow which was terrible on account of the outbursts of the violent rising fire. But alas! it was not proper for him to hide himself by plunging into the water of the lord of water (*i. e.* Ocean) when his father was subjected to torture.

हिन्दी अनुवाद—सगर्व इन्द्र के छोड़े हुए वज्र के प्रहार को पाकर—जो प्रहार अग्नि की बहुत चिनगारियों के छिटकने के कारण बहुत ही भयानक थे—मर जाना कहीं अच्छा था पर हिमालय के पुत्र का (मैनाक का) अपने विपद्ग्रस्त पिता को क्लेश में छोड़ कर समुद्र के जल में छिप कर बचना उचित नहीं था ॥ ३० ॥

व्याख्या—तुषाराद्रेः हिमालयस्य सूनोः पुत्रस्य मैनाकस्य उद्गच्छन् उज्जृम्भमाणः बहुलः भूयिष्ठश्च यो दहनः अग्निः शिलासंघर्षणजनितवह्निः. तस्य उद्गारैः निःसरणैः गुरुभिः दुःसहैः, समदः सदर्पः मघवा, तेन मुक्तः, कुलिशः वज्रः, तस्य प्रहारैः आघातैः, पक्षच्छेदः पक्ष-कर्त्तनम् वरम् । मनाक् प्रियम् । कुतः । अहह ! खेदे । पितरि हिमालये क्लेशेन वज्राघातजनित-दुःखेन विवशे विह्वले सति, पयसां पत्युः जलनिधेः पयसि जले संपातः प्रवेशः निलीय अवस्थानम्, न उचितः योग्यः । मानिनः स्वप्राणमात्ररक्षार्थम् क्वचित् निलीय अवस्थानम् अयशस्करम् । किमुत स्वपितरि क्लेशविह्वले सति । शिखरिणीवृत्तम् । अत्र उद्गारशब्दस्य गौणत्वात् न ग्राम्यता दोषः । प्रत्युत्सौन्दर्यमुत्पादयति ।

Notes :—1. तुषाराद्रेः—तुषारस्य अद्रिः or तुषारपूर्णः अद्रिः (मध्यपद लोपी स०)—शेषे षष्ठी ।

2. उद्गच्छद्बहुल etc.,—बहुलः दहनः इति बहुलदहनः (कर्मधा०) उद्गच्छन् बहुलदहनः इति उद्गच्छद्बहुलदहनः (कर्मधा०) ; तस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

उद्गाराः (ष० त०) तैः गुरवः (३ या तत्) ; तैः, Qual. प्रहारैः । उद्गार means Vomiting and so being vulgar (ग्राम्य) word should not be used in good composition. But उद्गार is used here in metaphorical sense of bursting out and not in its original sense of vomiting and so not ग्राम्य at all. "निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां व्यगाहते " इति दण्डी ।

3. समदः etc.—मदेन सह वर्तमानः इति समदः (तुल्य० ब० व्री०) समदः मघवा (कर्मधा०), तेन मुक्तः (३ या तत्) तादृशः कुलिशः (कर्मधा०) तस्य प्रहाराः (षष्ठी तत्) तैः करणे ३ या ; मद्+अप् (मदोऽनुपसर्गात्) ; मुच्+क्त (कर्मणि) ; प्र+हृ+घञ् ।

4. पितरि—भावे ७ मी ; क्लेशेन विवशः (३ या तत्) ; विगतः वशः यस्य सः विवशः (प्रादिभ्यः etc. ब० व्री०) ।

5. सम्+पत्+घञ्=संपातः । उच्+क्त=उचितः । In such a construction of वरम्, न च or न पुनः उचित is not usually used. The sense of उचित is conveyed by the construction itself.

Allusion :—In olden times, mountains had wings and so they used to fly. Indra lopped off their wings by hurling his bolt upon them. Many of the mountains saved themselves by hiding into the ocean. Menaka was one of them. It was not proper for him to save his own self when his father was being tortured so much by Indra. See Ramayan Sund. Kar. 1. 115—119.

Digitization by Arya Samaj Charitable Foundation, Chennai

यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥ ३१ ॥

अन्वय :—यत् अचेतनः अपि इनकान्तः सवितुः पादैः स्पृष्टः प्रज्वलति, तत् तेजस्वी पुरुषः परकृतनिकृतिम् कथम् सहते ।

WORDS—अचेतन=inanimate ; चेतन=sentient, animate. इनकान्त=sun-lens ; sun-gem. पाद-किरण=ray or foot, पैर, निकृति=insult, slight, अनादर, तिरस्कार ।

English Translation—Since even an inanimate sun-gem burns ablaze when touched with the rays (feet) of the sun, how can then a mettled or spirited man brook an insult, done by others ?

हिन्दी अनुवाद—जब कि अचेतन सूर्यकान्त भी सूर्यकिरण के छू जाने से जल उठता है, तब तेजस्वी पुरुष पर-कृत अपमान को कैसे सह सकता है ॥ ३१ ॥

व्याख्या—यत् यस्मात् कारणात् अचेतनः चेतनारहितः निर्जीवः अपि इनकान्तः सूर्यकान्तः सवितुः सूर्यस्य पादैः किरणैः चरणैः वा स्पृष्टः आक्रान्तः ताडितः सन् प्रज्वलति स्फुलिङ्गान् वमति । तत् तस्मात् कारणात् तेजस्वी तेजःशाली पुरुषः सचेतनः परैः शत्रुभिः कृतां, निकृतिम् निकारं निरादरम् अपकारं वा कथं सहते क्षमते ? न कथंचित् इति भावः । वृत्तम् आर्याभेदः । दृष्टान्तालंकारः ।

NOTES—1. अचेतनः—अविद्यमाना चेतना यस्य सः अचेतनः (ब० व्री०) नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः ।

2. इनकान्तः—इनेन सूर्येण कान्तः ; loved by the sun or इनस्य सूर्यस्य कान्तः प्रियः sun's beloved. A kind of lens which when subjected to sun-rays, begins to emit sparks of light.

Digitization by Arya Samaj Charitable Foundation, Chennai

3. पादैः स्पृष्टः—पाद is श्लिष्ट here. (*a*) पाद ray; touched by the rays of sun ; (*b*) पाद=foot, when kicked by foot. ; पादैः—करणे ३ या ।

4. यत् and तत् are co-relative terms. Since, then.

5. तेजस्वी—तेजः भूम्ना अस्यास्ति इति तेजस+विन् ; विन् is used to denote भूमन्, pre-eminence or plenty. "अस्माया-मेधास्रग्विनिः"—विनि is added to all words ending in अस् and to words माया, मेधा and स्नक् ।

6. परकृतनिकृतिम्—परैः कृता इति (३ या तत्) ; परकृता निकृतिः (कर्मधा०) ; ताम् । कर्मणि २ या नि+कृ+क्तिन्, निकारः ।

Cf. न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहते,
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः ।
मयूखैराक्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयग्रावा निकृत इव तेजांसि वमति ॥ उ० च० XI. 14.

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसां हेतुः ॥ ३२ ॥

अन्वयः—सिंहः शिशुः अपि मदमलिनकपोलभित्तिषु गजेषु निपतति । इयम् सत्त्ववताम् प्रकृतिः, वयः तेजसाम् हेतुः न खलु ।

Words—भित्ति=wall, दीवाल । कपोलभित्ति=wall-like massive broad cheek. सत्त्ववत्=बलवत्, valiant, the strong ; वयः=age ; तेजस्=energy, prowess, valour.

English Translation—The lion, though young, falls upon elephants whose rampart-like massive temples are sullied with ichor ; this is the nature of the valiant. Age is not, indeed, the cause of valour.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—सिंह का बच्चा भी मदमत्त हाथियों के मस्तक ही पर हमला करता है। सत्त्वशालियों का यह स्वभाव ही है। उमर सचमुच तेज का कारण नहीं होती॥ ३२॥

व्याख्या—सिंहः शिशुः बालः अपि यदासौ स्वविक्रमप्रदर्शनस्य अयोग्यः अस्ति। मदेन दानजलेन मलिना म्लाना पङ्किला कपोलभित्तयः गण्डस्थलानि येषां, तेषु गजेषु मत्तमातङ्गेषु निपतति आक्रामति कुम्भस्थल-विदारणार्थम् इति भावः। इयम् बाल्ये अपि विक्रमप्रदर्शनम्, सत्त्ववताम् बलवताम् प्रकृतिः स्वभावः। अस्ति। कुतः, वयः अवस्था तेजसाम् प्रताप-विक्रमादीनां हेतुः कारणम् न भवति खलु। यथा कालिदासः "तेजसां हि न वयः समीक्ष्यते" Raghu. XI.

NOTES :—1. शिशुः अपिः—The lion, though young attacks elephants. In its childhood, the young lion is not capable of fighting with elephants, still he attacks elephants and never jackals or small beasts.

2. मदमलिन etc. :—मदेन दानजलेन मलिना (३ या तत्); मदमलिनाः कपोलभित्तयः येषां ते (ब० व्री०) तेषु; Qual. गजेषु। (*a*) कपोलाः भित्तयः इव इति (उपमित स०)। (*b*) प्रशस्ताः कपोलाः इति कपोलभित्तयः excellent temples, massive & big temples. मल्लिनाथ has quoted गणरत्नमहोनिधि in his commentary on Ragh. V. 43. "मतल्लिककोद्धमिश्राः स्युः प्रकाण्डस्थलभित्तयः" Kale.

3. गजेषु—सप्तमी अधिकरणे, आधारे अधिकरणम्; आधार of निपतति।

4. सत्त्ववताम्—सत्त्वम् बलम् अस्यास्ति इति सत्त्व+मतुप्; म् of मतुप् changes to व by "मादुपधायाः मतो वः अयवादिभ्यः"।

5. वयसः—अज्+असुन्; अज् changes to वी; वी+अस्= वयस्।

Digitization by Arya Samaj Charitable Foundation, Chennai

Says Kalidasa in रघु० XI. 1. " तेजसां हि न वयः समीक्ष्यते "
Else where. तेजसा सहजातानां वयः कुत्रोपयुज्यते ।

अथार्थपद्धतिः ।

जातिर्यातु रसातलं गुणगणस्तत्राप्यधो गच्छतां
शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना ।
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ताः इमे ॥ ३३ ॥

अन्वय :—जातिः रसातलम् यातु, गुणगणः तत्रापि अधः गच्छताम् शीलं शैलतटात् पततु, अभिजनः वह्निना संदह्यताम् । वैरिणि शौर्ये आशु वज्रम् निपततु, नः अर्थम् केवलम् अस्तु । एकेन येन विना इमे समस्ताः गुणाः तृणलवप्रायाः सन्ति ।

Words—रसातल = nether region or world ; शील = character. अभिजन = उच्चकुल, सुवंश, noble ancestry, high lineage. आशु = शीघ्र, soon, instantly. तृणलवप्राय = almost like a particle of straw, लव = कण, टुकड़ा particle.

English Translation—Let caste go to the nether region ; let the assemblage of virtues sink lower still ; let character fall from the side of a mountain ; let noble ancestry be burnt with fire ; let bolt fall at once upon the inimical heroism ; let us have only wealth ; without which alone, all these merits are almost like a particle of straw.

हिन्दी अनुवाद—जाति रसातल चली जाय, गुण-समूह उससे भी नीचे चला जाय, शील पर्वत-तट पर से जा गिरे, उच्च वंश आग में जल

Digitization by Arya Samaj Charitable Foundation, Chennai

जाय, शत्रु-तुल्य वीरता पर शीघ्र वज्र पड़े, हमें सिर्फ धन हो, जिस एक के विना ये सारे गुण तृणवत् हैं ॥ ३२ ॥

व्याख्या—जातिः ब्राह्मणत्वादिः रसातलम् अधोलोकं वा गच्छतु यातु। भ्रश्यतु इति भावः। गुणगणः दयादाक्षिण्यादिगुणसमूहः तत्रापि रसातालादपि अधः नीचैः पाताललोकम् गच्छताम् यातु। नश्यतु। शीलं सद्वृत्तं सच्चरित्रम् शैलतटात् गिरिपर्वततटात् पततु। विशीर्णं भवतु इत्यर्थः। अभिजनः उच्चवंशः सुवंशः वह्निना अग्निना संदह्यताम् भस्मीक्रियताम्। वैरिणि संक्षोभकारित्वात् शत्रुतुल्ये शौर्ये शूरत्वमूर्ध्नि वीरत्वशिरसि आशु शीघ्रम् वज्रम् अशनिः कुलिशम् निपततु। वज्रपातेन शौर्यमपि विध्वस्तं भवतु इति भावः। एतेषां गुणानां नाशेऽपि न काचिदपि अस्माकं हानिः स्यात्। तथापि किं युष्माकं वाञ्छितम्? इति अतः आहुः। नः अस्माकम् अर्थः धनं केवलम् अस्तु संभवतु। वयं केवलं धनमेव काङ्क्षामः इति अर्थः। एकेन केवलेन येन अर्थेन विना इमे पूर्वोक्ताः समस्ता सर्वे गुणाः जातिकुलशीलादयः तृणलवप्रायातृण कल्पाः। तृणवत् निःसाराः सन्ति इत्यर्थः। "धनमर्जय काकुत्स्थ" धनमूलमिदं जगत्। अन्तरं नाभिजानामि निर्धनस्य मृतस्य च" इत्युक्तं रामायणे। "हेतौ वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते"—काव्यलिंगालंकारः। शार्दूलविक्रीडितम्।

NOTES :—1. जातिर्यातु—The main idea of this verse is that all these qualities are insignificant when compared with wealth. If one has wealth, he has all the virtues, सर्वे गुणाः काञ्चनमाश्रयन्ते।

2. रसातलम्—The fourth of the seven regions below. The earth tenanted by नागs. The seven regions are—अतल, वितल, सुतल, रसातल, तलातल, महातल and पाताल। रसायाः तलम् इति (ष० त०)।

3. गच्छताम्—गम्लृ to go is always परस्मैपदी। Here

Digitization by Arya Samaj Charitable Foundation, Chennai

used in आत्मनेपद for the sake of metre or 'कवीनां निरंकुशत्वात् आत्मने पदम् ।'

4. शीलम्—good conduct, character. In Buddhistic time, शील played a very important part in man's life. It was very much emphasised on. It is an oft occurring word in भर्तृहरि's composition.

5. वैरिणि शौर्यैः—अधिकरणे ७ मी । शौर्य=शूरस्य भावः शूर+ष्यञ् । वैर+इनि=वैरिन् । शौर्य is called here वैरिन् as bravery often proves an obstacle in the way of earning money. A brave fellow will never stoop so low to mean acts as is sometimes required in earning wealth.

6. शैलतटात्—अपादाने पञ्चमी ;

7. वह्निना—अनुक्ते कर्त्तरि ३या of संदह्यताम् सम्+दह्+कर्मणि यक्+लोट् ताम् ।

8. नः अर्थः अस्तुः—नः—सम्बन्धे षष्ठी ।

9. येनः—पृथग्विनानानाभिः तृतीयान्यतरस्याम् । विनायोगे ३ या ।

10. तृणलवप्रायाः—(I) तृणस्य लवः तेन तुल्याः तृणलवप्रायाः नित्य समासः or (II) प्रायेण भूम्ना तृणलवः इति सुप्सुपेति समासः । प्रायो बाहुल्यतुल्ययोरिति मेदिनी प्रायः mas. has two meanings ; majority, almost. In this sense the word is often used at the end of an adjectival compound and is translated by, in majority of cases, 'for the most part' or almost ; abounding in, as in जलप्रायो देशः, a country abounding in water, मृतप्रायः almost dead *e. g.* प्रायेण भूम्ना मृतः dead for the most part. सुप्सुपासमासः See. sloka. 23. Ibid.

Digitization by Arya Samaj Charitable Foundation, Chennai

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान्गुणज्ञः।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ते ॥ ३४ ॥

अन्वय :—यस्य वित्तम् अस्ति स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः स एव वक्ता स दर्शनीयः च ; सर्वे गुणाः काञ्चनम् आश्रयन्ते ।

Words—कुलीन=of noble birth ; noble-born , high-born ; गुणज्ञ=appreciator of merits ; दर्शनीय=handsome beautiful to look at ; श्रुतवान्=one having श्रुतम्=information or well-versed in Sastras, शास्त्रज्ञ ।

English Translation—The man who has wealth, is regarded noble born. He is learned, he is 'well-versed in Sastras ; and is an appreciator of merits, he alone is an orator and he is handsome. All virtues depend upon or cling to gold.

हिन्दी अनुवाद—जिसको धन है वही मनुष्य कुलीन है, वही पण्डित है, वही शास्त्रज्ञ है, वही गुणज्ञ है। वही वक्ता है, वही सुन्दर है। सोने ही में सब गुण रहते हैं ॥ ३४ ॥

व्याख्या—यस्य वित्तं धनम् अस्ति यो धनी अस्ति इति भावः। स नरः कुलीनः महाकुल प्रसूतः। स एव पण्डितः विद्वान्, स एव श्रुतवान् शास्त्रज्ञः स एव गुणज्ञः गुणग्राही। स एव वक्ता वाग्मी, स एव दर्शनीयः सुन्दरः। उक्तगुणराहित्ये अपि तत्तद्गुणवान् इति भावः। सर्वे गुणाः काञ्चनम् स्वर्णं धनम् आश्रयन्ते । उपजातिवृत्तम् । अतिशयोक्तिः अलंकारः। वित्तात् कुलीनत्वादिगुणाः, अतः काव्यलिंगम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

NOTES :—1. वित्तम्—विद्+क्त (भावे) नपुंसके भावे क्तः। विद्=लाभे विन्दति "वित्तो भोगप्रत्यययोः" वित्तं धनम्। वित्तः विदितः वा पुरुषः।

2. कुलीनः—कुल+खः (कुलात्खः)।

3. यस्य वित्तम अस्ति—यस्य has संबन्धे षष्ठी।

4. श्रुतवान्—(*a*) शास्त्रज्ञः। श्रुतं श्रवणम् 'नपुंसके भावे क्तः' तदस्यास्तीति श्रुतवान् ज्ञानसंपन्नः।

5. गुणज्ञः—(*a*) गुणानां ज्ञः (षष्ठी तत्); जानाति इति ज्ञा+कः=ज्ञः "इगुपधज्ञाप्रीकिरः कः"। (*b*) गुणान् जानाति इति गुण+ज्ञा+कः=गुणज्ञः (उपपदसमासः); आतोऽनुपसर्गे कः।

6. दर्शनीयः—दृश्+अनीयर्। पश्यति ददर्श, अद्राक्षीत् or अदर्शत्।

7. आश्रयन्ते—आङ्+श्रि (उभ०)+लट्० ते। आश्रयते or आश्रयति—

8. अतिशयोक्तिः अलंकारः। काव्यलिङ्गञ्च, कथं धनिकस्य एतावन्तः गुणाः? "सर्वे गुणाः काञ्चनमाश्रयन्ते"—gives the reason.

9. Parallel lines :—"यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः। यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः" etc.,

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः संगात्सुतो लालना-
द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात्।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया-
न्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागप्रमादाद्धनम्॥ ३५॥

अन्वय :—नृपतिः दौर्मन्त्र्यात्, यतिः संगात्, सुतः लालनात्, विप्रः अनध्ययनात्, कुलं कुतनयात्, शीलम् खलोपासनात्, ह्रीः मद्यात्,

Digitization by Arya Samaj Charitable Foundation, Chennai

कृषिः अनवेक्षणात्, स्नेहः प्रवासाश्रयात्, मैत्री अप्रणयात्, समृद्धिः अनयात्, त्यागप्रमादात् धनम् विनश्यति ।

WORDS—दौर्मन्त्र्य=ill-advice ; evil counsel. कुमंत्रणा से । यति =hermit, लालन=fondling, indulgence. खल= wicked, ruffian, दुष्ट । उपासन (here) संगति, association ; ह्री=modesty, shame, लज्जा । अनवेक्षण =न देखभाल ; न+ अवेक्षण =not looking after ; अप्रणय=अ not, प्रणय courtesy, want of courtesy or attachment. अनय = बे-इन्साफी । impolitic conduct ; impudence. त्याग-प्रमाद= carelessness in expenditure, indiscretion in expenditure, खर्च में लापरवाही ।

English Translation—A king is ruined on account of evil counsel ; a hermit on account of attachment (to worldly pleasures) ; a son owing to over-indulgence ; a Brahman for want of (Vedic) study ; a family owing to a bad son ; good character, because of the association with the wicked ; modesty owing to wine ; agriculture for want of proper attention ; affection owing to living abroad ; friendship for want of mutual attachment (courtesy) ; prosperity on account of bad policy ; and wealth owing to carelessness in expenditure.

हिन्दी अनुवाद—कुमंत्रणा से राजा का नाश होता है, आसक्ति से यति का दुलार, करने से पुत्र का और शास्त्र का अध्ययन न करने से ब्राह्मण का, बुरे पुत्र से वंश का और दुष्टों की संगति से शील का नाश होता है । मद्य-पान करने से लाज जाती रहती है, अपने से नहीं देखने से खेती चौपट हो जाती है, विदेश में रहने से स्नेह का नाश हो

Digitization by Arya Samaj Charitable Foundation, Chennai

जाता है, परस्पर अनुराग न दिखाने से दोस्ती नष्ट हो जाती है. अन्याय से समृद्धि का नाश होता है और खर्चदारी में लापरवाही करने से धन का नाश हो जाता है ॥ ३५ ॥

व्याख्या—नृपतिः राजा दौर्मन्त्यात् दुर्मंत्रणाहेतोः दुष्टः मन्त्रः षाडगुण्यचिन्तनं यस्य, स दुर्मन्त्रः तस्य भावः दौर्मन्त्यम्, तस्मात् हेतोः हेतौ पञ्चमी। विनश्यति नष्टो भवति। परै राज्यापहरणात्। "दुर्मन्त्री राज्यनाशाय" इति न्यायात्। यतिः योगी संगात् विषयवासनासक्तिहेतोः भ्रष्टयोगः भवति इति अर्थः। सुतो लालनात् अतिप्रेमप्रदर्शनात् नश्यति गुणहीनो भवति। "लालनाद्बहवो दोषास्ताडनाद्बहवोगुणाः। तस्मात्पुत्रं च शिष्यं च ताडयेन्न तु लालयेत्"। विप्रः ब्राह्मणः अनध्ययनात् वेदशास्त्राध्ययनाभावात् नश्यति। कुलं वंशः कुतनयात् कुपुत्रात् नश्यति। "कुपुत्रस्तु कुले जातः स्वकुलं नाशयेत्परम्" इति वचनात्। शीलं सच्चरित्रं खलानाम् दुष्टानाम् उपासनात् संसर्गात् नश्यति। खलाः अनर्थमूलम्। ह्रीः लज्जा विनयः वा मद्यात् सुरापानात् मादकवस्तुव्यवहारात् वा नश्यति। कृषिः सस्यम् अनवेक्षणात् अपरामर्शात् नश्यति। स्नेहः मातृपुत्रदारादिषु प्रेम प्रवासाश्रयात् देशान्तरवासात् नश्यति। मैत्री मित्रता अप्रणयात् अनुरागप्रदर्शनाभावात् नश्यति। समृद्धिः उन्नतिः संपत्तिवृद्धिः अनयात् अन्यायात् नीतिराहित्यात् नश्यति। धनं त्यागप्रमादात्। त्यागे व्यये प्रमादात् अनवधानतया नश्यति। दीपकालंकारः, विनश्यति इति सामान्यधर्माभिसंबंधात्। शार्दूलविक्रीडितम् वृत्तम्।

NOTES :—1. 'नृपतिः—नॄणां पतिः (ष० त०); पा + डतिः = पतिः।

2. दौर्मन्त्यात्—दुष्टःमन्त्र यस्य सः दुर्मन्त्रः (a bad minister). तस्य भावः। दुर्मन्त्र + ष्यञ् = दौर्मन्त्यम्। तस्मात्। हेतौ ५मी। All words in पञ्चमी विभक्ति have हेतौ ५मी in this verse.

3. अनध्ययनात्—न अध्ययनम (नञ् तत्) तस्मात्। "वेदवेदाङ्ग तत्त्वज्ञः विप्रः सर्वत्र पूज्यते ; अनधीतश्रुतिः विप्रः सभामध्ये न शोभते"।

Digitization by Arya Samaj Charitable Foundation, Chennai

4. कुतनयः—कुत्सितः तनयः (कर्मधा०) तस्मात् । हेतौ ५मी ; तनोति विस्तारयति कुलमिति तनयः, तन्+कयन् (अय) उणादिः ।

5. खलोपासनात्—On account of propotiating or associating with the wicked. उपासन = worship ; here metaphorically, associating with.

6. अनवेक्षणात्—न अवेक्षणम् (नञ् तत्) तस्मात् । A practical wisdom, indeed ! Agriculture suffers much for want of personal supervision.

7. अप्रणयात्—If one does not show his attachment for his friends, then certainly he loses his friendship.

8. त्यागप्रमादात्—त्यागे व्यये प्रमादः अनवधानता, तस्मात् ; (७मी तत्) ; त्यज्+घञ् ; प्र+मद+घञ् । 'त्यागात्प्रमादात्' also is seen, then the meaning will be त्यागात्, on account of lavish charity, and on account of प्रमाद carelessness ; But the first reading is preferable.

9. दीपकालंकारः—means connection of प्रस्तुत and अप्रस्तुत objects with the same property (समानधर्माभिसंबन्ध). Here all अप्रस्तुत, with one प्रस्तुत (धनम्) are connected with विनश्यति—the common action. So दीपकम् ।

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥३६॥

अन्वय :—दानं भोगो नाशः वित्तस्य तिस्रः गतयः भवन्ति । यः न ददाति न भुङ्क्ते तस्य (वित्तस्य) तृतीया गतिः भवति ।

English Translation—Charity, enjoyment, and destruction are the three courses of passing away of wealth. He, who does neither give nor enjoy, has

Digitization by Arya Samaj Charitable Foundation, Chennai

only the third course (destruction) left for his wealth.

हिन्दी अनुवाद—धन की तीन ही गतियाँ होती हैं—दान, भोग और नाश। जो नहीं देता और नहीं खाता है उसके धन की तो तीसरी ही गति होती है ॥३६॥

व्याख्या—दानं सत्पात्रे व्ययः, भोगः सम्पत्तिजन्मसुखानुभवः, नाशः चौरादिना अपहरणम्—वित्तस्य धनस्य तिस्रः गतयः गमनोपायाः भवन्ति। यः पुमान् न ददाति अर्थिभ्यः न प्रयच्छति, न भुङ्क्ते न स्वयमेव धनसुखोपभोगं करोति तस्य पुंसः वित्तस्य तृतीया गतिः नाशलक्षणा गतिः भवति। अतः धनाढ्येन दानभोगपरेण भवितव्यम्। आर्याभेदः।

NOTES:—1. गतयः—Courses of passing away, ways of going away. Wealth passes away in these three ways.

2. वित्तस्य विद्लृ लाभे विन्दति, विद् + क्त (भावे) वित्तं धनम्।

3. यः वित्तं न ददाति न भुङ्क्ते—वित्तं should be added here. भुङ्क्ते—आत्मनेपदम्, भुजोऽनवने, भुङ्क्ते भोजनम्; भुनक्ति महीं राजा।

4. तस्य is connected with वित्तस्य = which is understood here. तस्य सम्बन्धे षष्ठी।

Remember—"चत्वारो धनदायादाः धर्माग्निनृपतस्कराः
तेषां ज्येष्ठावमानेन त्रयः कुप्यन्ति सोदराः"

मणिः शाणोल्लीढः समरविजयी हेतिदलितो
मदक्षीणो नागः शरदि सरिदाश्यानपुलिना।
कलाशेषश्चन्द्रः सुरतमृदिता वालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ॥३७॥

अन्वयः—शाणोल्लीढः मणिः, हेतिदलितः समरविजयी, मदक्षीणः

Digitization by Arya Samaj Charitable Foundation, Chennai

नागः, शरदि आश्यानपुलिना सरित्, कलाशेषः चन्द्रः, सुरतमृदिता बालवनिता, अर्थिषु गलितविभवाः नराः च, तनिम्ना शोभन्ते ।

Words—शाण—whetting-stone, grind-stone ; उल्लीढ =चिकनाया हुआ, polished ; हेति = weapon, missle अस्त्र, वाण क्षीण =emaciated ; आश्यान =shrunken, a little-dry ; पुलिन =sandy beach सैकत । सुरत =dalliance, amorous sport ; मृदित = trampled down ; तनिमन् =slenderness ; पतलापन । विभव = wealth, धन ।

English Translation—A gem polished on a whetting-stone ; a war•victor wounded with weapons, an elephant emaciated on account of rutting, a river with her sandy beach shrunken in autumn, the moon with his only digit left, a damsel languished in amorous sports, and men whose wealth is showered on the supplicant—all these look beautiful by their slenderness.

हिन्दी अनुवाद—शान पर चिकनाया हुआ मणि, शस्त्राहत समर विजयी योधा, मद चूने के कारण क्षीणकाय हाथी, शरद् काल में सिंकुड़ी हुई नदी, दूज का चाँद, सुरत में मसली हुई नवयुवती और दान देते देते जिनकी सम्पत्ति कम हो गई है ऐसे दानी पुरुष ये सब क्षीणता ही के कारण शोभते हैं अर्थात् क्षीण होने ही से ये सब शोभते हैं ॥३७॥

व्याख्या:—शाणः शस्त्रतेजनसाधनप्रस्तरखण्डम् तेन उल्लीढः तत्र घर्षणेन उत्तेजितः मणिः रत्नं च । हेतिभिः शस्त्रैः दलितः क्षतविक्षतः समरविजयी रणशूरश्च । मदेन दानजलवर्षणेन क्षीणः कृशः नागः गजः च । शरदि शरत्काले आश्यानानि ईषच्छुष्कानि पुलिनानि सैकतानि यस्याः सा ईषच्छुष्कसैकता सरित् नदी च । कलाशेषः षोडशांशमात्रावशिष्टः

Digitization by Arya Samaj Charitable Foundation, Chennai

चन्द्रश्च । सुरतेन रतिक्रीडया मृदिता लुलिता बालवनिता मुग्धाङ्गना च । तथा अर्थिषु विषये गलितविभवाः दत्तधनाः व्यपगतघनाः नराः दातारः दातृजनाः तनिम्न । तनुत्वेन शोभन्ते । एवंभूता तनुता तेषां शोभाहेतुः । दीपकालंकारः । शिखरिणी वृत्तम् ।

NOTES :—1. शाणोल्लीढः—शाणेन उल्लीढः निशितः sharpened (३या तत्) शाण – whetting-stone ; उत् लीढ = उल्लीढः by "तोर्लि" त् followed by ल changes to ल" । लिह् + क्त (कर्मणि) = लिढ् + क्त = लिढ् + ढ = लीढ, the first ढ is dropped and the vowel before it is lengthened by "ढ्रलोपे पूर्वस्य दीर्घोऽणः" । लेढि, लिलेह, अलिक्षत् ।

2. हेतिदलितः—हेतिभिः शस्त्रैः दलितः इति (३या तत्) हेति is masculine ; दल् + क्त (कर्मणि) ।

3. समरविजयी = समरं विजेतुं शीलं यस्य समर + वि + जि + णिनिः (ताच्छील्ये) । (उपपद तत्) । "सुप्यजातौ णिनिः ताच्छील्ये" । वि + जि is आत्मनेपद by विपराभ्यां जेः । विजयते, पराजयते ।

4. मदक्षीणः—मदेन क्षीणः (३या तत्) ; मद् + अप (मदोऽनुपसर्गात् अप) ; क्षि + क्त = क्षी + क्त = क्षीणः "क्षियो दीर्घात्" ; —or क्षित also.

5. आश्यानपुलिना—आश्यानानि पुलिनानि यस्याः सा (व० व्रो०) श्यै + क्त = श्यान (shrunken). शीन (frozen) or शीत (cold) "द्रव्यमूर्त्तिस्पर्शयोः श्यः"—According to this, संप्रसारण takes place in श्यै to denote "freezing and touching" श्यै + क्त = शीनं घृतम्, शीतः वायुः ; क्त changes to न by श्योऽस्पर्शे in a sense other than touching & so शीत has no न but त । श्यानः वृश्चिकः शैत्येन contracted, shrunken. श्यान means, contracted or gone.

Digitization by Arya Samaj Charitable Foundation, Chennai

Floods subsiding in autumn, the rivers shrink into their proper beds and look beautiful with their limpid water, *cf.* भट्टिकाव्यम् II. I.

6. कलाशेषः—कला एव शेषः यस्य सः (ब० व्री०) कला तु षोडशो भागः इत्यमरः। Such a moon is beautiful and worshipable *cf.* "पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः" रघु V. 16. पितृ or manes drink in turns the nectar of the moon, so its waning.

7. अर्थिषु—अर्थयते इति अर्थ् + णिनिः = अर्थिन्, विषयाधिकरणे ७मी०।

8. गलितविभवाः—गलितः विभवः येषां ते (ब० व्री०)।

9. तनिम्ना—करणे ३या ; तनु + इमनिच् = तनिमन् mas. like गरिमन्।

10. "शोभन्ते is the common attribute mentioned with regard to नराः (प्रकृत-matter) & with respect to मणि etc. (अप्रकृत-matters); hence दीपकालंकारः, सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतानां दीपकम्" K. P. X.

परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये
स पश्चात्संपूर्णः कलयति धरित्रीं तृणसमाम्।
अतश्चानेकान्ता गुरुलघुतयार्थेषु, धनिना-
मवस्था वस्तूनि प्रथयति च संकोचयति च ॥३८॥

अन्वयः—कश्चित् (धनिकः) परिक्षीणः सन् यवानाम् प्रसृतये स्पृहयति, स पश्चात् संपूर्णः सन् धरित्रीम् तृणसमाम् कलयति, अतः अर्थेषु गुरुलघुतया अनेकान्ता च। धनिनाम् अवस्था वस्तूनि प्रथयति च संकोचयति च।

Words—परिक्षीण = emaciated, hence completely poverty-stricken ; प्रसृति = the hollow of the palm when

Digitization by Arya Samaj Charitable Foundation, Chennai

it is bent, a handful ; निकुब्जः पाणिः । कलयति to consider, to regard ; अनेकान्ता = uncertainty, non fixity अस्थिरता। एकान्त = invariable, perpetual.

English Translation—A man in straitened circumstances aspires for a handful of barley, but when afterwards he is full (of wealth), he regards the whole earth as a straw. Hence there is no fixity, regarding largeness and smallness of the objects. The state of the rich magnifies and minimises the things.

हिन्दी अनुवाद—तंगदस्ती की हालत में मनुष्य एक मुट्ठी जौ के लिये भी ललाता रहता है, फिर वही आदमी जब धन धान्य से परिपूर्ण हो जाता है तो सारी पृथ्वी को तृण के समान समझता है। अतः पदार्थों की लघुता और गुरुता के विषय में कोई स्थिरता नहीं। धनिकों की अवस्था ही पदार्थों को बड़ा या छोटा बनाती है॥३८॥

व्याख्या—कश्चित् पुमान् परिक्षीणः, अकिञ्चनः क्षीणवित्तः सन् यवानां प्रसृतये प्रसृतिमात्रयवेभ्यः स्पृहयति गुरुतया काङ्क्षति। स एव परिक्षीणः पुमान् पश्चात् अनन्तरम् संपूर्णः धनसंपन्नः सन् धरित्रीम् पृथिवीम् तृणसमाम् तृणतुल्याम् कलयति मन्यते। धनमदेन तथा पश्यति इत्यर्थः। अतः अस्मात् हेतोः अर्थेषु वस्तुषु गुरुलघुतया महत्त्वाल्पत्वभावेन अनेकान्ता अप्रतिनियता। सर्वथा गुरूणि वस्तूनि गुरुत्वं लघूनि वस्तूनि लघुत्वमेव याति इति नियमस्य अभाव इत्यर्थः। धनिनाम् अवस्था सुदशा कुदशा वा वस्तूनि प्रथयति विस्तारयति च संकोचयति संकीर्णानि करोति च। नीचदशायाम् अल्पमपि वस्तु महत् भाति, उच्चदशायां महत् अपि वस्तु अल्पं प्रतिभाति। क्षीणदशा लघ्वपि वस्तु गुरूकरोति, संपन्नावस्था गुरु अपि वस्तु लघूकरोति इतिभावः। अतः विवेकिना सर्वदा समबुद्धिना भवितव्यम्। शिखरिणी वृत्तम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

NOTES :—1. परिक्षीणः—Reduced to straitened circumstances. परि + क्षि + क्त, क्षियो दीर्घात् ।

2. प्रसृतये = निकुब्जः पाणिः the hollow of the bent palm, or handful. "स्पृहेरीप्सितः" अनेन संप्रदाने ४थी ।

3. संपूर्णः—full of wealth ; सम् + पॄ + क्त ; opp. to परिक्षीण (emptied).

4. कलयति = considers, regards ; "कलिवली कामधेनू" these two roots can have all sorts of meanings according to the context.

5. तृणसमाम्—तृणेन समा (३या तत्) ताम् ।

6. अतः—Hence, because of the fact mentioned above.

7. अनेकान्ताः—न एकान्ता अनेकान्ता । एकः अन्तः यस्याः सा एकान्ता—Does it refer to सीमा ? There is no one end or limit to objects with respect to their largeness and smallness. These last two lines have been differently interpreted by commentators. The sense is that since there is no invariability regarding the greatness and the smallness of the same things, so it must be concluded that it is the state of the wealthy which causes the things to appear so.

8. संकोचयति—सम् + कुच् + णिच् लट् ति । कुच् संकोचने कुचति, चुकोच अकोचीत् ।

9 अवस्थाः—अव + स्था + अङ् + स्त्रियां टाप् " आतश्चोपसर्गे अङ्" ।

10. गुरुलघुतया—गुरु च लघु च गुरुलघु, तयोः भावः गुरुलघुता, तया । हेतौ ३या ।

Digitization by Arya Samaj Charitable Foundation, Chennai

राजन् ! दुधुक्षसि यदि क्षितिधेनुमेनां
तेनाद्य वत्समिव लोकममुं पुषाण।
तस्मिंश्च सम्यगनिशं परिपुष्यमाणे
नानाफलं फलति कल्पलतेव भूमिः ॥३६॥

अन्वयः—हे राजन् ! यदि एनाम् क्षितिधेनुम् दुधुक्षसि, तेन अद्य-अमुम् लोकम् वत्सम् इव पुषाण। तस्मिन् च अनिशम् सम्यक् परिपुष्यमाणे भूमिः कल्पलता इव नानाफलम् फलति।

WORDS—दुधुक्षसि – दोग्धुमिच्छसि Thou desirest to milk. पुषाण = पुष् to nourish ; लोट् हि। कल्पलता = A fabulous creeper granting all desires.

English Translation—O King, if you desire to milk this cow-like earth, then nourish (enrich) now the people like a calf. When the people is always nourished (enriched) well, the earth, like the Kalpa-tree, bears fruits of various kinds.

हिन्दी अनुवाद –हे राजन् ! यदि आप इस पृथ्वीरूपी धेनु को दुहना चाहते हैं तो बछरे के समान लोगों को अब पोसो। जब यह अच्छी तरह से पाली-पोसी जायगी तो यह पृथ्वी कल्प-वृक्ष की जैसी वहुत फल फलेगी ॥३६॥

व्याख्या– हे राजन् ! नृप ! यदि। त्वम् इति शेषः। एनाम् एताम् क्षितिः धेनुः इव भूधेनुम् दुधुक्षसि दोग्धुमिच्छसि। अर्थम् इति शेषः दुह्यादेः द्विकर्मकत्वात्। तर्हि तेन हेतुना अद्य इदानीम् लोकम् जनम् वत्सम् गोवत्सम् तर्णकम् इव पुषाण पोषय। वत्सनाशे क्षीरनाशः, लोकनाशे नृपस्य अर्थनाशः इतिभावः। तस्मिन् लोके अनिशम् सर्वदा सम्यक् सुचारुरीत्या परिपुष्यमाणे परिपाल्यमाने सति भूमिः क्षितिः राज्यम् कल्पलता इव कल्पवृक्षशाखा इव नानाफलम् बहुविधफलम् फलति निष्पादयति। अत्र उपमाद्वयम् लभ्यते। वृत्तं वसन्ततिलकम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

NOTES:—1. एनाम्—एन is an अन्वादेश, for इदम् and एतत् in द्वितीया all numbers तृतीया singular and षष्ठी and सप्तमी dual numbers only "द्वितीया टौस्स्वेनः" But there is no इदम् or एतत् previously used here then how its substitute? अतः "अत्रान्वादेशाभावादेनादेशश्चिन्त्यः" इति The best solution is to accept एन a different pronoun used in the sense of इदम्। as भरत has used in commenting on Bhatti Can. II. 21. Moreover see "जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः" Kirat. III. 14.

2. क्षितिधेनुम्:—क्षितिः धेनुः इव (उपमितसमास), ताम्। We can't expound it as क्षितिः एव धेनुः इति as मयूरव्यंसकादित्वात् रूपकरूपसमासः because वत्समिव clearly shows that here is an उपमालंकारः and so we can't have रूपकसमास।

3. दुधुक्षसि—दोग्धुम् इच्छसि दुह्+सन्+लट् II. s. दुह् is a द्विकर्मक root; but here it has only one object. Supply अर्थम् as its प्रधानकर्म।

4. तेन—equivalent to तर्हि। इया हेतौ।

5. पुषाण—पुष् लोट् हि II. S. क्र्यादि पुष्णाति पुपोष, अपोषीत्।

6. नानाफलम्—नाना बहुविधं फलम् इति सुप्सुपेति समासः। कर्मणि द्वितीया।

7. फलति—फल् निष्पत्तौ, फलति, पफाल फेलतुः अफालीत्।

8. There are two similes here. This verse gives a very wholesome advice to the princes to secure the prosperity of the people of their states.

Digitization by Arya Samaj Charitable Foundation, Chennai

सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ॥४०॥

अन्वयः—सत्या अनृता च, परुषा प्रियवादिनी च, हिंस्रा दयालुः अपि, अर्थपरा वदान्या च, नित्यव्यया प्रचुरनित्यधनागमा च, वाराङ्गना इव नृपनीतिः अनेकरूपा अस्ति।

WORDS—अनृता = झूठी false, untruthful ; हिंस्रा = bloody, cruel, हिंसाकारिणी। अर्थपरा = greedy, covetous, लोभी, वदान्य = liberal, lavish, extravagant दानी ; नृपनीति = policy of the king.

English Translation—Now truthful, now false; now harsh-speaking, now sweet-speaking; now cruel, afterwards merciful ; now miserly, and then liberal; ever-spending wealth and yet ever-gaining plenty of wealth, thus the statesmanship of a king like a harlot assumes diverse forms.

हिन्दी अनुवाद—कभी सच्ची और कभी झूठी, कभी कटु-भाषिणी और कभी मधुरभाषिणी, कभी हिंसक और कभी दयालु कभी धन-लोलुप और कभी उदार, कभी खूब खर्च करने वाली और कभी खूब धन संचय करने वाली, राजनीति वेश्या के समान अनेकरूप धारण करती है ॥४०॥

व्याख्या—सत्या यथार्थभाषिणी ; अनृता असत्यभाषिणी च ; तथा परुषा कटुवादिनी, प्रियवादिनी प्रियंवदा च ; तथा हिंस्रा घातुका, दयालुः अपि कारुणिका च ; अर्थपरा धनलुब्धा अर्थलोलुपा, वदान्या दानशौण्डा च ; नित्यव्यया नित्यव्ययकारिणी ; प्रचुरः बहुलः नित्यः धनागमः धन-प्राप्तिः यस्याः सा सततप्रचुरधनप्रापिणी च ; वाराङ्गना वेश्या इव

Digitization by Arya Samaj Charitable Foundation, Chennai

नृपनीतिः राजनीतिः अनेकरूपा बहुप्रकारा विविधरूपधारिणी । न तु ऐकान्तिकी इति भावः। श्रवणमात्रेण आभासमानो विरोधोऽलंकारः। स च वाराङ्गना इव इति उपमया संकीर्णः। अतएव अत्र उपमा विरोधाभासयोः संकरः। वृत्तं वसन्ततिलकम्।

NOTES :—1. प्रियवादिनी—प्रियं वदितुं शीलं यस्याः प्रिय+वद्+णिनिः+स्त्रियाँ ङीप्; "ऋन्नेभ्यः ङीप्"—(उपपद तत्)।

2. हिंस्राः—हिंस्+र ; by नमि कपि-स्म्मजसकमहिंसदिपोरः।

3. दयालुः—दय्+आलुच् ; by स्पृहिगृहिपतिदयिनिद्रा तन्द्राश्रद्धाभ्यः आलुच्।

4. अर्थपरा—अर्थः एव परं प्रधानं यस्याः सा। greedy of wealth.

5. नित्यव्यया—नित्यं व्ययः यस्याः सा (ब० व्री०) or नित्यः perpetual. व्ययः यस्या सा।

6. प्रचुर etc. :—धनस्य आगमः धनागमः (षष्ठी तत्) नित्यं धनागमः इति नित्यधनागमः। सुप्सुपेतिसमासः। प्रचुरः नित्यधनागमः यस्याः सा प्रचुरनित्यधनागमा (ब० व्री०)।

7. अनेकरूपा—अनेकानि रूपाणि यस्याः सा (ब० व्री०)।

8. Figures are the mixture of विरोधाभास and उपमा।

आज्ञा कीर्तिः पालनं ब्राह्मणानां
दानं भोगो मित्रसंरक्षणं च।
येषामेते षड्गुणा न प्रवृत्ताः
कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥४१॥

अन्वयः—आज्ञा कीर्त्तिः ब्राह्मणानां पालनम् दानम् भोगः मित्रसंरक्षणम च येषाम् एते षड्गुणाः न प्रवृत्ताः, तेषाम् उपाश्रयेण हे पार्थिव! को अर्थः।

Digitization by Arya Samaj Charitable Foundation, Chennai

WORDS—आज्ञा = command, *i. e.* the power of enforcing command ; षट् = six, गुण = quality, ; उपाश्रय = taking shelter.

English Translation—O king, what is the use of taking shelter under those kings who have not got these six qualities (in them)—the power to enforce command, fame, the protection of Brahmanas; charity, the enjoyment (of worldly pleasures), and the protection of friends.

हिन्दी अनुवाद—आज्ञा-पालन कराना, कीर्त्ति फैलाना, ब्राह्मणों का पालन करना, दान देना, भोग करना और मित्र की रक्षा करना—जिनमें ये छवो गुण नहीं हैं, उन राजाओं की सेवा करने से क्या लाभ ॥ ४१ ॥

व्याख्याः—आज्ञा अप्रतिहतशासनम्, कीर्तिः यशः, ब्राह्मणानाम् पालनम् संतर्पणम्, दानम् सत्पात्रे धनत्यागः, भोगः सांसारिकसुखानुभवः, मित्रसंरक्षणम् सुहृज्जनरक्षा च, एते षड्गुणाः येषां राज्ञां न प्रवृत्ता, न प्रवर्त्तन्ते, हे पार्थिव । हे राजन् ! तेषां राज्ञाम् उपाश्रयेण आश्रयग्रहणेन कः अर्थः को लाभः । न कोऽपीत्यर्थः । तस्मात् उक्तगुणसंपन्नः एव राजा आश्रयणीयः न तु कुक्षिंभरिः इतिभावः । शालिनी वृत्तम् ।

NOTES :—1. आज्ञा = command, here, power of enforcing command.

2. ब्राह्मणानाम् पालनम्—Protection of all people. Brahmanas are specially mentioned by way of उपलक्षण तेषां प्रधानतया दानपात्रत्वात् as they deserve king's help the most badly, they themselves being by nature voluntary missionaries of the Hindu culture and civilisation.

Digitization by Arya Samaj Charitable Foundation, Chennai

3. येषाम् एते—who do not possess these six qualities.

4. उपाश्रयेण—करणे ३या। उपाश्रयेण कः लाभः साध्यते। साधनक्रियां प्रति करणम् "कचित् गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका" उप + आ + श्रि (भ्वादि) उभ + अच्।

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ च नातोऽधिकम्।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥४२॥

अन्वय :—धात्रा स्तोकम् महत् वा यत् धनम् भालपट्टलिखितम् तत् मरुस्थले अपि नितराम् प्राप्नोति, मेरौ च, अतः अधिकम् न (प्राप्नोति)। तत् धीरः भव ; वित्तवत्सु कृपणाम् वृत्तिम् वृथा मा कृथाः, कूपे पयोनिधौ अपि घटः तुल्यम् जलम गृह्णाति इति पश्य।

Words—स्तोक = little ; भाल = ललाट forehead ; पट्ट = slab, tablet, (पटिया)। मरु = desert, मेरु = a fabulous golden mountain, loftiest mountain round which all the planets are supposed to revolve, कृपणा = abject, servile (कंजूस) stingy ; वृत्ति = course of conduct, (बर्ताव)। नितराम् = completely, entirely.

English Translation—Even in desert or on mountain Meru, a man gets entirely that amount of wealth, little or much as has been lotted by the creator on the tablet of his forehead, and he does not get more than that even on Meru. Therefore be equanimous-minded ; do not behave abjectly in vain towards the wealthy. Behold, a pitcher takes only as much water as it can contain from a well or from a sea.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—विधाता ने ललाट में जो थोड़ा या बहुत धन लिख दिया है, वह सम्पूर्ण मरुभूमि या मेरु पर्वत पर मिलेगा ही। तब हे मनुष्य ! धीरज धरो, धनिकों के निकट अपनी दीन वृत्ति मत दिखाओ अर्थात् धनियों के सामने मत घिघिआओ। देखो, कूप में भरो या समुद्र में, घड़ा उतना ही पानी ग्रहण करता है जितना उसमें अँटता है ॥४२॥

व्याख्या—धात्रा स्रष्ट्रा स्तोकम् अल्पम् महत् बहुलम् यत् धनम्, निजभालं निजललाटम् एव पट्टं, तत्र लिखितम् निर्दिष्टम् तत् ब्रह्मलिखितम् धनम् मरुस्थले ऊषरदेशे अपि नितराम् साकल्येन प्राप्नोति लभते। मेरौ च मेरुपर्वते च, अतः च ब्रह्मलिखितात् अधिकम् न प्राप्नोति। तत् तस्मात् कारणात् धीरः स्थिरचित्तो भव। वित्तवत्सु धनिषु धनाढ्येषु कृपणां दीनां वृत्तिं व्यापारं वृथा व्यर्थं मा कृथाः माकार्षीः, अत्र दृष्टान्तं ददाति—पश्य अवलोकय, कूपे अल्पजलाधारे, पयोनिधौ समुद्रे अपि घटः कलशः तुल्यम् आत्मपरिमितम् जलं गृह्णाति स्वीकुरुते। न तु कूपे अल्पम्, पयोनिधौ च अधिकम्। दृष्टान्तालंकारः। शार्दूलविक्रीडितम्।

NOTES :—1. धात्रा अनुक्ते कर्त्तरि ३या of लिखितम्। धा+तृच्=धातृ।

2. निजभालपट्टलिखितम्—निजं भालं निजभालम् (कर्मधा०) निजभालम् एव पट्टम् (मयूरव्यंसकादित्वात् रूपकरूपसमासः) ; निजभालपट्टम् तत्र लिखितम् (७मी तत्)।

3. मरुस्थले—अधिकरणे ७मी। मरु=म्रियन्तेऽस्मिन् भूतानि जलाभावात् इति=मृ+उ (उणादिः)। मरुः एव स्थलम् इति (मयूरव्यंसकादित्वात् रूपक सं०)।

4. मेरौ—अधिकरणे ७मी। Meru is the loftiest golden mountain on earth round which the whole firmament with all the planets revolves.

5. वित्तवत्सु - विषयाधिकरणे ७मी। वित्तमस्ति येषाम् ते वित्तवन्तः,

Digitization by Arya Samaj Charitable Foundation, Chennai

तेषु । वित्त+मतुप् ; मादुपधायाः मतोवऽयवादिभ्यः"—By this rule मत् changes to वत् । विद्लृलाभे विन्दति or विन्दते । विद्+क्त= वित्तं धनम् । 'वित्तो भोगप्रत्यययोः ।'

6. कृपणां वृत्तिम् मा कृथाः—Do not act in servile manner towards the rich. Do not behave abjectly towards the wealthy.

7. मा कृथाः—कृ आत्मने लुङ् II. S. अकृथाः । Then comes "माङि लुङ्" and so मा अकृथाः । After that, "न माङ्योगे" । prescribes that अ of अकृथाः be not used along with माङ् and so we have only मा कृथाः ।

This verse seems to have been addressed to a dejected scholar who being refused in some princely court, wanted to criticise the prince, or to behave improperly with him. At this the poet addresses him, " O Scholar, do not behave abjectly to the wealthy. If they have refused you or have given you little, let them do so. You shall get as much as you are fated to have etc.

8. तुल्यम् —आत्मपरिमितम् ; as much as can be contained in the pitcher ; equal to its capacity. A pot takes as much water as it can hold, never more than that. The last line shows that fortune depends on the capacity of the man. It counteracts the effect of fatalism.

9. The figure is दृष्टान्त ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ दुर्जनपद्धतिः

अकरुणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा ।
सुजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम् ॥४३॥

अन्वय—अकरुणत्वम् अकारणविग्रहः परधने परयोषिति च स्पृहा सुजनबन्धुजनेषु असहिष्णुता-इदम् (सर्वम्) दुरात्मनाम् प्रकृतिसिद्धम् हि ।

WORDS :—अकरुणत्व=cruelty, निर्दयता । विग्रह=quarrel, hostility, लड़ाई । योषित्=wife, स्त्री । स्पृहा=longing, hankering, चाह । सहिष्णुता=endurance, forbearance, tolerance । असहिष्णुता=intolerance. दुरात्मन्=ruffian, wicked man.

English Translation—Mercilessness, hostility without any cause, hankering after others' wealth and wife ; intolerance of good men and relations ; all these (traits) are natural with the wicked.

हिन्दी अनुवाद—दया न दिखाना, बिना कारण ही झगड़ना, दूसरों के धन, और दूसरों की स्त्री को ले लेने की इच्छा करना, सुजनों और बन्धु जनों के प्रति सहिष्णुता न दिखाना—ये सब दुरात्माओं के स्वभावसिद्ध लक्षण हैं ॥४३॥

व्याख्या—अकरुणत्वम् दयाहीनत्वम् निर्दयता, अकारणविग्रहः निष्कारणकलहः परधने परसम्पत्तौ परयोषिति परस्य अन्यस्य दारेषु च स्पृहा ग्रहणेच्छा परधनापहरणेच्छा परदारसंभोगाभिलाषः च । सुजनेषु सज्जनेषु बन्धुजनेषु ज्ञातिवर्गे असहिष्णुता असहनशीलता च । इतीदं सर्वं दुरात्मनाम् दुर्जनानाम् प्रकृतिसिद्धम् स्वभावोत्पन्नम् स्वभावसिद्धं हि । अतस्ते न उपादेयाः इति भावः । द्रुतविलम्बितं वृत्तम् । "द्रुतविलम्बितमाह नभौ भरौ ।"

Digitization by Arya Samaj Charitable Foundation, Chennai

NOTES :—1. अकरुणत्वम्—अविद्यमाना करुणा यस्य सः अकरुणः (ब० व्री०) ; तस्य भावः अकरुणत्वम् ; अकरुण+त्व (भावे) ।

2. अकारणविग्रहः—अविद्यमानं कारणं यस्य सः अकारणः (ब० व्री०) ; अकारणश्चासौ विग्रहः इति (कर्मधा०), वि+ग्रह्+अप् (ग्रह वृदनिश्चिगमश्च) ।

3. परधने—परस्य धनम् ; (ष० त०) तस्मिन् विषयाधिकरणे ७मी ।

4. परयोषिति—परस्य योषित् (ष० त०) तस्याम् विषयाधिकरणे ७मी ।

5. स्पृहा—स्पृह्+आङ्+स्त्रियां टाप् ।

6. सुजनबन्धुजनेषु—सुजनाश्च बन्धुजनाश्च (द्वन्द्वः) ; तेषु विषयाधिकरणे ७मी । शोभनाः जनाः सुजनाः (कर्मधा०) बन्धुः एव जनः बन्धुजनः (मयूरव्यंसकादित्वात् समासः स च रूपक रूपः) ।

7. असहिष्णुताः—न सहिष्णुता इति (नञ् तत्) ; सह्+इष्णुच् सहिष्णुः "अलंकृञ् निराकृञ्......वृतु वृधु सहचर इष्णुच् ।"

8. दुरात्मनाम्—दुष्टः आत्मा यस्य सः दुरात्मा (ब० व्री०) ; तेषाम् ।

इदम्—This pronoun refers to all nouns gone before of diverse genders ; masculine, feminine and neuter. Then why is it neuter singular ? Why not plural ? etc. Ans. " नपुंसकमनपुंसकेन एकवत् च अन्यतरस्याम् " —this rule says that when a neuter word comes with non-neuter words, then the common word referring to them all is neuter ; as for its number, it may be optionally singular. Here अकरुणत्वम्, विग्रहः, स्पृहा and असहिष्णुता are referred to ; so the common word इदम् referring to them is neuter and singular.

Digitization by Arya Samaj Charitable Foundation, Chennai

9. दुरात्मनाम् :—दुष्टः आत्मा येषाम् ते दुरात्मानः (ब० व्री०) तेषाम् (शेषे षष्ठी) ;

10. प्रकृतिसिद्धम्:—प्रकृत्या सिद्धम् इति (३या तत्) । सिध्+क्त (कर्त्तरि) ।

दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन्
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ ४४ ॥

अन्वय—विद्यया अलंकृतः अपि सन् दुर्जनः परिहर्तव्यः । मणिना भूषितः सर्पः असौ किम् भयङ्करः न ।

English Translation—A rogue should be shunned though adorned with learning. Is not a serpent dangerous though bedecked with a gem ?

हिन्दी अनुवाद—दुर्जन चाहे विद्या विभूषित भी हो तोभी उसका त्याग करना चाहिये । मणि से भूषित सर्प क्या भयङ्कर नहीं होता ॥४४॥

व्याख्या—दुर्जनः दुष्टः नरः विद्यया अलंकृतः भूषितः सकलविद्यापारीणः अपि सन् परिहर्तव्यः दूरतः त्याज्यः । सर्पः भुजगः मणिना फणरत्नेन भूषितः अलंकृतः अपि असौ सर्पः किम् भयङ्करः प्राणघातकः न ? अवश्यमेव प्राणापहारी इति भावः । यथा मणिभूषितः सर्पः त्याज्यः तथैव विद्यावान् दुर्जनः अपि दूरतः त्याज्यः। दुर्जनं दूरतस्त्यजेत् । दृष्टान्तालंकारः । वृत्तम् अनुष्टुभ् ।

NOTES :—1. दुर्जनः—दुष्टः जनः इति (कर्मधा०) ।

2. विद् + क्यप् + स्त्रियां टाप् = विद्या ।

3. भयङ्करः—भय + कृञ् + खश् । "मेघर्तिभयेषु कृञः खश्" And then by "अरुष्-द्विषत् अजन्तस्य खिति मुम्"—म् is added to भय ।

4. Figure is दृष्टान्तः । वाक्यद्वये विम्बप्रतिविम्बता ।

5. There is some difficulty in construing the

Digitization by Arya Samaj Charitable Foundation, Chennai

sentence. सर्पः मणिना भूषितः A serpent is decked with gem. किमसौ भयंकरः न ? Is it not dangerous ? This seems to be proper construction.

N. B.—" This verse is attributed to चाणक्य । See काव्यसंग्रह page 293 and शारङ्गधरपद्धति p. 63" Telang.

जाड्यं ह्रीमति गण्यते व्रतशुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि ।
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः ॥४५॥

अन्वय—ह्रीमति जाड्यं गण्यते, व्रतशुचौ दम्भः, शुचौ कैतवं, शूरे निर्घृणता, मुनौ विमतिता, प्रियालापिनि दैन्यं, तेजस्विनि अवलिप्तता, वक्तरि मुखरता, स्थिरे (जने) अशक्तिः (गण्यते) तत् गुणिनां को नाम गुणः भवेत् यः दुर्जनैः न अङ्कितः ?

Words—जाड्यं = dulness ; sluggishness ; ह्रीमत् = bashful or shy man. दम्भ = hypocrisy hereticness, पाखंड, कैतव = roguery, निर्घृणता = निर्दयता mercilessness ; cruelty ; विमतिता = bankruptcy of wisdom, बुद्धिहीनता । दैन्य = meanness, lowness, नीचता, अवलिप्तता = घमंड, arrogance, haughtiness ; मुखरता = वाचालता, garrulity, talkativeness ; वक्तृ = speaker ; orator ; अशक्ति = imbecility अङ्कित = branded, stigmatised, कलंकित, दोषित ।

English Translation—Dulness is ascribed to a modest man (by the wicked) ; hypocrisy to one pure on account of religious observances ; roguery to the pure ; cruelty to warrior ; bankruptcy of wisdom to the sage ; meanness to the sweet-speaker ; haughtiness

Digitization by Arya Samaj Charitable Foundation, Chennai

to the spirited ; garrulity to an orator ; imbecility to a steady man. What virtue of the meritorious (*virtuous*) is there that is not branded by the wicked ?

हिन्दी अनुवाद—दुर्जन लोग लज्जाशील पुरुष को जड़ और मतिमन्द कहते हैं, धार्मिक व्रती को पाखंडी, पवित्रात्मा को छलिया, शूर को निर्दय, मुनिजन को मतिहीन, मिष्टभाषी को दीन, तेजस्वी को अहंकारी, बोलने वाले को बड़बड़िया और धीर-स्थिर पुरुष को कमजोर निर्बल कहते हैं। गुणियों का ऐसा कौन-सा गुण है जिसको दुर्जन लोग कलुषित नहीं ठहराते ? ॥ ४५ ॥

व्याख्या—ह्रीमति लज्जावति जाड्यम् गण्यते, दुर्जनैः इति शेषः। न तु विनयशालीनता। व्रतैः तपोनियमैः शुचौ शुद्धे जने दम्भः पाखंडत्वम् धर्मध्वजित्वम्, गण्यते। न तु कुकर्माचरणपराङ्मुखत्वम्। शुचौ स्वभावादेव शुद्धचित्ते जने कैतवं शाठ्यं कपटं गण्यते। न तु पारमार्थिकत्वम्। शूरे वीरे निर्घृणता निर्दयता गण्यते। न तु विक्रमः। मुनौ मननशीले जने ऋषौ विमतिता बुद्धिहीनता गण्यते। न तु परमात्मानुसंधानपरत्वम्। प्रियवादिनि मधुरभाषिणि दैन्यं दीनता गण्यते। न तु श्रवणानन्दकरत्वम्। तेजस्विनि पराक्रमशीले अवलिप्तता दर्पः गर्वः गण्यते। न तु स्वभावः। वक्तरि वाग्मिनि मुखरता वाचालता गण्यते। न तु वाग्मित्वम्। स्थिरे स्थिरचित्ते धीरे जने अशक्तिः सामर्थ्याभावः गण्यते। तत् तस्मात् कारणात् गुणिनाम् गुणसंपन्नानाम् को नाम गुणो भवेत् यो गुणो दुर्जनैर्नाङ्कितः न दूषितः। न कोऽपीत्यर्थः। गुणिनां कोऽपि गुणः एतादृशो नास्ति यो दुर्जनैः न दुष्यते। शार्दूलविक्रीडितं वृत्तम्।

Notes :—The language in this verse is very condensed. गुणः, दुर्जनैः and गण्यते are to be supplied with every clause.

1. ह्रीमति जाड्यं गण्यते—ह्रीमति ह्रीरूपो यो गुणः स जाड्यं

Digitization by Arya Samaj Charitable Foundation, Chennai

गण्यते, ह्री+मतुप् ; तस्मिन् । अधिकरणे सप्तमी । जडस्य भावः जाड्यम् जड+ष्यञ् (गुणवचन ब्राह्मणादिभ्यः कर्मणि च ष्यञ्) ।

2. व्रतशुचौ व्रतशुचिता यः गुणः सः दम्भः गण्यते:—व्रतैः शुचिः (३या तत्) तस्मिन् अधिकरणे ७मी similarly अधिकरणे ७मी in all words in this verse.

3. शुचौ —one pure by nature both internally and externally.

4. दम्भ+घञ्=दम्भः ; कितव+अण्=कैतव ; निर्घृण+तल्+स्त्रियां टाप् । विमति+तल्+स्त्रियां टाप्=विमतिता । दीनस्य भावः दीन+ष्यञ्=दैन्य see जाड्यं । meanness, miserable state, low spiritedness.

5. निर्घृणता—निर् नास्ति घृणा (दया) यस्य सः निर्घृणः (ब० व्री०) ; तस्य भावः निर्घृणता ।

6. विमतिता—विगता मतिः यस्य सः विमतिः (ब० व्री०) तस्य भावः विमतिता विमति+तल्+स्त्रियां टाप् । मन्+क्तिन्=मतिः ।

7. प्रियालापिनि—प्रियम् आलपितुं शीलं यस्य स । प्रिय+आ+लप्+णिनिः (ताच्छील्ये) प्रियालापिन् ; तस्मिन् ।

8. तेजस्विनि—तेजस्+विनिः (अस्माया मेधास्रग् विनिः) तेजस्विन् ; तस्मिन् । अवलिप्+क्त (कर्त्तरि) ; अवलिप्तः, तस्य भावः अवलिप्तता । भावे तल् ।

9. वक्तरि—वच्+तृच+वक्तृ, तस्मिन् । अधिकरणे ७मी ।

10. अशक्तिः—शक्तेः अभावः इति । न+शक्तिः अशक्तिः । नञ् means ‘ want of ’ here. “तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः” नञ् has six senses (I) तत्सादृश्य (likeness) as in अब्राह्मणः ; (II) अभाव (absence) as in अशक्तिः ; (III) तदन्यत्व (exclusion, difference) as in अविद्वान् ; (IV) तदल्पता (scarcity) as in अदोषः ; (V)

Digitization by Arya Samaj Charitable Foundation, Chennai

अप्राशस्त्य (depreciation) as in अपण्डितः ; (VI) विरोध (opposition) as in अमर्षः ।

11. मुनिः—मनुते असौ मुनिः ; मन्+इन् (उणादिः) । 'सर्वधातुभ्यः इन्' अनेन इन् प्रत्ययः । "मनेरुश्च" by this, अ of मन् changes to उ & so मुनिः । मुनि means one who perceives or contemplates.

12. मुखरता—मुख+र=मुखर garrulous । र implies censure.

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम् ।
सौजन्यं यदि किं बलेन महिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥ ४६ ॥

अन्वय—लोभः अस्ति चेत् अगुणेन किम् ? पिशुनता यदि अस्ति, पातकैः किम् ? सत्यम् अस्ति चेत् तपसा च किम् ? मनः शुचि यदि अस्ति तीर्थेन किम् ? सौजन्यं यदि अस्ति बलेन किम् ? महिमा यदि अस्ति मण्डनैः किम् ? सद्विद्या यदि अस्ति धनैः किम् ? अपयशः यदि अस्ति मृत्युना किम् ?

Words—पिशुनता = back-biting, (चुगलखोरी) । तपस् = penance ; शुचि = pure, पवित्र । सौजन्य = nobility, goodness, सुजनता । महिमा = glory, greatness ; मण्डन = ornament, decoration, भूषण ।

English Translation—If a man has avarice, why should he require other bad qualities ? If he has a back-biting nature, why should he want sins ? If truth, what is the use of austerity ? If pure mind, then what is the use of pilgrimage ? If nobility

Digitization by Arya Samaj Charitable Foundation, Chennai

(of heart), what is the use of strength ? If he has glory, what is the use of ornaments ? If good learning, what is the use of wealth ? If ill name, why should he need death ?

हिन्दी अनुवाद—लोभ यदि है तो और और दुर्गुणों की क्या आवश्यकता ? चुगलखोरी है तो पापों का क्या प्रयोजन ? सत्य यदि है तो तप की क्या आवश्यकता ? मन यदि पवित्र है तो तीर्थाटन का क्या प्रयोजन ? सुजनता यदि है तो बल की क्या जरूरत ? यदि महिमा है, बड़प्पन है—तो भूषणों का क्या प्रयोजन ? सुविद्या यदि पास में है तो धन की क्या ज़रूरत ? अपयश यदि है तो मृत्यु की क्या जरूरत ? ॥ ४६ ॥

व्याख्या—लोभः धनादिकाङ्क्षा अस्ति चेत् अगुणेन दुर्गुणेन किम् साध्यते इति शेषः। न किंचिदपि इत्यर्थः। लोभः एव निन्दावहः। पिशुनता परोक्षे परदोषसूचकता अस्ति यदि, पातकैः पापैः किम् ? सा एव नरकपातनसमर्था। सत्यं यथार्थभाषणं चेत् तपसा व्रतनियमैः किम्। तत् एव परिशोधयति नरम्। यदि मनः चेतः शुचि शुद्धं पवित्रम् अस्ति तर्हि तीर्थेन काशीप्रयागयात्रया किम् ? सौजन्यं सुजनता यदि अस्ति बलेन शारीरिकशक्त्या किम्। बलेन परिजनेन किम् इति वा। महिमा माहात्म्यं यदि अस्ति मण्डनैः भूषणैः किम्। महिमैव अलंकरोति। सद्विद्या सुविद्या यदि अस्ति धनैः संपत्तिभिः किम् ? अपयशः अपकीर्तिः यदि अस्ति मृत्युना मरणेन किम् ? अपयशो नरं मृतप्रायं करोति इति भावः। एवं विचार्य पुरुषेण सद्गुणार्जनं कर्त्तव्यम्। शार्दूलविक्री०।

Notes :—1. लोभः – Greed is regarded as the root of all evils. *cf.* ‘लोभः पापस्य कारणम्’ Hit. 1·27. Again यशोयशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः। लोभः स्वल्पोऽपि तान्हन्ति विश्वं रूपमिवेप्सितम्। भागवत्पुराणम्।

2. अगुणेन—न गुणः अगुणः (नञ् तत्) ; नञ् means here opposition (विरोध) see notes on अशक्ति verse ·45. Ibid.

Digitization by Arya Samaj Charitable Foundation, Chennai

करणे ३या by गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका। अगुणेन किं साध्यम् अस्ति ; साधन-क्रियां प्रति अगुणशब्दः करणम् Similarly all other words ending in तृतीया in this verse have करणे ३या।

3. सौजन्यम्—सुजनस्य भावः ; सुजन + ष्यञ् (गुणवचन ब्राह्मणादिभ्यः कर्मणि च ष्यञ्) ; If a man has nobleness in him, he will win over all easily with his noble behaviour.

4. महिमा—महत् + इमनिच् = महिमन् ; words formed by इमनिच् affix are masculine.

5. अपयशः—अपयश : is regarded more than death for a goodman *cf.* " संभावितस्य चाकीर्त्तिर्मरणादतिरिच्यते " गीता २·३४. Again "न भीतो मरणादस्मि केवलं दूषितं यशः" मृच्छकटिकम्।

6. पातकैः—पातयति नरके इति पातकम्। पत् + णिच् + ण्वुल्।

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतिः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥४७॥

अन्वय—दिवसधूसरः शशी, गलितयौवना कामिनी, विगतवारिजं सरः, स्वाकृतेः अनक्षरं मुखम्, धनपरायणः प्रभुः, सततदुर्गतिः सज्जनः नृपाङ्गणगतः खलः इति सप्त मे मनसि शल्यानि सन्ति।

Words—धूसर = of dusty colour, pale, lustreless, गलित = melted away, vanished, गलितयौवना = a woman whose youth has vanished away, a woman of past youth ; स्वाकृति = सु + आकृति = fair-faced, beautiful man. अनक्षर = अनपढ़, अशिक्षित, illiterate ; unlettered, सततदुर्गति =

Digitization by Arya Samaj Charitable Foundation, Chennai

ever-sad-plighted', ever-plunged in misery, शल्य= shaft, barb, बर्छी, काँटा ।

English Translation—The moon, lustreless in day ; a lovely woman past her youth ; a lake without lotuses ; a fair but unletterd face ; a master (king) given to wealth-hoarding ; a good man ever in sad plight ; a rogue having access to a king's court—these are the seven shafs (sunk deep) into my heart.

हिन्दी अनुवाद—दिन में मलिन चन्द्रमा, वह सुन्दरी जिसकी जवानी खतम हो गई हो, कमलविहीन सरोवर, सुन्दर आकृतिवाला निरक्षर भट्टाचार्य आदमी, धनलोलुप मालिक, दुर्दशा-ग्रस्त सज्जन, राजदरबार में पहुँचवाला दुष्ट—ये सातो मेरे हृदय में चुभे हुए वाण हैं अर्थात् ये सातो मेरे मन में बहुत खटकते हैं ॥ ४७ ॥

व्याख्या—दिवसे दिने धूसरः निस्तेजस्कः उपहततेजाः शशी चन्द्रः च, गलितयौवना नष्टनूतनव्यस्का कामिनी कान्ता रमणी च, विगतवारिजं नष्टकमलं कमलरहितं सरः कासारश्च, सु शोभना आकृतिः यस्य इति स्वाकृतिः सुन्दरपुरुषस्य अनक्षरं शास्त्रज्ञानरहितम् मुखम् वदनं च, धनपरायणः धनलुब्धः प्रभुः राजा च, सततदुर्गतिः सतता दुर्गतिः यस्य निरन्तरदारिद्रोपहतः सज्जनः सुजनः च, नृपाङ्गणगतः राजगृहान्तर्वर्त्ती राजानुग्रहभाक् खलः दुष्टः दुर्जनश्च, इति एतानि सप्त मे मनसि शल्यानि-शूलानि शल्यवत् दुःसहदुःखकारीणि । समुच्चयालंकारः । प्रकृताकृतानां युगपद्वर्णनात् दीपकालंकारः च । अतः संकरः अत्र । पृथ्वीवृत्तम् ।

NOTES—1. शशी—शशः अस्य अस्ति इति । शश+इनिः=शशिन् (नित्ययोगे इन्) । The moon is said to carry a hare is his lap. He in therefore called मृगलाञ्छनः ।

2. दिवसधूसरः—दिवसे धूसरः इति (७मी तत्) ।

Digitization by Arya Samaj Charitable Foundation, Chennai

3. गलितयौवना—गलितं व्यतीतं यौवनं युवावस्था यस्याः सा (ब० व्री०) Qual. कामिनी। गल् भ्वा० परस्मै + क्त = गलित। गलति etc. यूनः भावः इति यौवनम् युवन् + अण् (हायनान्तयुवादिभ्योऽण्)।

4. विगतवारिजम्—विगतानि वारिजानि यस्य तत् (ब० व्री०) वारि + जन् + डः (सप्तम्यां जनेर्डः) वारिणि जायते इति।

5. स्वाकृतेः—सु शोभना आकृतिः यस्य सः स्वाकृतिः (ब० व्री०) तस्य। संबन्धे षष्ठी।

6. अनक्षरम्—अविद्यमानम् अक्षरम् यत्र तत् (ब० व्री०) Want of learning is a great disgrace for a beautiful man.

7. धनपरायणः—परम् अयनम् (chief aim, principal object) परायणम्। धनमेव परायणं यस्य सः धनपरायणः धनलुब्धः (ब० व्री०)। "अयनं च"—By this rule, न changes to ण।

8. सततदुर्गतिः—दुष्टा गतिः दुर्गतिः (कर्मधा०); सतता दुर्गतिः यस्य or सततं दुर्गति-यस्य (ब० व्री०)। We have सततदुर्गतः also, then सततं दुर्गतः इति <u>सुप्सुपासमासः।</u>

9. नृपाङ्गणगतः – नृपस्य अङ्गनम् (षष्ठी तत्) तत् गतः (२या तत्) न changes into ण by the rule "रषाभ्यां नो णः समानपदे" —and "कुमति च"।

N. B.—अङ्गन and अङ्गण both spellings are seen but the first one is very popular. Q. why ण in अङ्गण? Ans. पृषोदरादित्वात् सिद्धम्।

This phrase नृपा etc. means। " gone to the court of the king, has access to king's court, *i. e.* carries the favour of the king, is in the best confidence of the king."

10. Kavyaprakasha quotes this verse as an instance of समुच्चयालंकारः। Moon alone is sufficient to become a शल्य, yet other शल्य's are mentioned. But

Digitization by Arya Samaj Charitable Foundation, Chennai

"प्रस्तुतानाम् अप्रस्तुतानां च दीपकम्" makes it दीपकालंकारः। खल is प्राकृत (matter in hand) and others are अप्राकृत (matters absent) and so दीपक। As both are available here so संकरालंकारः।

11. शल्यानि—कष्टकारकाणि, दुःखदायीनि सन्ति।

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम्
होतारमपि जुह्वानं स्पृष्टो दहति पावकः॥ ४८॥

अन्वय—चण्डकोपानाम् भूभुजाम् कश्चित् अपि न आत्मीयः नाम। जुह्वानम् होतारम् अपि पावकः स्पृष्टः सन् दहति।

WORDS—चण्ड = furious, fierce (उग्र); आत्मीय = one's own relation, favourite, (प्रियपात्र); जुह्वान = one offering oblation, हवन करता हुआ।

English Translation—None is, indeed, the pet of the king whose anger is furious. The fire, when touched, burns even the sacrificer, offering oblations.

हिन्दी अनुवाद—जिनका कोप बड़ा प्रचण्ड है उन राजाओं का कोई भी अपना नहीं। छू जाने पर अग्नि हवनकर्त्ता को भी जलाती ही है॥४८॥

व्याख्या—प्रचण्डकोपानाम् उग्राणाम् भूभुजाम् नृपाणाम् कश्चित् अपि पुमान् न आत्मीयः विश्वासपात्रं प्रेमपात्रम् न भवति। जुह्वानम् हवनं कुर्वाणम् अपि होतारम् यजमानम् पावकः अग्निः स्पृष्टः सन् दहति संतापयति। ईदृशः उग्रः राजा न आश्रयणीयः इति भावः। दृष्टान्तः अलंकारः। अनुष्टुभ् वृत्तम्।

NOTES :—1. चण्डकोपानाम्—चण्डः कोपः येषां ते चण्डकोपाः (ब० व्री०) तेषाम्। Qual. भूभुजाम् कुप् + घञ् (भावे) = कोपः।

2. भूभुजाम्—भुवम् भुनक्ति पालयति इति। भू + भुज् + क्विप् = भूभुज्; तेषाम्। सम्बन्धे षष्ठी।

Digitization by Arya Samaj Charitable Foundation, Chennai

3. आत्मीयः—आत्मनः अयम् इति । आत्मन् + छः favourite, a pet ; a kith and kin.

4. जुह्वानम्—हु + चानश् (ताच्छील्ये) जुहु + आन = जुह्वानः "हु दानादनयोः" is always परस्मैपद and so we can't add here शानच् । So this should be derived according to "ताच्छील्य वयोवचनशक्तिषु चानश्" *i. e.*, the affix चानश् (आन) and not शानच् is added to roots to imply (*a*) habit (ताच्छील्य), (*b*) age (वयः) and (*c*) power (शक्ति) । होतुं शीलं यस्य इति ; हु + चानश् = जुह्वानः, like भोगं भुञ्जानः । कवचं बिभ्राणः (age, young man) ; शत्रुं निघ्नानः (power).

5. होतारम्—हु + तृच् = होतृ ; कर्मणि २ या । Sacrificer.

6. पावकः—पुनाति इति, पु + ण्वुल् (अक्) ;

7. दहति—भ्वा० पर दहति, ददाह-देहतुः; अधाक्षीत्-अदाग्धाम्-लृटि धक्ष्यति ।

8. Figure is दृष्टान्तः ।

मौनान्मूकः प्रवचनपटुर्वाचको जल्पको वा
धृष्टः पार्श्वे भवति च वसन्दूरतोऽप्यप्रगल्भः ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ४६ ॥

अन्वय—मौनात् मूकः प्रवचनपटुः वाचकः जल्पकः वा, पार्श्वे च वसन् धृष्टः भवति, दूरतः अपि (वसन्) अप्रगल्भः (भवति), क्षान्त्या भीरुः, यदि न सहते, प्रायशः अभिजातः न (भवति) ; सेवाधर्मः परम-गहनः, योगिनाम् अपि अगम्यः अस्ति ।

Words—मौन = silence ; मूक = dumb, mute, गूँगा, प्रवचन = reply, जवाब । पटु = sharp, expert, तेज ; वाचक =

Digitization by Arya Samaj Charitable Foundation, Chennai

talkative, बड़बड़िया ; जल्पकः=भटर-भटर करने वाला, garrulous; प्रगल्भ=bold ; अप्रगल्भ=timid, shy ; अभिजातः=well-born ; गहन=difficult, (कठिन)। अगम्य =incomprehensible ; unknowable. समझ के बाहर, दुर्बोध।

English Translation The duty of service is very difficult (to understand). It is incomprehensible even to the ascetics. A servant is called dumb and mute if he keeps silence ; if sharp in reply, he is called talkative or garrulous ; if he stands near, he is called impudent ; if he stays afar, he is called shy ; on account of his power of endurance, he is called a coward ; if he does not brook (any insult) ; he is generally regarded as base-born or unmannerly.

हिन्दी अनुवाद—सेवा-धर्म बड़ा ही विकट है, यह योगियों को भी अगम्य है, दुर्बोध है। सेवक यदि चुप रहता है तो गूंगा कहलाता है, हाजिर जवाब हुआ तो बड़बड़िया और भटर-भटर करने वाला, यदि नज़दीक में खड़ा रहे तो ढीठ, दूर में रहे तो लजारुक कहलाता है, सहनशीलता के कारण कायर और यदि बात न सहे तो नीच कमीना कहलाता है ॥४६॥

व्याख्या—मौनात् तूष्णींभावात् मूकः निर्वचः। मौनं धारयेत् चेत् मूकः इति उच्यते। सेवकः इति शेषः। प्रवचनपटुः प्रवचने प्रत्युत्तरे पटुः कुशलः वाचकः बहुभाषी जल्पकः असंबद्धप्रलापी वा भवति। पार्श्वे समीपे च वसन् अवतिष्ठमानः धृष्टः निर्भीकः भवति। दूरतः विप्रकृष्टे देशे अपि वसन् अप्रगल्भः अप्रौढः। क्षान्त्या सहनशीलतया भीरुः भयशीलः कातरः भवति। यदि न सहते क्षमते। तिरस्कारादिकम् इति शेषः। तर्हि प्रायशः अभिजातः सत्कुलीनः न भवति। अतः सेवाधर्मः परिचर्याकर्म परमगहनः अत्यन्तकठिनः। योगिनाम् यतीनाम् मुनीनाम् अपि अगम्यः ज्ञातुमशक्यः। अतिशयोक्तिः अलंकारः। मन्दाक्रान्ता वृत्तम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

NOTES :—1. मौनात्—हेतौ ५मी। मुनेः भावः कर्म वा मौनम्=मुनि+अण्।

2. प्रवचनपटुः—प्रवचने पटुः इति ७मी तत्। sharp or quick in retort.

3. वाचकः जल्पकः—वच्+ण्वुल्=वाचकः, जल्प्+ण्वुल्=जल्पकः। or जल्पति इति जल्पः जल्प्+अच् (पचादित्वात्); कुत्सितः जल्पः इति जल्पकः or जल्पः एव जल्पकः स्वार्थे कन्। By the rule "जल्पभिक्ष, कुट्ट लुण्ठ वृङः पाकन्" जल्पाकः, भिक्षाकः etc. are formed.

4. क्षान्त्या—हेतौ ३या। क्षम्+क्तिन्। क्षमते etc.

5. भीरुः—भी+क्रुक्=भीरुः। भियो क्रुक्लुकनौ"।

6. अभिजातः—well-born, polite in behaviour, mannerly, courteous.

7. सेवाधर्मः—सेवारूपः धर्मः (मध्यमपदलोपी)। सेव्+अ+स्त्रियाँ टाप् (गुरोश्च हलः)। ध्रियते अनेन समाजः संसारः वा इति धर्मः धृ+मन् (उणादि)।

8. योगिनाम्—षष्ठी वा "कृत्यानां कर्त्तरि वा" owing to अगम्य।

9. अगम्यः—न गम्यः (नञ्तत्); गम्+यत् (पोरुपधात्)=गम्य। अगम्य=difficult to be approached; inaccessible. योगी has superhuman power by the dint of their penance and contemplation. So he can know every thing. But the duty of service is so difficult that even he cannot understand it properly; then what to speak of a layman?

10. Fig. अतिशयोक्तिः अलंकारः (Exaggeration): Metre मन्दाक्रान्ता।

Digitization by Arya Samaj Charitable Foundation, Chennai

उद्भासिताखिलखलस्य विशृङ्खलस्य
प्रोद्गाढविस्मृतनिजाधमकर्मवृत्तेः
दैवादवाप्तविभवस्य गुणद्विषोऽस्य
नीचस्य गोचरगतैः सुखमास्यते कैः ॥ ५० ॥

अन्वय :—उद्भासिताखिलखलस्य विशृङ्खलस्य प्रोद्गाढविस्मृतनिजाधमकर्मवृत्तेः दैवात् अवाप्तविभवस्य गुणद्विषः अस्य नीचस्य (जनस्य) गोचरगतैः कैः सुखम् आस्यते ।

WORDS :—उद्भासित=brightened ; aggrandised, made great in power. बड़ा बना दिया। विशृङ्खला=unbridled, unrestrained, licentious, उद्धत। प्रोद्गाढ=अतितराम् totally, quite, नितान्त, एकदम से । विभव=affluence, prosperity. गुणद्विष=hater of merits ; गोचरगतः=वशीभूत, fallen within the ken of or range of.

English Translation :—Who can live happily, when fallen within the range of a mean-minded, villain, who hates all merits, who has obtained affluence by chance, who has quite totally forgotten his own former mode of living by nefarious deeds, who is all unbridled and who has aggrandised the entire class of knaves.

हिन्दी अनुवाद—जो नीच सर्व-गुण-द्वेषी है और जो संयोगवश विभव पाये हुए है, जो अपनी पहले की अधम कर्मवृत्ति को एकदम भूल बैठा है, जो उच्छृङ्खल है, और जिसने खल-मण्डली का गौरव बढ़ा दिया है (प्रोत्साहन द्वारा अथवा अपनी उन्नति द्वारा) उस नीच की पहुँच के भीतर—उसके वश में रह कर—कौन सुख से रह सकता है ॥५०॥

व्याख्या—उद्भासिताः प्रकाशिताः गौरवान्विताः कृताः अखिलाः खलाः येन तस्य। अधिकारप्रदानेन पुरस्कृताशेषदुर्जनस्य इत्यर्थः। अथवा

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वोन्नत्या सकलखलमण्डली येन गौरवान्विता कृता। तथा विशृङ्खलस्य उच्छृङ्खलस्य स्वच्छन्दगतेः। तथा प्रोद्गाढम् अतितराम् यथा तथा विस्मृता निजा स्वकीया अधमकर्मवृत्तिः प्राक्तननीचकर्म जीविका-निर्वाहः येन तस्य। तथा दैवात् संयोगात् अदृष्टवशात् अवाप्तविभवस्य प्राप्तलक्ष्मीकस्य लब्धैश्वर्यस्य। गुणद्विषः गुणनिन्दकस्य अस्य पूर्वोक्तस्य नीचस्य पुरुषस्य कस्यचित् गोचरगतैः विषयवासिभिः कैः जनैः सुखम् सुखपूर्वकम् सानन्दम् च आस्यते स्थीयते कैरपि न इति भावः। अतः नीचजनस्य दूरे एव स्थातव्यम् काव्यलिङ्गमलंकारः। वसन्ततिलकं-वृत्तम्।

NOTES :—1. उद्भासित etc:—अखिलाः खलाः (कर्मधा) उद्भासिताः अखिलखलाः येन सः (ब० व्री०)। who has brightened or aggrandised the entire class of ruffians; himself a scoundrel of first rank, he has brought credit, by the example of his own prosperity, to the whole of his class. It may also mean, "He has encouraged the entire ruffian class by giving them power, by promoting and rewarding them, in various ways.

2. विश्रृङ्खलस्य—विगता श्रृङ्खला विधिनिषेधरूपा यस्य सः (ब० व्री०)।

3. प्रोद्गाढ etc:—प्रोद्गाढम् यथा तथा विस्मृता प्रोद्गाढविस्मृता (२या तत्)। अधमानि कर्माणि अधमकर्माणि (कर्मधा)। अधम-कर्मभिः वृत्तिः जीविकानिर्वाहः इति अधमकर्मवृत्तिः (३या तत्); निजा अधमकर्मवृत्तिः (कर्मधा०); finally प्रोद्गाढविस्मृता निजाधम-कर्मवृत्तिः येन सः (ब० व्री०) प्रोद्गाढविस्मृतनिजाधमकर्मवृत्तिः तस्य। गाह्+क्त=गाढ; वृत्+क्तिन्=वृत्तिः।

4. अवाप्तविभवस्य—अवाप्तः विभवः येन सः। The word अवाप्त is connected in sense with दैवात्। As such it should

Digitization by Arya Samaj Charitable Foundation, Chennai

be compounded with it, but not so here. Why ? Ans. सापच्छेत्वेऽपि गमकत्वात् समासः । Connection is clear and so compounding with other words is permissible.

5. गुणद्विषः—गुणान् द्वेष्टि इति गुण+द्विष्+क्विप् गुणद्विष् ; तस्य ।

6. गो+चर+घ=गोचरः, गोचरं गतः इति (२या तत्) ।

7. सुखम्—क्रियाविशेषणे द्वितीया । included in कर्मणि द्वितीया । सुखं यथा तथा ।

8. Fig. is काव्यलिङ्ग as the cause of not living happily has been given before.

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमुपैति पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥ ५१ ॥

अन्वयः—आरम्भगुर्वी, क्रमेण क्षयिणी ; पुरा लघ्वी, पश्चात् वृद्धिम् उपैति । दिनस्य पूर्वार्धपरार्धभिन्ना छाया इव खलसज्जनानाम् मैत्री ।

Words :—पूर्वार्ध—first half, पहिली वेला । परार्ध=second half, afternoon, दूसरी वेला ।

English Translation :—The friendship of the wicked and the good people differs like the shadow in the first and the second half of the day (respectively)- (wickedman's friendship) is great in the beginning but gradually it wanes, (goodman's friendship) is at first small but it increases afterwards.

हिन्दी अनुवाद—आरम्भ में बड़ी फिर धीरे-धीरे छोटी होने वाली पहले छोटी पर पीछे धीरे-धीरे बढ़ने वाली—पूर्वाह्ण और अपराह्ण काल की छाया की जैसी—खल और सज्जनों की मित्रता होती है ॥५१॥

Digitization by Arya Samaj Charitable Foundation, Chennai

व्याख्या :—दिनस्य दिवसस्य पूर्वार्धपरार्धाभ्यां भिन्ना पृथग्विधा छाया आरम्भे गुर्वी वृहती, क्रमेण कालक्रमेण यथा दिवसः वर्द्धते तथा क्षयिणी क्षयशीला। पुरा प्रारम्भे लध्वी सूक्ष्मा, ह्रस्वा पश्चात् अनन्तरं वृद्धिम् उपैति वर्धते। तद्वत् खलसज्जनानां मैत्री च भवति। सरलार्थः—यथा दिनस्य पूर्वार्धे आरम्भकाल छाया वृहती अस्ति अनन्तरं क्रमेण क्षयिणी भवति तथैव दुर्जनस्य मैत्री आरम्भे महती स्यात् पश्चात् च क्रमेण स्वल्पात् स्वल्पतरा भवति। आरम्भे वर्धते अन्ते क्षोभते च। विपरीता तु सुजनमैत्री। यथा अपराह्णकाले छाया प्राक् लध्वी सती क्रमेण वर्धते तथैव सज्जनानां मैत्री आरम्भे लध्वी भवति परन्तु कालक्रमेण अनुदिनं वर्धते।

NOTES :—1. दिनस्य—Connected with पूर्वार्धः and परार्धः as they are the parts of the day.

2. पूर्वार्ध etc. :—पूर्वः अर्धः इति पूर्वार्धः, परः अर्धः परार्धः Both कर्मधारय। "अर्धं नपुंसकम्" says "अर्ध in neuter, meaning exact half" (समांशवाची) is compounded with its षष्ठ्यन्त अवयविन्। यथा अर्धं गृहस्य इति अर्धगृहम्। क्लीबे किम् ग्रामस्य अर्धः ग्रामार्धः। अत्र अर्द्धशब्दः अंशवाची एव पूर्वार्धः and परार्धः do not mean "exact first half and exact second half". They mean "first part and second part of the day." पूर्वार्धश्च परार्धश्च इति पूर्वार्धपरार्धौ (द्वन्द्वः) ; ताभ्याम् भिन्ना इति (३या तत्)।

3. आरम्भगुर्वी—आरम्भे गुर्वी इति (७मी तत्) गुरु+ङीप् (वोतो गुणवचनात्) ; गुरु or गुर्वी both forms in feminine.

4. क्षयिणी—क्षेतुं शीलं यस्याः सा क्षि+णिनिः+स्त्रियां ङीप्= क्षयिणी।

5. क्रमेण—करणे ३या।

6. खलसज्जनानाम्—खलाश्च सज्जनाश्च खलसज्जनाः (द्वन्द्वः) तेषाम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

7. Fig यथासंख्यालंकारः and उपमालंकारः—Expl. :—The shadow of a thing is great in the morning but it goes on decreasing as the day advances. Similarly the friendship of the wicked is great in the beginning but it diminishes as time passes by; just opposite is the case of the friendship of the good. It is like the shadow of the second part of the day. As in the afternoon, shadow first remains small but it goes on increasing as the evening approaches. Similarly the friendship of the good people is at first small, but it goes on increasing as the time goes on. The verse nicely describes the *friendship* we find in the World.

मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनाम्
लुब्धकधीवरपिशुना निष्कारणमेव वैरिणो जगति ॥ ५२ ॥

अन्वय :—तृणजलसंतोषविहितवृत्तीनाम् मृगमीनसज्जनानाम् लुब्धकधीवरपिशुनाः जगति निष्कारणम् एव वैरिणः ।

Words :—संतोष = Contentment ; वृत्तिः = living, livelihood जीविका । लुब्धक = व्याधः, hunter ; धीवर = मछुआ, fisherman ; पिशुन = back-biter, informer. चुगलखोर ।

English Translation :—The hunter, the fisherman and the back-biter, are in this world the enemies without any cause of the deer, the fish and the good people living on grass, water and contentment respectively.

हिन्दी अनुवाद—मृग, मीन और सज्जन, घास जल और संतोष से अपनी जीविका प्राप्त करते हैं, पर व्याध, मछुआ और चुगलखोर बिना कारण ही उनसे क्रमशः वैर करते हैं ॥ ५२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

व्याख्या—तृणं च जलं च संतोषश्च तृणजलसंतोषाः घासाम्बुमनस्तुष्टयः, तैः विहिता कल्पिता वृत्तिः येषां तेषाम्। न तु परपरितापोपजीविनाम् इत्यर्थः। मृगाश्च मीनाश्च सज्जनाश्च तेषाम् हरिणमत्स्यसाधूनाम्; लुब्धकश्च धीवरश्च, पिशुनश्च व्याधजालिकसूचकाः जगति संसारे निष्कारणम् कारणं विनापि निर्हेतुकमेव वैरिणः विद्वेषिणः शत्रवः भवन्ति। घातुकाः सन्ति इत्यर्थः। तृणेन विहितवृत्तीनां मृगाणां लुब्धकाः निष्कारणवैरिणः इत्यादि यथाक्रमान्वयात् यथासंख्यालंकारः। आर्यावृत्तम्।

NOTES:—1. तृणजल etc.:—तृणं च जलं च संतोषः च तृणजलसंतोषाः (द्वन्द्वः); तैः विहिता (३या तत्); तृणजलसंतोषविहिता; तादृशी वृत्तिः येषां ते तृणजलसंतोषविहितवृत्तयः (ब० व्री०); तेषाम्। सम्बन्ध षष्ठी connected with वैरिणः सम्+तुष+घञ्=संतोषः। वृत्+क्तिन्=वृत्तिः। वि+धा+क्त (कर्मणि)=विहित।

2. मृगमीनसज्जनानाम्—मृगाश्च मीनाश्च सज्जनाश्च (द्वन्द्वः)। सत्+जनाः=सज्जनाः। त् changes to ज्।

3. लुब्धक etc.:—लुब्धकश्च धीवरश्च पिशुनश्च (द्वन्द्वः) लुब्धकधीवरपिशुनाः।

4. निष्कारणम्:—निर्नास्ति कारणं यस्य तत्। निष्कारणम् यथा स्यात् तथा। (क्रिया विशेषणे द्वितीया)।

5. वैरिणः—वैरम् अस्यास्ति इति वैर+इनिः=वैरिन्।

6. Figure is यथासंख्यम्। As the hunter, the fisherman and the back-biter are the enemies respectively of the deer, the fish and the good *i. e.* the hunter is the enemy of the deer, the fisherman of the fish and the back-biter of the good, so the figure of speech is यथासंख्यम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ सुजनपद्धतिः ।

वाञ्छा सज्जनसंगतौ परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खलै
रेते येषु वसन्ति निर्मलगुणास्तेभ्यो महद्भ्यो नमः ॥ ५३ ॥

अन्वय :—सज्जनसंगतौ वाञ्छा, परगुणे प्रीतिः गुरौ नम्रता, विद्यायां व्यसनम्; स्वयोषिति रतिः, लोकापवादात् भयम्, शूलिनि भक्तिः, आत्मदमने शक्तिः, खलैः सह संसर्गमुक्तिः, एते निर्मलगुणाः येषु वसन्ति तेभ्यः महद्भ्यः नमः ।

Words :—वाञ्छा = desire ; प्रीति = joy, gratification ; नम्रता = humility ; व्यसन = addiction ; close application ; योषित् = wife ; शूलिन् = शिव ; आत्मदमन = self-control ; खल = the wicked, ruffian दुष्ट ; महत् = great, the great souls.

English Translation :—Salutation to the great souls, in whom dwell the following sterling virtues :—desire for the company of the good, gratification at the quality of others, humility towards superiors, love of learning or close application to learning, attachment to one's own wife, fear from public scandal, devotion to Lord Siva, power in self-control, and avoidance of the contact with wicked men.

हिन्दी अनुवाद—जिनको सज्जनों की संगति की चाह है, और जो दूसरों के गुण से प्रेम रखते हैं, बड़े-बूढ़ों के प्रति जो नम्र बने रहते हैं, जिन्हें विद्या में व्यसन है—विद्योपार्जन में जो लगे रहते हैं, अपनी स्त्री से जिन्हें प्रेम रहता हैं, लोकनिन्दा से जो डरते हैं, शिव में जिनकी भक्ति रहती

Digitization by Arya Samaj Charitable Foundation, Chennai

हैं और जो आत्म-दमन करते हैं - अपनी इन्द्रियों को वश में रखते हैं ; जो खलों की संगति से दूर भागते हैं। ये निर्मलगुण जिन महापुरुषों में विद्यमान हैं हम उन महात्माओं को प्रणाम करते हैं ॥ ५३ ॥

व्याख्या—सज्जनसंगतौ साधुसमागमे वाञ्छा अभिलाषः। न तु त्यक्तुमिच्छा। "महत्सेवा द्वारमाहुर्विमुक्तेः" इत्युक्तम् श्रीभागवते। परेषां गुणे प्रीतिः संतोषः आनन्दः। न तु परगुणे छिद्रान्वेषणम्। गुरौ विद्योपदेष्टरि सर्वेषु मातृपितृगुरुजनेषु नम्रता विनयशीलता। गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः, गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः" इति श्रुतिस्मृती। विद्यायां वेदान्तादिविद्याभ्यासे व्यसनम् आसक्तिः। न तु द्यूतक्रीडादौ। स्वयोषिति निजदारेषु रतिः आसक्तिः। न तु परदारेषु वेश्यादिषु वा। लोकापवादात् लोकनिन्दायाः भयम्। न तु निर्लज्जत्वम्। यथोक्तं भगवता श्रीरामचन्द्रेण "लोकापवादो बलवान् मतो मे"। शूलिनि शिवे भक्तिः श्रद्धानुरागः। न तु क्षुद्रदैवतेषु भूतप्रेतेषु। आत्मदमने आत्मसंयमे शक्तिः सामर्थ्यम्। खलैः दुर्जनैः सहसंसर्गमुक्तिः सङ्गत्यागः। न तु दुर्जनसंसर्गाभिलाषः। "दुर्जनोदूरतस्त्यजेत्" दुर्जनः परिहर्तव्यः इत्यादि वचनात्। इति एते निर्मलाः निष्कलङ्काः गुणाः येषु महाजनेषु वसन्ति तेभ्यः महात्मभ्यः नमः मम शतशः प्रणामाः सन्तु। शार्दूलविक्रीडितम्।

NOTES :—1. सज्जनसंगतौ—सज्जनानां संगतिः (षष्ठी तत्)। तस्याम्। विषयाधिकरणे ७ मी। सत् + जन = सज्जन।

2. परगुणेः—परेषां गुणः (६ ठी तत्) तस्मिन्। विषयाधिकरणे ७ मी।

N. B. :—विषयाधिकरणे ७ मी in all the words having सप्तमी in this verse.

3. लोकापवादात्—लोकानाम् अपवादः (ष० त०) ; तस्मात् भीत्रार्थानां भयहेतुः। अनेन अपादाने पञ्चमी।

4. खलैः—सहयुक्ते अप्रधाने तृतीया। खलैः सह इत्यर्थः। "विनापि सहार्थशब्दयोगं तृतीया" यथा वृद्धो यूना आगच्छति।

Digitization by Arya Samaj Charitable Foundation, Chennai

5. संसर्गमुक्तिः—संसर्गस्य मुक्तिः (ष० त०)। सम्+सृज्+घञ्=संसर्गः। मुच्+क्ति=मुक्तिः।

6. निर्मलगुणाः—निर्नास्ति मलं यस्मिन् सः निर्मलः (ब० व्री०)। निर्मलाः गुणाः (कर्मधा)।

7. महद्भ्यः—"नमः स्वस्तिस्वाहास्वधालंवषट् योगाच्च" अनेन नमः योगे चतुर्थी।

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः
यशसि चाभिरतिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥५४॥

अन्वय—विपदि धैर्यम् अथ अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि अभिरतिः, श्रुतौ व्यसनं च, इदं हि महात्मनाम् प्रकृति-सिद्धम् हि।

WORDS :—अभ्युदय = prosperity तरक्की। सदस्=सभा, assembly. विक्रम = valour. अभिरति = अभिलाष earnest desire ; व्यसन आसक्ति, अनुराग = devoted application, addiction.

English Translation :—Fortitude in adversity, forgiveness during prosperity, eloquence in an assembly, valour in battle, great liking for fame, devoted application to vedic study, all these are natural with the high-souled people.

हिन्दी अनुवाद—विपत्ति में धैर्य रखना, उन्नति में लोगों पर क्षमा दर्शाना, सभा में चतुराई से बोलना, लड़ाई में पराक्रम दिखाना, यश में रुचि रखना—यश पाने की चाह रखना, वेदशास्त्र में लवलीन रहना—ये सब गुण महात्माओं में स्वभाव ही से सिद्ध होते हैं—अर्थात् अपने आप आ जाते ॥ ५४ ॥

व्याख्या—विपदि आपत्काले धैर्यं स्थिरचित्तता न तु दैन्यम्। मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु इति। अथ अनन्तरम् अभ्युदये

Digitization by Arya Samaj Charitable Foundation, Chennai

संपदि क्षमा सहिष्णुता । न तु उद्दण्डता । सदसि राजसभायाम् वाक्पटुता वाक्चातुर्यम्, युधि संग्रामे विक्रमः पराक्रमः, यशसि कीर्त्याम् अभिरतिः संग्रहाभिलाषः । न तु अनादरः । श्रुतौ वेदशास्त्राभ्यासे व्यसनम् आसक्तिः । न तु ग्लानिः । इति इदं सर्वम् महात्मनाम् महानुभावानाम् प्रकृतिसिद्धम् स्वभावसिद्धम् हि । द्रुतविलंवित वृत्तम् ।

NOTES :—1. विपदि, अभ्युदये, सदसि युधि यशसि and श्रुतौ have अधिकरणे ७ मी । धीरस्य भावः धैर्यम् धीर+ष्यञ् । अभि+उद्+इ+अच् । क्षम्+अङ्+स्त्रियाँ टाप् (षिद्भिदादिभ्योऽङ्) = क्षमा ।

2. इदम्—" नपुंसकम् अनपुंसकेन एकवत् च अन्यतरस्याम् " When several words of various genders come together then the common word referring to them all is neuter and the number may be optionally singular. We may have इमानि as well here.

3. महात्मनाम्—महान् आत्मा येषां ते महात्मानः (ब० व्री०) । तेषाम् ।

4. प्रकृतिसिद्धम्—प्रकृत्या सिद्धम् इति (३या तत्) ।

N. B.—भर्तृहरि seems to have great regard for the Vedas. This clearly shows that he was not a Buddhist. In the last verse, he speaks of the devotion to Lord Siva. This also lends support to his being a follower of Hindu religion. History reveals that in the 7th or 8th Cen. A. D. Buddhism was being assimilated into Hinduism. King Harshaavardhan is the best example, who had joined in him Hinduism and Buddhism both together.

Digitization by Arya Samaj Charitable Foundation, Chennai

करे श्लाघ्यस्त्यागः शिरसि गुरुपाद प्रणयिता
मुखे सत्या वाणी विजयि भुजयोर्वीर्यमतुलम् ।
हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयो-
र्विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ५५ ॥

अन्वयः—करे श्लाघ्यः त्यागः, शिरसि गुरुपादप्रणयिता, मुखे सत्या वाणी, भुजयोः विजयि अतुलम् वीर्यम्, हृदि स्वच्छा वृत्तिः श्रवणयोः च अधिगतम् श्रुतम्. इदम् ऐश्वर्येण विना अपि प्रकृतिमहताम् मण्डनम् अस्ति ।

Words :—त्याग—gift, giving, charity ; श्लाघ्य= praiseworthy, laudable (प्रशंसनीय) । प्रणयिता =submission, *humility* ; obeisance. वृत्ति=conduct, state ; action. अधिगत=प्राप्त obtained, earned श्रुत=शास्त्रज्ञान holy knowledge. Sacred lore.

English Translation :—Praiseworthy charity is the ornament for the hand; obeisance to the feet of elders for the head ; truthful speech for the mouth ; the peerless victorious prowess for the hands ; limpid state or (clear action) for the heart, sacred lore obtained for the ears ; all these are the ornaments of persons, great by nature, even though they possess no wealth.

हिन्दी अनुवाद—शुभदान हाथ का भूषण है, गुरुजनों के पदों पर प्रणाम करना शिर का, सत्य वचन मुख का, अतुल वीरता भुजाओं का, निर्मल वृत्ति हृदय का और ज्ञान-प्राप्ति कानों का भूषण है। बिना ऐश्वर्य के ही ये सब स्वभाव से जो बड़े होते हैं उन महापुरुषों के लिये भूषण हैं ॥५५॥

व्याख्या—करे हस्ते श्लाघ्यः प्रशस्तः त्यागः दानम् मण्डनम् । न तु कङ्कणम् । "दानेन पाणिर्न तु कंकणेन" वक्ष्यमाणत्वात् । शिरसि मस्तके

Digitization by Arya Samaj Charitable Foundation, Chennai

गुरूणां पूज्यानां मातृपितृगुरूणाम् पादयोः चरणयोः प्रणयिता नम्रता अभिवादनम् मण्डन् । न तु मणिमाणिक्यकोटीरादि । मुखे वदने सत्या यथार्था सुनृता वाणी वाचा भाषणम् मण्डनम् । न तु ताम्बूलचर्वणादि । भुजयोः : बाह्वोः अतुलम् अनुपमम् विजयि विजयशीलं वीर्यम् वलम् मण्डनम् । न तु केयूरादि । हृदि अन्तरंगे हृदये स्वच्छा निर्मला वृत्तिः व्यापारः मंडनम् । न तु हाररुचकादि । श्रवणयोः कर्णयोः अधिगतं प्रातम् अधीतं श्रुतम् शात्रं मण्डनम् । न तु कुण्डले । "श्रोत्रं श्रुतेनैव न कुण्डलेन" इत्यन्यत्र । इदम् पूर्वोक्तं सर्वम् ऐश्वर्येण धनरत्नसम्पत्त्या विनापि प्रकृत्या महताम् महात्मनाम् मण्डनम् भूषणम् अस्ति । विभावनालंकारः । शिखरिणी वृत्तम् ।

N. B.: —All words in सप्तमी have अधिकरणे ७ मी ।

NOTES :—1. श्लाघ्यः—श्लाघ्+ण्यत् (ऋहलात् ण्यत्) श्लाघ्भ्वादि० आ० श्लाघते ।

2. गुरुपादप्रणयिता—गुरूणा पादाः (षष्ठी तत्) तेषु प्रणयिता (७ मी तत्) । प्रणयिता = reverence, obeisance.

3. विजयि—Qual. वीर्यम् the victorious prowess. It may also be construed along with भुजयोः the विजयिभुजयोः अतुलं वीर्यम् peerless prowess for the victorious ones arms. विजयि then qualifies भुजयोः ।

4. हृदि—हृदि Loc. sin of हृदय ; optional form of हृदये । हृदय becomes optionally हृद् in all विभक्तिs from शस् to सुप् *i. e.* from द्वितीया-बहुवचन to सप्तमी बहुवचन । There is a separate word हृद् but it is rarely used.

5. हृदि स्वच्छा वृत्तिः—(*a*) limpid state is regarded as a qualification of heart. Clear heart is a qualification (*b*) वृत्ति may mean " behaviour, action, conduct." Then it

Digitization by Arya Samaj Charitable Foundation, Chennai

means clear action (free from any diplomacy) is an ornament for heart.

6. श्रुतम्—It means "holy knowledge, sacred lore. "श्रुतं शास्त्रावधृतयोः" इति विश्वः । so श्रुतम् means शास्त्रज्ञान *cf.* "श्रोत्र श्रुतेनैव न कुण्डलेन infra.

7. ऐश्वर्येण—पृथग्विनानानाभिःतृतीया अन्यतस्याम् अनेन विनायोगे ३या । ईश्वरस्य कर्म भावो वा ईश्वर + ष्यञ् = ऐश्वर्यम् । ईश + वरच् by "स्थेशभासपिसकसो वरच्" ।

8. प्रकृतिमहताम्—प्रकृत्या महान्तः (३ या तत्) ; तेषाम् ।

9. इदम्—refers to all words in प्रथमा sing. gone before. So it is neuter singular by "नपुंसकम् अनपुंसकेन एकवत् च अन्यतरस्याम्" । See last verse.

10. Figure is विभावना । "क्रियायाः प्रतिषेधेऽपिफलव्यक्तिः विभावना" K. P. X. ऐश्वर्ये अविद्यमाने अपि मण्डनम् । अतः विभावना ।

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥ ५६ ॥

अन्वय :—प्राणाघातात् निवृत्तिः, परधनहरणे संयमः, सत्यवाक्यम्, काले शक्त्या प्रदानम्, परेषाम् युवतिजनकथामूकभावः, तृष्णास्रोतोविभङ्गः गुरुषु विनयः, सर्वभूतानुकम्पा, एषः सर्वशास्त्रेषु सामान्यः अनुपहतविधिः, श्रेयसाम् पन्थाः ।

Words :—प्राणाघात = Killing any life (जीवहिंसा) निवृत्ति = refraining, cessation मूकभाव = silence (चुप्पी) । स्रोत = current, stream धारा । विभङ्ग = Checking, restraining ;

Digitization by Arya Samaj Charitable Foundation, Chennai

अनुकम्पा = दया compassion, kindness ; सामान्य = equal or (common to all shastras). विधिः नियम operation or application, rule अनुपहत = बाधारहित unobstructed ।

English Translations :—Refraining from killing a life, restraint over the stealing of others' wealth, true words, charity at right time according to one's might, maintaining silence during the time of talks of others' wives, check over the current of desire, modesty to elders, kindness to all creatures,—all this is the path to blessings (of all kinds) common to all the scriptures—a path that never fails in its operation (violates no other rules).

हिन्दी अनुवाद—जीव-हिंसा से अलग रहना, पराये की संपत्ति को ले लेने से परहेज करना, सच्चीबात बोलना, समय समय पर यथाशक्ति दान देना, औरों की स्त्री की चर्चा होते समय चुप रहना, तृष्णास्रोत को रोकना, गुरु-जनों के प्रति विनय दिखाना, सब जीवों पर दया करना । यह कल्याण-मार्ग सब शास्त्रों में सामान्य है, यह किसी भी नियम का विरोध नहीं करता ॥ ५६ ॥

व्याख्या—प्राणाघातात् जीवहिंसायाः निवृत्तिः निवर्तनम् च । "अहिंसा परमो धर्मस्त्वधर्मः प्राणिनां वधः" "मा हिंस्यात् सर्वभूतानि" इति वचनात् । परधनहरणे परवित्तापहरणे संयमः मनोरोधः । (परद्रव्याणि लोष्टवत्' इति न्यायात् । सत्यवाक्यम् सुनृतम् वचनम् च । काले उचिते समये शक्त्या यथाशक्ति स्वशक्त्यनुकूलम् दानं धनत्यागः परेषाम् अन्येषाम् युवतिजनकथायां परस्त्रीवृत्तान्तकथने मूकभावः तूष्णीकत्वम् च । तृष्णा धनलिप्सा तस्याः स्रोतः प्रवाहः तस्य विभंगः निरोधः तृष्णाधारा-निरोधः च गुरुषु पूज्यपादेषु च विनयः शालीनता नम्रता च । सर्वेषु सकलेषु भूतेषु जीवेषु अनुकम्पा दया । सर्वजीवदया । एषः सर्वशास्त्रेषु

Digitization by Arya Samaj Charitable Foundation, Chennai

वेदवेदान्तादिसकलागमेषु सामान्यः समानः अनुपहतविधिः अलुप्तनियमः श्रेयसां मंगलानां पन्थाः मार्गः । स्रग्धरा वृत्तम् ।

NOTES :—1. प्राणाघातात्—प्राणानाम् आघातः (ष० त०) ; तस्मात् अपादाने पंचमी by "जुगुप्साविराम प्रमादार्थानाम् उपसंख्यानम्" Here विराम—cessation—Therefore अपादानम् । प्राण is always masculine plural, आ + हन् + घञ् = आघात ।

2. परधनहरणे—परेषां धनं (ष० त०) तस्य हरणम् (ष० त०) तस्मिन् । अधिकरणे ७ मी ।

3. शक्त्या—करणे ३ या । शक् + क्तिन् = शक्तिः ।

4. युवतिजन etc. :—युवतयः एव जनाः युवतिजनाः (मयूरव्यंसकादित्वात् रूपकरूपः समासः) । तेषां कथाः (ष० त०) तासु मूकभावः (७ मी तत्) जन means here collection *cf.* अनार्यं परकलत्र-वर्णनं श्रोतुम् Sakuntala. V.

N. B.—युवति is connected in sense with परेषाम् and so they should have been compounded together like परयुवतिजन etc. but not so here, as the connection between these words is clear (गमक) & so समास according to सापेक्षत्वेऽपि गमकत्वात् समासः ।

5. तृष्णास्रोतोविभंगः—तृष्णायाः धनलिप्सायाः स्रोतः धारा (ष० त०) तस्य विभङ्गः (ष० त०) ; तृष्णा = strong desire, here, covetousness, greed etc.

6. गुरुषु = विषयाधिकरणे ७ मी ।

7. सामान्य—स्वार्थे ष्यञ् = समान + ष्यञ् । equal common to.

8. एषः By "नपुंसकमनपुंसकेन एकवत् चान्यतरस्याम् applies Hence singular एषः । Why masculine, why not neuter acc. to नपुंसक etc ? विधेयप्राधान्यात् लिंगता According to पन्थाः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

9 अनुपहतविधिः—न उपहतः इति अनुपहतः (नञ् तत्) अनुपहतः विधिः यस्य सः (ब० व्री०) ; whose application (operation) is unobstructed *i. e.* which never fails to produce the desired effect. "Which violates no rules or ordinance" Telang.

संपत्सु महतां चित्तं भवेदुत्पलकोमलम्
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥ ५७ ॥

अन्वय :—संपत्सु महताम् चित्तम् उत्पलकोमलम् भवेत् । आपत्सु च महाशैलशिलासंघातकर्कशम् भवेत् ।

English Translation—During prosperity, the mind of the magnanimous becomes soft like a lotus while in adversity, it becomes hard like a solid mass of rocks of a great mountain.

हिन्दी अनुवाद—संपत्ति में बड़ों का चित्त कमल के जैसा कोमल रहता, पर जब विपत्ति आ धमकती तब वही (उत्पलकोमल) चित्त महाशैल की चट्टान के समान कड़ा हो जाता है ॥ ५७ ॥

व्याख्या—संपत्सु समृद्धिषु महताम् महात्मनां चित्तम् मनः उत्पलम् कमलम् इव कोमलम् मृदुलम् भवेत् । आपत्सु विपत्तिषु संकटेषु महाशैलः महापर्वतः तस्य शिलासंघातः पाषाणकूटः महाशैलशिलासंघातः इव कर्कशम् कठोरम् च भवेत् । विवेकिनाम् अविवेकिनाम् च अयमेव पन्थाः आदरणीयः इति तात्पर्यम् । उपमालंकारः । अनुष्टुभवृत्तम् ।

Notes :—1. संपत्सुः—अधिकरणे ७ मी । सम् + पद् + क्विप् ।

2. उत्पलकोमलम् – उत्पलम् इव कोमलम् (उपमित समास) by उपमित व्याघ्रादिभ्यः सामान्याप्रयोगे ।

3. महाशैल etc. :—महान् शैलः महाशैलः (कर्मः) तस्य शिलासंघातः (ष० त०) महाशैलशिलासंघातः इव कर्कशम् (उपमितसमास)

Digitization by Arya Samaj Charitable Foundation, Chennai

See above शिलानां निचयः इति शिला + अण् = शैलः । शिलानां संघातः dense line (ष० त०) *i. e.* dense mass of rock. सम् + हन् + घञ् = संघातः ।

प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ५८ ॥

अन्वय—प्रच्छन्नाम् प्रदानम्, गृहम् उपगते सति संभ्रमविधिः, प्रियम् कृत्वा मौनम्, सदसि उपकृतेः अपि कथनम्, लक्ष्म्याम् अनुत्सेकः, निरभिभवसाराः परकथाः इति इदम् विषयम् असिधाराव्रतम् सताम् केन उद्दिष्टम् ।

Words—प्रच्छन्न = well-concealed ; संभ्रम = respect (आदर) or, haste ; उपकृति = उपकार, benefit, good ; अनुत्सेक = non-arrogance ; उत्सेक = arrogance, vanity. अभिभव = insult, contempt ; सार = gist, essence ; निरभिभवसाराः कथाः—Conversations about others, even the gist of which is free from insult. उद्दिष्ट = उपदिष्ट was taught.

English Translation—By whom was taught to the good, this course of conduct, difficult like the walking on the sharp edge of a sword.—Charity well-concealed, quick reception to one come to their house, silence after doing good, proclaiming publicly in assembly the benefit done (to them by others), non-arrogance in prosperity, conversations about others, free even in essence from any insult.

हिन्दी अनुवाद—गुप्तदान करना, घर आये जनों का सत्कार करना, लोगों की भलाई करके चुप रहना—किसी से न कहना, किसी के उपकार

Digitization by Arya Samaj Charitable Foundation, Chennai

करने पर सभा-समाज में इसकी खूब घोषणा करना, धन पाकर गर्व नहीं करना, दूसरों के बारे में बोलते समय किसी तरह का अपमान नहीं दिखाना—किसने सज्जनों को ऐसा विषम असिधाराव्रत सिखाया ?—किसने सज्जनों को तलवार की धार पर चलने के समान यह कठिनव्रत सिखाया ?—॥ ५८ ॥

व्याख्या—प्रच्छन्नं प्रदानं गुप्तदानम्, न तु प्रकाशम्। गृहं निजगेहम् उपगते आगते सति, अर्थिनि इति शेषः, संभ्रमविधिः संभ्रमेण त्वरया विधिः सत्कारः न तु वैमुख्यम्। प्रियम् उपकारम् अभीष्टम् कृत्वा मौनं तूष्णींभावः। न तु पटनादेन स्वकृतोपकारघोषणम्। "न दत्त्वा परिकीर्तयेत्" इति मनुवचनात्। सदसि राजसभायाम् उपकृतेः परकृतोपकार-प्रख्यायनम् च। न तु तत्र तूष्णींशीलत्वम्, अन्यथा कृतघ्नता स्यात्। लक्ष्म्यां सत्पत्तौ अनुत्सेकः गर्वराहित्यम्, न तु मदान्धता। "भोगेषु अनुत्सेकिनी" कालिदासवचनात्। निरभिभवसाराः अनिन्दापराः परकथाः अन्यलोकप्रसंगाः च—। इति इदम् एतत् सर्वम् विषमम् दुष्करम् असिधाराव्रतम् सताम् सत्पुरुषाणाम् केन् उद्दिष्टम् उपदिष्टम्। न केनापि इत्यर्थः। स्वतः सिद्धमिदं सज्जनानाम् इति भावः। समुच्चयालंकारः। शिखरिणीवृत्तम्।

NOTES :—1. उपगते—Qual. अर्थिनि understood ; भावे ७मी।

2. संभ्रमविधिः—(*a*) संभ्रमस्य (आदरस्य) विधिःक्रिया ; rite or ceremony of honour. (षष्ठी तत्)। (*b*) संभ्रमेण त्वरया विधिः अभ्युत्थानाभिवादनादिसत्कारक्रिया (३या तत्)। "संभ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपि" इति मेदिनी। Quick reception.

3. उपकृतेः च अपि कथनम्—Proclaiming the good done to them by others in big assembly *i. e.* publicly. Good people donot speak of the good they do to others, but they announce loudly the good done to

Digitization by Arya Samaj Charitable Foundation, Chennai

them by others. Just opposite is the case with bad people. उप+कृ+क्तिन्।

4. अनुत्सेकः—न उत्सेकः गर्वः इति (नञ् तत्)। "संपत्सु अनुत्सेकिनः" "भोगेषु अनुत्सेकिनी" कालिदासः।

5. निरभिभव etc. :—निर्गतः अभिभवः तिरस्कारः यस्मात् सः निरभिभवः (ब० व्री०)। निरभिभवः सारः यासाम् ताः ; निरभिभवसाराः (परकथाः) बहुव्रीहिः। Talks about others whose essence (gist) also was free from any insult to them। अभि+भू+अप्=अभिभवः। सृ+घञ्=सारः। "सृ स्थिरे घञ्।"

6. सताम्—विवक्षया षष्ठी should be सद्भ्यः।

7. असिधाराव्रतम्—It is explained in three ways (*a*) As Malli explains it in his commentary on Raghu XIII. 67. "युवा युवात्या सार्द्धं यन्मुग्धभर्तृवदाचरेत्। अन्तर्निवृत्त-सङ्गः स्यादासिधारव्रतं हि तत्" इति यादवः। इदं चासिधाराचक्रमेण (moving on) तुल्यत्वात् असिधाराव्रतमिदमुक्तम्। (*b*) असिधारा-शयनमिव दुष्करं व्रतम्–vow difficult like the lying down on the sharp edge of a sword. (*c*) शयने मध्ये खड्गं निधाय स्त्रीपुंसौ यत्र ब्रह्मचर्येण स्वपतः तत्। The husband and the wife sleep together, placing a sharp sword between them and refraining from each other's touch. This explains the extreme difficulty of the course of conduct chosen by the good.

प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरं
त्वसन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः।
विपद्युच्चैर्धैर्यं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्॥ ५६॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्वय—प्रिया न्याय्या वृत्तिः, असुभङ्गे अपि मलिनम् असुकरम्, तु असन्तः न अभ्यर्थ्याः, कृशधनः सुहृद् अपि न याच्यः , विपति उच्चैर्धैर्यम्, महताम् च पदम् अनुविधेयम्—इदम् विषयम् असिधाराव्रतम् सताम् केन उद्दिष्टम् ?

Words :—न्याय्य = just, upright, न्यायपूर्ण ; वृत्ति = course of conduct, व्यवहार ; असु = life, प्राण । भङ्गे = breaking down, नाश । असुभंग = प्राणसंकट, life in danger, risk of life ; अभ्यर्थ्य = to be supplicated, implorable, प्रार्थनीय । उच्चैर्धैर्य = high fortitude ; अनुविधेय = to be followed, अनुकरणीय ।

English Translation—Who has taught good men, the difficult vow, difficult like walking on the sharp edge of a sword,—a course of conduct amiable and just, not doing sinful acts even when life is in danger, never to implore bad people, nor to beg of a friend of slender means, lofty fortitude in adversity, and following in the footsteps of the great.

हिन्दी अनुवाद—सदा न्यायसंगत और मधुर वर्ताव करना, प्राण-संकट आ जाने पर भी पाप-कर्म नहीं करना, दुर्जन से कुछ नहीं माँगना, धनहीन मित्र से भी कुछ नहीं याचना, विपत्ति में खूब धीरज रखना, बड़ों की चरण-सरणी का अनुसरण करना—यह कठिन असिधाराव्रत सज्जनों को किसने सिखाया ? ॥ ५६ ॥

व्याख्या—प्रिया इष्टा न्याय्या न्यायात् अनपेता नीतिप्रवीणा वृत्तिः वर्त्तनम् । असूनाम् प्राणानां भङ्गे नाशे संकटे अपि प्राणसंकटे अपि मलिनम् दुष्कृतम् असुकरम् अकर्त्तव्यम्, तु असन्तः दुर्जनाः न अभ्यर्थ्याः प्रार्थनीयाः । सन्तः तु अभ्यर्थनीयाः । कृशं धनं यस्य कृशधनः क्षीणवित्तः

Digitization by Arya Samaj Charitable Foundation, Chennai

सुहृद् मित्रम् अपि न याच्यः याचितुं योग्यः। विपदि संकटे कृच्छ्रे अपि उच्चैर्धैर्यम् उच्चधैर्यं धारणीयम्। न तु विह्वलत्वम्। महताम् च महानुभावानाम् च पदम् पदक्रमः व्यवसितम् वा अनुविधेयम् अनुकर्तव्यम् इति इदम् एतत् विषयम् कठिनम् दुष्करम् असिधाराव्रतम् सतां सज्जनानां केन जनेन उद्दिष्टम् उपदिष्टम्? शिखरिणी वृत्तम्।

NOTES :—1. प्रिया—प्री+कः+स्त्रियां टाप्। "इगुपधज्ञाप्रीकिरः कः।"

2. न्याय्या—न्यायात् अनपेता इति न्याय+यत् by "धर्मपथ्यर्थन्यायादनपेते" इति यत्। just, upright। नि+अय्+घञ्=

3. असुकरम्—न सुकरम् असुकरम् (नञ् तत्) refers to मलिनम् मलोऽस्यास्ति—मल्+इनिच् meaning sinful acts, black deeds, सु+कृ+खल्=सुकर easy to do "इषेद्दुः सुषु कृच्छ्राकृच्छ्रार्थेषु खल्"।

4. तु पादपूरणे It has been used here uselessly "निरर्थकं तुहीत्यादि पूरणैकप्रयोजनम्।—According to the dictum of वामन "न पादादौ खल्वादयः"—खलु, तु, etc. should not be used in the beginning of a foot; still here. तु is used as निरंकुशाः कवयः।

5. कृशधनः—कृशं धनं यस्य सः (ब० व्री०)। by "अनुपसर्गात् फुल्लक्षीव कृशोल्लाघाः" कृश्+क्त=कृश; त is dropped.

6. सुहृद्—शोभनं हृदयं यस्य सः "सुहृद् मित्रम्। सुहृद्-दुर्हृदौ मित्रामित्रयोः।" Even friend, if poor should not be requested for monetary help, then what to speak of others ?

7. उच्चैर्धैर्यम्—उच्चैः धैर्यम् इति सुप्सुपेतिसमासः। If स्थेयम् then living high above in adversity.

Digitization by Arya Samaj Charitable Foundation, Chennai

8. महतां पदमनुविधेयम्—Tread in the foot-steps of the great. The foot-steps of the great should be followed.

9. असिधाराव्रतम्—See note on last verse.

10. उद्दिष्टम्—Means here उपदिष्टम्, dictated, instructed उद्+दिश् Means to indicate, to denote.

संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं दृश्यते।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्योत्तमगुणः संसर्गतो जायते ॥ ६० ॥

अन्वय—संतप्तायसि संस्थितस्य पयसः नाम अपि न श्रूयते, तत् एव नलिनीपत्रस्थितम् मुक्ताकारतया दृश्यते। तत् अन्तःसागरशुक्तिमध्य-पतितम् मौक्तिकम् जायते, प्रायेण अधममध्यमोत्तमगुणः संसर्गतः जायते।

WORDS—अयस्=iron, लोहा। मुक्ताकार=in the form of a pearl, मोती का रूप। स्वाती=name of one of the 27 नक्षत्र of the year. शुक्ति=सीपी, Oyster; संसर्ग=association.

English Translation—Not even the name of water is heard when it falls upon heated iron; the same water lying on a lotus-leaf appears like a pearl; it grows into a pearl when it falls in the mouth of an oyster during the Swati constellation. Generally, the low, the medium and the high degree of excellence arises from association.

हिन्दी अनुवाद—गरम लोहे पर पड़ने से जल छनछना कर जल जाता, उसका नाम भी नहीं सुना जाता, कमल के पत्ते पर पड़ कर वही मोती के आकार का दिखाई पड़ता, फिर वही समुद्र की सीपियों में पड़

Digitization by Arya Samaj Charitable Foundation, Chennai

कर मोती बन जाता है। प्रायः अधम, मध्यम और उत्तम गुण संसर्ग से ही उत्पन्न होता है ॥ ६० ॥

व्याख्या—संतप्तायसि संतप्ते अग्नितप्ते अयसि लौहापिण्डे संस्थितस्य निक्षिप्तस्य पतितस्य पयसः जलस्य नामापि न श्रूयते लेशमात्रमपि न अवशिष्यते इत्यर्थः। मूलतो ध्वस्तमेव भवति। रूपदर्शनं तु किमु वक्तव्यम् इतिभावः। तत् एव पयः नलिनीपत्रस्थितं पद्मपत्रस्थं सत् मुक्ताकारतया मौक्तिकरूपेण दृश्यते। तत् एव पयः स्वात्यां स्वातीनक्षत्रे सागरशुक्तिमध्ये सागरे समुद्रे या शुक्तिः तस्याः मध्ये उदरे पतितं सत् मौक्तिकं मुक्ता जायते। मुक्तारूपेण परिणमति, अतः प्रायेण प्रायशः भूम्ना अधममध्यमोत्तम-गुणः अधमश्चासौ मध्यमश्च इति अधममध्यमः (खञ्जकुब्जवत्) अधम-मध्यमश्चासौ उत्तमश्च इति अधममध्यमोत्तमः तादृशः गुणः यस्य सः, संसर्गतः संगात् जायते उत्पद्यते। यथाक्रममन्वयात् यथासंख्यमलंकारः। महदाश्रयः एव कर्त्तव्यः। "नीचाश्रयो न कर्त्तव्यः कर्त्तव्यो महदाश्रयः" इति वचनात्। शार्दूलविक्रीडितम्।

NOTES :—1. संतप्तायसि—संतप्तम् अयः (कर्म०) संतप्तायस्, तस्मिन् अधिकरणे ७मी।

2. नामापि न श्रूयते—Even its name is not heard *i. e.* no trace of it is left.

3. मुक्ताकारतया—मुक्तायाः आकारः इव आकारः यस्य तत् मुक्ताकारम् " सप्तम्युपमानपूर्वपदस्य बहुव्रीहिः वाच्यः वोत्तरपदलोपश्च "। उष्ट्रमुखवत् मुक्ताकारस्य भावः मुक्ताकारता, तया करणे ३या।

4. नलिनीपत्रस्थितम्—नलिन्याः पत्रम् (ष० त०) ; तस्मिन् स्थितम् (७मी तत्)।

5. स्वात्याम्—In Swati नक्षत्र *i. e.* while the sun is in conjunction with the constellation. Swati. It is believed by the Hindus that the rain-drop in the स्वाती

Digitization by Arya Samaj Charitable Foundation, Chennai

नक्षत्र falling into the mouth of an oyster turns into pearl, falling into the mouth of a serpent turns into poison, and fallen into a bamboo-cleft, it turns into वंशरोचन।

6. सागरशुक्तिमध्यपतितम्—सागरस्य शुक्तिः (ष० त०) तस्या मध्यम् उदरम् (ष० त०) तस्मिन् पतितम् (७मी तत्)।

7. मौक्तिकम्—मुक्ता एव मौक्तिकम् मुक्ता+स्वार्थे ढक् (विनयादित्वात्)।

8. प्रायेण—प्रायो वाहुल्यतुल्ययोः इति मेदिनी It means भूम्ना वाहुल्येन, in most cases, hence generally see notes on verse 33. Ibid. अधममध्यमोत्तमगुणः—अधमश्चासौ मध्यमश्च (विशेषणोभय पद कर्मधा०) like खञ्जकुञ्जः। अधममध्यमश्चासौ उत्तमश्च इति अधममध्यमोत्तमः (पूर्ववत् कर्मधारय)। अधममध्यमोत्तमः गुणः यस्य सः अधममध्यमोत्तमगुणः (ब० व्री०)।

9. संसर्गतः – संसर्ग+तसिल् (पञ्चम्याम्); "सार्वविभक्तिकः तसिल्"।

10. जायते—This word is repeated in the same sense so कथितपददोष *i. e.* पुनरुक्त दोषः। There is a blemish of style here known as कथित पद दोष etc.

11. There is a better reading प्रायेण अधममध्यमोत्तम जुषामेवंविधाः वृत्तयः "Such are the courses of conduct of the low, the middle and the high resorts. (निकृष्टसाधारणोत्कृष्टाश्रयाणाम् श्रितवताम् etc.)

यः प्रीणयेत्सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम्।
तन्मित्रमापदि सुखे च समक्रियं य-
देतत्त्रयं जगति पुण्यकृतः लभन्ते॥ ६१॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्वय—यः सुचरितैः पितरम् प्रीणयेत् स पुत्रः । यत् भर्तुः हितम् एव इच्छति तत् कलत्रम् । यत् आपदि सुखे च समक्रियम् तत् मित्रम् । एतत् त्रयम् जगति पुण्यकृतः लभन्ते ।

Words—कलत्र = wife, पत्नी । समक्रिय = uniform, the same *i. e.* who acts uniformly, समान । पुण्यकृत् = the blessed, those who do pious acts. पुण्य करनेवाला ।

English Translation—He is the son who gratifies his father by his good actions. That is the wife who desires only the good of her husband. That is the friend who acts uniformly in adversity and prosperity. These three the pious alone do get in this world.

हिन्दी अनुवाद—जो अपने सुन्दर चरितों से पिता को प्रसन्न करे वही पुत्र है। जो अपने पति का हित ही चाहती है वही स्त्री है। वही मित्र है जो अपने मित्र के सुख-दुख में एक समान बना रहता है। पुण्यवान् लोग ही संसार में ये तीनों पदार्थ पाते हैं ॥ ६१ ॥

व्याख्या—यः पुत्रः सुचरितैः सत्कार्यैः पितरं जनकं प्रीणयेत् संतोषयेत् स पुत्रः तनयः । पुन्नामनरकात् त्रायते इति पुत्रः । यत् भर्तुः पत्युः हितम् इष्टम् इच्छति वाञ्छति तत् कलत्रम् भार्या । "पतिभक्तिपरा साध्वी शान्ता सानतिभाषिणी" इति पतिव्रताधर्मत्वात् । यत् आपदि संकटे सुखे संपदि वा समक्रियं तुल्यवृत्तिः, तदेव मित्रं सुहृद् । न तु तत् मित्रं मित्रं यत् आपदि त्यजति संपदि अनुवर्त्तते । एतत् त्रयम् सुपुत्रं सुकलत्रम् सुमित्रम् च पुण्यकृतः पुण्यशालिनः पुण्यप्रतापेन जगति संसारे लभन्ते प्राप्नुवन्ति । वसन्ततिलकं वृत्तम् ।

Notes :—1. प्रीणयेत्—प्रीञ् तर्पणे—प्री + वि० लिङ् III. S. प्रीणयति, पिप्राय, अप्रैषीत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

2. पुत्रः—पुत् + त्रै + कः ; पुन्नामनरकात् त्रायते यः, न तु जातमात्रः पुत्रः । " जीवतोर्वाक्यकरणात्प्रत्यब्दं भूरिभोजनात्, गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता " । एव of भर्तुरेव should be construed with हितम् *i. e.* She is the wife who desires the good only and not evil of her husband.

3. कलत्रम्—wife, is always neuter,

4. समाक्रियम्—समाक्रिया यस्य तत् (ब० व्री०) ।

5. त्रयम्—त्रि + तयप् = त्रितयम् or त्रयम् (द्वित्रिभ्यां तपस्यायच् वा वाच्यः " अव्ययात् तयप् ") ।

6. पुण्यकृतः—पुण्यं करोति इति पुण्य + कृ + क्विप् । "ह्रस्वस्य पिति कृति तुक् "—अनेन तुक् । क्विप् comes by " सुकर्म पाप मंत्रपुण्येषु कृतः " ।

नम्रत्वेनोन्नसन्तः परगुणकथनैः स्वान्गुणान्ख्यापयन्तः
स्वार्थान्संपादयन्तो विततपृथुतरारम्भयत्नाः परार्थे ।
क्षान्त्यैवाक्षेपरुक्षाक्षरमुखरमुखान्दुर्जनान्दूषयन्तः
सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥६२॥

अन्वय—नम्रत्वेन उन्नमन्तः, परगुणकथनैः स्वान् गुणान् ख्यापयन्तः परार्थे विततपृथुतरारम्भयत्नाः स्वार्थान् संपादयन्तः क्षान्त्या एव आक्षेपरूक्षाक्षरमुखरमुखान् दुर्जनान् दूषयन्तः, साश्चर्यचर्याः सन्तः जगति बहुमताः कस्य न अभ्यर्चनीयाः ?

Words—नम्रत्व = humility; modesty ; उन्नमत् = rising, prospering ; ख्यापयति = announces, propagandises ; वितत = extensive, विस्तृत ; पृथु = big, large, बड़ा । आरम्भ = कार्य, work ; यत्न = enterprise, effort ; क्षान्ति = सहिष्णुता । क्षमा, indurance, forbearance ; आक्षेप = दोषारोपण accus-

Digitization by Arya Samaj Charitable Foundation, Chennai

ation ; मुखर=noisy, clamorous ; दूषयन्तः=rebuking ; चर्या=आचरण, behaviour.

English Translation—Prospering by his humility, propagandising his own merits by extolling those of others, achieving their own ends by attempting for the good of others, extensive big works, rebuking with their forbearance calumnitors (lit. wicked people) whose tongues (mouths) are clamorous with harsh syllables of accusation,—good people of such wonderous behaviour are highly esteemed in the world. Who should not adore them ?

हिन्दी अनुवाद—सब से नव कर रहने पर भी उन्नत बने रहते, पराये का गुण गान करते अपना गुण फैलाते, पराये के हित-साधन का प्रयत्न करते हुए अपना स्वार्थ साधते, जिन दुर्जनों के मुख उनकी निन्दा करते रहते उन दुर्जनों के भद्दे-भद्दे आक्षेपों को सहकर उनको अपनी सहन-शीलता से तिरस्कृत करते, ऐसे अद्भुत आचरण वाले सन्तजन संसार में किनके पूजनीय नहीं होते ॥ ६२ ॥

व्याख्या—नम्रत्वेन नम्रतया विनयशीलत्वेन उन्नमन्तः उन्नतिं प्राप्नुवन्तः परेषां गुणकथनैः सद्गुणप्रशंसनै स्वान् गुणान् स्वकीयान् गुणान् ख्यापयन्तः प्रकटयन्तः प्रचारयन्तः न तु आत्मश्लाघया । परार्थे परप्रयोजननिर्वहणे वितताः विस्तृताः पृथुतराः महत्तराः—विशालाः च आरम्भाः कार्याणि विततपृथुतरारम्भेषु यत्नाः येषां ते । परकार्यसाधन-पुरस्कारेणैव आत्मीयकार्यसाधनतत्पराः इत्यर्थः । स्वार्थान् स्वकार्याणि संपादयन्तः निष्पादयन्तः । क्षान्त्या सहनशीलतया एव, आक्षेपेण निन्दायाः रूक्षाक्षराणि परुषवाक्यानि तैः मुखराणि वाचालानि मुखानि वदनानि येषां तान् परुषभाषणैः दुर्जनान् खलान् दूषयन्तः तिरस्कुर्वन्तः । अत एव

Digitization by Arya Samaj Charitable Foundation, Chennai

साश्चर्या आश्चर्यान्विता चर्या आचरणं येषां ते अत्यन्ताश्चर्यकरचरित्राः सन्तः सज्जनाः जगति लोके बहुमता समादृताः सन्तः कस्य नरस्य न अभ्यर्चनीयाः न पूजनीयाः इति काकुः । सर्वेषामेव पूजनीयाः इतिभावः । स्रग्धरा वृत्तम् ।

Notes :—1. नम्रत्वेन—rising to greatness through his humility. Though low yet high ; (विरोधाभासः) करणे ३या ।

2. परगुणकथनैः—परेषां गुणाः (६ठी तत्) ; तेषां कथनानि (ष० त०) तैः करणे ३या ।

3. ख्यापयन्तः—ख्या + णिच् + शतृ Nom. P. । By appreciating the merits of others, they proclaim that they have merits in them " गुणिनः गुणग्राहिणः " ।

4. परार्थे—परेषाम् अर्थः प्रयोजनम् (ष० त०) तस्मिन् । For the sake of others.

5. वितत etc.—वितताः च पृथुतराः च इति वितत—पृथुतराः । तादृशाः आरम्भाः (कर्मधा०) ; प्रततपृथुतरारम्भेषु यत्नाः येषां ते (ब० व्री०) प्र + यम् + क्त (कर्मणि) । आ + रभ् + घञ् = आरम्भः । म् comes by " उपसर्गात् खल् घञोः " । यत् + नः = यत्नः ।

6. क्षान्त्याः—करणे ३या । क्षान्तिः = क्षम् + क्तिन् ।

7. आक्षेप etc.—आक्षेपेण or आक्षेपस्य रूक्षाक्षराणि (३या or ६ठी तत्) । आक्षेपरूक्षाक्षरैः मुखराणि (३या तत्) आक्षेपरूक्षाक्षर-मुखराणि मुखानि येषां ते (ब० व्री०) । Qual. दुर्जनान् । आ + क्षिप् + घञ् = आक्षेप ; मुख + र = मुखर ; र comes to denote censure.

8. दूषयन्तः—दुष् + णिच् + शतृ Mas. nom. Plu.

9. साश्चर्यचर्या—आश्चर्येण सह वर्तमाना या सा साश्चर्या (तुल्ययोगे ब० व्री०) साश्चर्या चर्या येषां ते (ब० व्री०) ।

10. बहुमन् + क्त (कर्मणि) = बहुमताः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

11. कस्य—कर्तरि षष्ठी by कृत्यानां कर्त्तरि षष्ठीवा । केन is the optional form.

12. अभ्यर्चनीयाः—अभि + अर्च + अनीयर् ।

N. B.—In the third line, we find श्रुतिकटि दोषः as harsh letters have been used.

अथ परोपकारपद्धतिः

भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥६३॥

अन्वय :—तरवः फलोद्गमैः नम्राः भवन्ति, घनाः नवाम्बुभिः दूरविलम्बिनः (भवन्ति) । सत्पुरुषाः समृद्धिभिः अनुद्धताः (भवन्ति) । एषः परोपकारिणाम् स्वभावः एव (अस्ति) ।

Words—फलोद्गम = the advent of fruits, दूरविलम्बिनः = नीचे लटका हुआ, hanging low ; स्वभाव = nature.

English Translation—Trees bend down with the advent of fruits. Clouds hang down very low on account of fresh rains (water). The good become not puffed-up, with riches. Such, indeed, is the nature of the benefactors of others.

हिन्दी अनुवाद—फल के भार से वृक्ष नव जाते हैं, जल से भर जाने पर घटा आकाश में लटक आती है, सज्जन लोग ऐसे ही समृद्धि पाकर उद्धत नहीं होते, परोपकारी जीवों का यही स्वभाव है ॥ ६३ ॥

व्याख्या—तरवः वृक्षाः फलोद्गमैः फलभारैः नम्राः अवनताः भवन्ति । घनाः मेघाः नवाम्बुभिः नूतनजलैः उपलक्षिताः सन्तः दूरविलम्बिनः भूविलम्बिनः भवन्ति । सर्वत्र प्रवर्षणार्थम् अन्तरिक्षे संचरन्तः भूसमीपम्

Digitization by Arya Samaj Charitable Foundation, Chennai

अवनमन्ति इतिभावः । सत्पुरुषाः समृद्धिभिः अनुद्धताः अनुद्दण्डाः तीक्ष्ण-स्वभावाः न भवन्ति । परोपकारिणाम् हितकारिणाम् एषः स्वभावः प्रकृतिः एव । अर्थान्तरन्यासः । वंशस्थ वृत्तम् ।

NOTES :—1. फलोद्गमैः—फलानाम् उद्गमाः (ष० त०) तैः । हेतौ तृतीया । उद्+गम्+अप् (ग्रहवृदृनिश्चिगमश्च) ।

2. घनाः—हन्+अप् , " मूर्तौ घनः " ।

3. नवाम्बुभिः—नवानि अम्बूनि (कर्मधा); तैः । हेतौ ३या ।

4. दूरविलम्बिनः—दूरं विलम्बितुं शीलं यस्य दूर+वि+लिम्ब्+णिनिः (ताच्छील्ये णिनिः) (उपपद समास) ।

5. सत्पुरुषाः—सन्तः पुरुषाः इति (कर्मधा०) ।

6. समृद्धिभिः—हेतौ ३या । सम्+ऋध्+क्तिन् । ऋध्यति or ऋध्नाति । आनर्ध, आर्धत् ।

7. परोपकारिणाम्—परेषाम् उपकारिणः (ष० त०); तेषाम् उपकार+णिनिः (आवश्यके) ।

N. B.—This verse occurs in अभिज्ञानशकुन्तलम् Act V. So this is not Bhartrihari's own composition. There are many such verses which seem to have been culled from popular older works.

8. Raghavabhatta, commenting on this verse says that the figure here is क्रियादीपक as भवन्ति has to be taken with all except the last line. Again साधारणधर्म, विनय is spoken of by various terms, नम्र, दूरविलम्बिन् अनुद्धत and so माला प्रतिवस्तूपमालंकारः । In the end we find अर्थान्तर as well, as general statement is made to support particular statements.

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणाकुलानां परोपकारणेन न चन्दनेन ॥६४॥

अन्वय :—करुणाकुलानाम् श्रोत्रम् श्रुतेन विभाति कुण्डलेन न, पाणिः दानेन (विभाति) कङ्कणेन न, कायः परोपकारेण (विभाति) चन्दनेन न ।

English Translation—The ear of the benevolent shines by listening to Vedic lore and not with an ear-ring, his hand with charity and not with a bangle, his body, with beneficence and not with sandal-paint.

हिन्दी अनुवाद—कान की शोभा शास्त्र-श्रवण से है, कुण्डल से नहीं। हाथ की शोभा दान से, न कि कङ्कण पहनने से। करुणामय पुरुषों का शरीर परोपकार से शोभता है, न कि चन्दन लगाने से ॥ ६४ ॥

व्याख्या—करुणाकुलानाम् दयालूनाम् सत्पुरुषाणाम् श्रोत्रं कर्णः श्रुतेन वेदशास्त्रश्रवणेन एव विभाति प्रकाशते द्योतते । कुण्डलेन न सुवर्णकर्णभूषणेन तु न विभाति । पाणिः हस्तः दानेन सत्पात्रत्यागेन विभाति कङ्कणेन कनकवलयेन न विभाति । कायो देहः परोपकारेण परेषां हिताचरणेन विभाति चन्दनेन चन्दनलेपनेन न विभाति । महात्मनां शास्त्र-पुराणश्रवण-दानादिकमेव भूषणम् । न तु अन्यत् किञ्चित् । परिसंख्या-लंकारः । उपजातिवृत्तम् ।

NOTES :—1. श्रुतेन—श्रुतं शास्त्रम्, *i. e.* शास्त्रज्ञानम but it means here वेदशास्त्रश्रवणम् । So श्रु + क्त (भावे) = श्रुतम् = श्रवणम् । करणे तृतीया । " श्रुतं शास्त्रावधृतयो; " इति विश्वः ।

2. कुण्डलेन—etc. all words in तृतीया have " करणे ३या " ।

3. कायः—चि + घञ् = कायः । चीयते अस्मिन् अस्थ्यादिकम् इति

Digitization by Arya Samaj Charitable Foundation, Chennai

कायः । " निवास-चिति-शरीरोपसमाधानेषु आदेश्च कः" ।—चिनोति, चिकाय or चिचाय, अचैषीत् ।

4. करुणाकुलानाम्—करुणया आकुलाः (३या तत्) तेषाम् सम्बन्धे षष्ठी ।

5. Figure is परिसंख्या as शास्त्रश्रवण, दान, उपकार are specially mentioned as imparting beauty to the ear etc. to the complete exclusion of कुण्डल, कंकण and चन्दन see. K. P. परिसंख्या । भक्तिः भवे न विभवे etc. ।

पद्माकरं दिनकरो विकचं करोति चन्द्रो विकासयति कैरवचक्रवालम्
नाभ्यर्थितो जलधरोऽपिजलंददातिसन्तः स्वयंपरहितेविहिताभियोगाः ६५

अन्वयः—दिनकरः नाभ्यर्थितः सन् पद्माकरम् विकचम् करोति । चन्द्रः (नाभ्यर्थितः) कैरवचक्रवालम् विकासयति, जलधरः अपि (नाभ्यर्थितः सन्) जलम् ददाति । सन्तः स्वयम् परहिते विहिताभियोगाः (भवन्ति) ।

WORDS—नाभ्यर्थित = न + अभ्यर्थित = not requested, unsolicited ; अप्रार्थित । विकच = Blown, opened, blooming, खिला, प्रस्फुटित । चक्रवाल = a circle of, चक्रवालं तु मण्डलम् इत्यमरः ; multitude, हित = good, beneficence, (भलाई) । अभियोग = अभिनिवेश persistence, आग्रहः ।

English Translation—The sun, though unsolicited, makes the multitude of lotuses bloom, the moon though unasked, causes the circle of the lilies to bloom, the cloud showers rain (water) though unimplored. Good people, of their own accord, persist in doing good to others.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—सूर्य कमल को खिलाता है, चन्द्रमा कुमदिनी के समूह को आप ही खिलाता, मेघ भी बिना किसी के विनती करने पर ही जल बरसाता है। सन्त लोग अपने ही आप, किसी के प्रार्थना न करने पर भी, परोपकार करने का आग्रह करते ॥ ६५ ॥

व्याख्याः—दिनकरः सूर्यः नाभ्यर्थितः अयाचितः सन् अपि पद्माकरम् कमलवनम् विकचं प्रफुल्लं विकसितं करोति। तथा चन्द्रः अपि कैरव-चक्रवालम् कुसुदषण्डम् कुसुदानि विकासयति विकचयति प्रस्फुटानि करोति। जलधरः मेघः अपि नाभ्यर्थितः अप्रार्थितः सन् जलं ददाति वृष्टिं वर्षति। तथाहि सन्तः सत्पुरुषाः स्वयम् अयाचिताः एव परेषां हिते हिताचरणे उपकारे विहितः कृतः अभियोगः अभिनिवेशः आग्रहः यैः ते कृताभिनिवेशाः भवन्ति। युक्तमेव हिताचरणम् सज्जनानाम्। अर्थान्तर-न्यासः। वसन्ततिलकं वृत्तम्।

NOTES :—1. दिनकरः—दिनं करोति इति दिन+कृञ्+टः। "कृञो हेतुताच्छील्यानुलोम्येषु। टः is added in ताच्छील्य।

2. पद्माकरम्—पद्मानाम् आकरः इति (षष्ठी तत्); तम्। कर्मणि २या।

3. विकचम्—विगतः कचः (fold), अस्मात् इति विकचः विकसितः (ब० व्री०) full-blown.

4. कैरवचक्रवालम्—कैरवाणाम् चक्रवालम् (ष० त०) तत्। circle *i. e.* multitude of lilies. कर्म acc. to गति बुद्धि etc. अणिकर्त्ता स णौ कर्म। विकासयति comes under गत्यर्थक roots.

5. नाभ्यर्थितः—न अभ्यर्थितः = नाभ्यर्थितः सुप्सुपेतिसमासः like नैकः etc. अभि+अर्थि+क्त (कर्मणि) अर्थयते = solicits, begs of.

6. जलधरः—धरति इति धरः धृ+अच् (पचादित्वात्) जलस्य धरः इति (षष्ठी तत्)। "तैर्महीधरादयः व्याख्याताः" मह्याः धरः इति महीधरः एवं गंगाधरादयः इति वामनः।

Digitization by Arya Samaj Charitable Foundation, Chennai

7. परहिते—परेषां हिते (ष० त०) ; हा+क्त=(भावे) हितम् =good, beneficence ; तस्मिन् । विषयाधिकरणे ७मी ।

8. विहिता etc.—विहितः कृतः अभियोगः अभिनिवेशः यैः ते विहिताभियोगाः (ब० व्री०) । वि+धा+क्त=(कर्मणि) विहित । अभि+युज्+घञ्=अभियोगः=close application ; energetic efforts, the sense is good people, by their very nature, try resolutely to do good to others, whether they are solicited to do so or not.

9. Figure is अर्थान्तरन्यासः ।

एते सत्पुरुषाः परार्थघटकाः स्वार्थान् परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ६६ ॥

अन्वयः—ये स्वार्थान् परित्यज्य परार्थघटकाः एते सत्पुरुषाः, ये स्वार्थाविरोधेन परार्थम् उद्यमभृतः (ते) तु सामान्याः, ये स्वार्थाय परहितम् निघ्नन्ति ते अमी मानुषराक्षसाः । ये निरर्थकम् परहितम् घ्नन्ति ते के इति न जानीमहे ।

Words—स्वार्थ=self-interest ; परार्थ=interests of others ; घटक=doer, कारक । अविरोधेन=without clashing with, बिना संघर्ष के ।

English Translation—Those who do good to others giving up their own self-interests, are good people and those are ordinary people who try to do good to others without harming their own interests, while those who destroy other's good for their own interests are demons among men, we do not know

Digitization by Arya Samaj Charitable Foundation, Chennai

what are they who destroy good of others without any purpose.

हिन्दी अनुवाद—पराये के हित के लिये जो अपने हित का ख्याल नहीं करते वे उत्तम, जो अपने हित को बिना कुछ हानि किये ही औरों का हित करते वे सामान्य-साधारण, और जो अपनी भलाई के लिये औरों के हित को नष्ट करते वे अधम हैं, मनुष्य नामधारी राक्षस हैं। पर जो व्यर्थ ही पराये के हित की हानि करते हैं उनको हम क्या कहें - नहीं जानते ॥ ६६ ॥

व्याख्या—ये पुमांसः स्वार्थान् स्वप्रयोजनानि परित्यज्य त्यक्त्वा परार्थ-घटकाः परप्रयोजनसाधकाः। एते सत्पुरुषाः पुरुषोत्तमाः। ये तु स्वार्थस्य अविरोधेन असंघट्टनेन स्वार्थसाधनपूर्वकम् परार्थम् परप्रयोजनानिर्वाहार्थम् उद्यमभृतः उद्यमशीलाः, ते सामान्याः साधारणाः जनाः। मध्यमपुरुषाः इत्यर्थः। ये तु स्वार्थाय स्वप्रयोजनसाधनाय परहितं परप्रयोजनम् निघ्नन्ति नाशयन्ति। ते अमी मानुषेषु राक्षसाः दानवाः मानुषनामधारिणः राक्षसाः। ते पुरुषाधमाः इतिभावः। ये तु निरर्थकं व्यर्थं निष्फलं परहितं परप्रयोजनं घ्नन्ति नाशयन्ति ते पुमांसः के? इति वयं न जानीमहे। परमनीचास्ते। शार्दूलविक्रीडितम्।

NOTES :—1. परार्थघटकाः—परेषाम् अर्थाः (ष० त०) परार्थाः तेषाम् घटकाः संपादकाः (ष० त०)। घटते इति घटकः=one who accomplishes. "यत्तदर्थयोर्नित्योऽभिसंबन्धः"—

2. ये—एते—"यत्तदर्थयोर्नित्योऽभिसंबन्धः" इति नियमेन यच्छब्दः तच्छब्दं तच्छब्दसमानार्थकं अदः शब्दादिकम् अपेक्षते। See. K. P. Tika. (नारायणी) page 307. यत् and तत् are co-relative terms ; यत् must be followed by तत् or its like अदस् etc. । Here एतत् is used in place of तत्। In second line there is no co-relative तत् or its equivalent.

3. स्वार्थाविरोधेन—स्वस्य अर्थः (ष० त०) ; न विरोधः अविरोधः

Digitization by Arya Samaj Charitable Foundation, Chennai

(नञ् तत्) ; स्वार्थस्य अविरोधः (ष० त०) तेन । करणे ३या । स्वार्थाविरोधपूर्वकम् इत्यर्थः ।

4. परार्थम्—परेभ्यः इदम् इति परार्थम् नित्यसमासः अर्थेन नित्यसमासः विशेषलिङ्गता च " ।

5. उद्यमभृतः—उद्यमं विभ्रति इति (उपपद तत्) उद्यमशीलाः उद्यम + भृ + क्विप् । उद् + यम् + अप् । त् is भृत् is due to ह्रस्वस्य पिति कृति तुक् ।

6. मानुषराक्षसाः—मानुषाः राक्षसाः इव (उपमित कर्मधा०) or मानुषेषु राक्षसाः (७मी तत्) ; राक्षसाः इव क्रूराचाराः इतिभावः ।

7. स्वार्थाय—स्वस्य अर्थः (ष० त०) ; स्वार्थं साधयितुम् इति स्वार्थाय by क्रियार्थोपपदस्य च कर्मणि स्थानिनः । like फलानि आनेतुम् याति फलेभ्यः याति । तुमुन्प्रत्ययान्त word साधयितुम् is understood and so चतुर्थी in its object स्वार्थं ।

8. निरर्थकम्—निर्गतः अर्थः यस्मात् तत् निरर्थः then शेषाद् विभाषा इति समासान्त कप् । so निरर्थकम् । निरर्थकं तत् यथा स्यात् तथा । क्रियाविशेषणे २या । used as an adverb ।

9. जानीमहे—" अनुपसर्गात् ज्ञः " इति आत्मनेपदम् । We donot know by what name to call them who destroy other's good without serving any purpose of their own.

पापान्निवारयति योजयते हिताय गुह्यं निगूहति गुणान्प्रकटीकरोति
आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ६७

अन्वयः—पापात् निवारयति, हिताय योजयते, गुह्यम् निगूहति गुणान् प्रकटीकरोति, आपद्गतम् न जहाति, काले च ददाति, इदम् सन्तः सन्मित्रलक्षणम् प्रवदन्ति ।

WORDS—गुह्य = Secret, छिपाने लायक । योजयते = urges, persuades. लक्षण = sign, characteristic, चिह्न ।

Digitization by Arya Samaj Charitable Foundation, Chennai

English Translation—Good people thus describe the characteristic of a good friend. He dissuades (friend) from sin, persuades (him) to good action, conceals (his) secrets, publishes (his) merits, forsakes (him) not when in distress, and gives (him) in the time of need.

हिन्दी अनुवाद—पाप करने से अलग रखता, अच्छा काम करने में लगाता, छिपाने लायक बात (मित्र की) छिपाता और (उसके) गुणों को फैलाता, विपद्ग्रस्त देखकर न छोड़ता, समय आने पर कुछ देता—सन्त जन सच्चे मित्र का यही सब लक्षण बतलाते हैं ॥ ६७ ॥

व्याख्या—पापात् पापाचरणात् दुष्कृतात् निवारयति निवर्तयति धर्मोपदेशैः । हिताय तत्कर्माचरणाय योजयते प्रवर्त्तयते । गुह्यं गोप्यं रहस्यं निगूहति आच्छादयति, गुणान् दयादाक्षिण्यादि सद्गुणान् प्रकटीकरोति प्रख्यापयति, आपद्गतं संकटस्थमपि न जहाति त्यजति, काले व्यसनादिसमये ददाति । इदम् पापनिवारणादिकं सर्वं सन्तः सत्पुरुषाः सन्मित्रस्य सुहृदः लक्षणं स्वरूपं प्रवदन्ति । वृत्तं वसन्ततिलका ।

NOTES :—1. पापात्—"वारणार्थानामीप्सितः" इति पञ्चमी ।

2. निवारयति—नि+वृ+णिच् III. S. ।

3. हिताय—"क्रियोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी । हितम् आचरितुम् योजयते । तुमन्तक्रिया being understood, its object हितम् takes ४र्थी ।

4. निगूहति—नि+गुह्+लट् III. S. । गुह्+क्त=गूढ ; गुह्+तुम्=गूहितुम् or गोढुम । गुह्+क्त्वा=गूहित्वा or गुहित्वा ।

5. प्रकटीकरोति—अप्रकटान् प्रकटान् करोति इति । प्रकट+च्विः=कृ लट् (कृभ्वस्तियोगे संपद्यकर्तरि च्विः अभूततद्भावे) । अनन्तरम्—"अस्य च्वौ" इति अनेन अवर्णस्य ईत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

6\. जहाति—त्यजति । ओहाक् त्यागे, जहाति, जहौ, अहासीत् ।

Cf. " What is friendship but a name
A charm that lulls to sleep
It follows only name and fame
And leaves the wretch to weep."

Goldsmith's Edwin Angelina.

7\. काले ददाति—आपत्काले ददाति, He helps his friend in time of need. " A friend in need is a friend indeed."

8\. सन्तः—अस् + शतृ = सत् ; सन् सन्तौ सन्तः । By the Sutra " लटः शतृशानचौ अप्रथमासमानाधिकरणे "—We can't have शतृशानच् forms in प्रथमा विभक्ति but the use of लट् in the sutra when it was already mentioned in previous sutra shows some speciality. " लडित्यस्यनुवर्त्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम् । तेन प्रथमा सामान्याधिकरण्येऽपि क्वचित् " सन् ब्राह्मणः । सि० कौ० । Here " सन्तः " is used as a noun by " विशेषणमात्र प्रयोगो विशेष्य प्रतिपत्तौ " इति वामनः ।

9\. इदम् " नपुंसकम् नपुंसकेन एकवत् चान्यतरस्याम् "—Hence neuter and optionally singular though it refers to many facts.

10\. सन्मित्रलक्षणम्—सत् मित्रम् इति सन्मित्रम् (कर्मधा०) तस्य लक्षणम् (ष० त०) ।

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरोत्तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनस्तदभवत् दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥६८॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्वयः—क्षीरेण आत्मगतोदकाय पुरा ते अखिलाः गुणाः दत्ता हि। क्षीरोत्तापम् अपेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः। तत् (कर्तृ-पदम्) तु मित्रापदम् दृष्ट्वा पावकम् गन्तुम् उन्मनः अभवत्। तेन जलेन युक्तम् (सत्) (क्षीरम्) शाम्यति। सताम् मैत्री पुनः तु ईदृशी।

Words—आत्मगतोदक = water mixed with itself (milk) ; गुण = here, sweetness, whiteness etc. the qualities of milk ; उत्ताप = heat, distress, गरमी। कृशानु = fire, आग। उन्मनः = eager, उतावला, anxious ; युक्त = united, *i. e.* when water is sprinkled over the boiling milk.

English Translation—At first, milk imparted all its qualities to water mingled with it ; on seeing the distress (heating) of milk, water sacrificed itself into the fire (*i. e.* was evaporated), but seeing the distress of its friend it (milk) became very anxious to throw itself into the fire (*i. e.* began to boil over) ; but it became pacified when water was sprinkled over it. Such is indeed the friendship of the good.

हिन्दी अनुवाद—पहले दूध ने अपने में मिले जल में अपने सारे गुण दे डालें (रंग-रूप मिठास इत्यादि) ; इसलिये अपने मित्र के दुःख को देखकर—उसको औटाये जाते देख जल ने पहले अग्नि में अपनी आत्माहुति कर दी। पर अपने मित्र जल को आग में जलता देख दूध (उफना कर) आग में कूद पड़ना चाहता। लेकिन जब उफनाते हुए दूध पर जल छिड़का जाता तब वह शान्त हो जाता है। सज्जनों की मित्रता ऐसी ही होती है ॥ ६८ ॥

व्याख्या—क्षीरेण (कर्त्रा) दुग्धेन आत्मानम् उपगतं प्राप्तम् आत्मोपगतम् उदकम् जलम् स्वाङ्गभूतं जलं, तस्मै पुरा पूर्वम् ते प्रसिद्धाः

Digitization by Arya Samaj Charitable Foundation, Chennai

अखिलाः समस्ताः गुणाः माधुर्यधावल्यादिकाः गुणाः दत्ताः हि वितीर्णाः खलु। स्वगुणप्रदानेन मैत्री संपादिता इत्यर्थः। अतः क्षीरोत्तापम् क्षीरस्य श्रापणार्थम् अग्न्युपरि निहितस्य दुग्धस्य उत्तापम् संतपनम् अपेक्ष्य दृष्ट्वा तेन क्षीरमिश्रितेन पयसा जलेन स्वात्मा स्वशरीरम् कृशानौ वह्नौ हुतः मित्रसंतापस्य असहनात् संशोषितः इत्यर्थः। ततः तत् क्षीरं (कर्तृ) मित्रस्य जलस्य आपदम् संशोषणरूपां विपत्तिं दृष्ट्वा पावकम् अग्निम् गन्तुम् उन्मनः उद्युक्तम् उत्सुकम् अभवत्। आत्मानं वह्नौ निक्षेप्तुकामम् अभवत् क्षीरम् इत्यर्थः। तदनन्तरम् तेन जलेन युक्तम् सिक्तम् सत् तु क्षीरम् शाम्यति प्रशान्तं भवति। तथा हि सताम् सज्जनानाम् मैत्री मित्रता ईदृशी पुनः परस्परदुःखासहनशीला खलु। उत्प्रेक्षार्थान्तरन्यासयोः संकरः इति रामचन्द्रः। शार्दूलविक्रीडितम्।

Notes:—1. क्षीरेण—अनुक्ते कर्त्तरि ३या अनुक्तकर्त्ता of दत्ताः।

2. आत्मगतोदकाय—आत्मानं गतः इति आत्मगतः (२या तत्), तादृशम् उदकम् (कर्मधा०); तस्मै संप्रदाने ४र्थी। Water mixed with milk becomes white and sweet, it passes as milk.

3. क्षीरोत्तापम्—क्षीरस्य उत्तापः (ष० त०); तम् कर्मणि २या।

4. कृशानौ—अधिकरणे ७मी। हु+क्त (कर्मणि); जुहोति etc.

5. मित्रापदम्—मित्रस्य आपत् (ष० त०); ताम्। कर्म of दृष्ट्वा।

6. उन्मनः—“ उद्गतं मनः यस्य तत् उन्मनस्। Seeing water, its friend, drying up, milk begins to boil over. The poet fancies that the milk is throwing itself into fire, not bearing the distress of its friend, water.

7. युक्तम्—united. *i. e.* when water is again sprinkled over the boiling milk, then it ceases to boil over and settles down. युज्+क्त (कर्मणि)।

Digitization by Arya Samaj Charitable Foundation, Chennai

8. तेन जलेन—अनुक्ते कर्त्तरि ३या । अनुक्तकर्त्ता of युक्तम् ।

9. मित्रस्य भावः इति मैत्री ; मित्र + अण् + स्त्रियां ङीप् । or मित्र + ष्यञ् = मैत्र्यम् ।

10. Figs. are two here. उत्प्रेक्षा and अर्थान्तरन्यास । संकर of both says. रामचन्द्रबुधेन्द्रः ।

इतः स्वपिति केशवः कुलमितस्तदीयद्विषां
इतश्च शरणार्थिनां शिखरिणां गणाः शेरते ।
इतोऽपि वडवानलः सह समस्तसंवर्तकैः
अहो ! विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥६६॥

अन्वयः—इतः केशवः स्वपिति, इतः तदीयद्विषाम् कुलम् (स्वपिति) इतः च शरणार्थिनाम् शिखरिणाम् गणाः शेरते, इतः अपि समस्तसंवर्तकैः सह वडवानलः (शेते) । अहो ! सिन्धोः वपुः विततम् ऊर्जितम् भरसहम् च अस्ति ।

WORDS :—केशव = Visṇu, विष्णु ; द्विष् = enemy ; कुल = host, group, समूह । शरणार्थिन् = seeking, shelter ; संवर्त्तक = a kind of cloud which pours down rain at the time of destruction of the world ; पुष्करावर्त्तक । वितत = expanded, extensive, विस्तृत । ऊर्जितम्—energetic, powerful, strong, तेजस्वी ; भरसह = load-bearing, बोझकस ।

English Translation—Hither sleeps Lord Visṇu, thither the host of his enemies and here sleep the multitudes of mountains seeking shelter (into it), there again the submarine fire along with all the clouds down-pouring at the end of the creation. Oh ! how extensive, powerful and load-bearing is the body of the ocean.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—इधर विष्णु सोते, उधर उनके शत्रु-गण, इधर शरणार्थी पर्वत-समूह सोते, उधर बडवानल समस्त संवर्तक मेघों के सहित; अहो! समुद्र का शरीर कितना विस्तृत, सबल और भार सहने वाला है ॥ ६६ ॥

व्याख्या—इतः एकस्मिन् प्रदेशे केशवः क्षीरसागरशायी विष्णुः स्वपिति योगनिद्रया निद्राति। इतः अन्यस्मिन् प्रदेशे तदीयाः। केशवस्य द्विषः शत्रवः कालकेयादयः, तेषां कुलं समूहः। तिष्ठति इति शेषः। इतः च अन्यस्मिन् प्रदेशे शरणार्थिनाम् आश्रयकाङ्क्षिनाम् शिखरिणाम् पर्वतानाम् मैनाकादीनाम् गणाः समूहाः शेरते अवतिष्ठन्ते। इतः अन्यत्र समस्तैः सकलैः संवर्तकैः प्रलयकालवर्षिमेघविशेषैः पुष्करावर्तकनामकैः मेघैः सह वडवानलः और्वाग्निः अपि निवसति। तस्मात् सिन्धोः समुद्रस्य, वपुः शरीरम्, विततम् विस्तृतम्, ऊर्जितम् ऊर्जस्वलम् तेजस्विन्; भरसहम् भारोद्वहनक्षमम् च अस्ति। इति अहो! आश्चर्यम्। अधिकालंकारः। अप्रस्तुतप्रशंसा च भवितुं शक्नुयात्। पृथ्वी वृत्तम्।

NOTES :—1. केशवः—प्रशस्ताः केशाः अस्य इति केश + व = केशव; a name of Krisna । Krisna is regarded as an incarnation of Visnu and so केशव means Visnu here. Acc. to अमर, केशव is a synonym of विष्णु। Visnu is said to sleep in the Milky-Ocean. See अमुं युगान्तोचित योगनिद्रः etc. Raghu XIII; Again 'क्षीरशायी विष्णुरूपः' इत्यमरः।.

2. तदीयद्विषाम् तस्य अयम् इति तत् + छ = तदीय, तदीयाः द्विषः (कर्मधा०)। द्विष् + क्विप् = द्विष्, द्विट्, द्विषौ द्विषः संवन्धे षष्ठी, connected with कुलम्, which is कर्त्ता of स्वपिति Kesava's enemies are demons; Kalakeyas hid themselves in the sea (understood) see महाभारत वनपर्व १०१ (उपपद)।

Digitization by Arya Samaj Charitable Foundation, Chennai

3. शरणार्थिनाम्—शरणम् अर्थयन्ते इति शरणार्थिन् शरण+अर्थ् णिनिः । तेषाम् Qual. शिखरिणाम् ।

4. शिखरिणां गणाः—multitudes of mountains seek shelter from the wrath of Indra into the sea *cf.* पक्षच्छिदा गोत्रभिदात्तगन्धाः शरण्यमेनं शतशो महीध्रा etc. Raghu. XIII. 36 । See notes on verse 30 Ibid. मत्स्यपु० ।

5. वडवानलः—submarine fire is seen to flare up in the sea ; It is a kind of gas burning on the surface of the sea water seen generally in the southern part of the Indian Ocean. It is a popular Indian belief.

cf. गर्भं दधत्यर्कमरीचयोऽस्माद्विवृद्धिमत्राश्नुवते वसूनि ।
अबिन्धनं वह्निमसौ विभर्त्ति, प्रह्लादनं ज्योतिरजन्यनेन ॥
Raghu XIII. 3.

6. समस्तसंवर्त्तकैः—समस्ताः संवर्तकाः इति (कर्मधा०) ; तैः सह "सहयुक्तेऽप्रधानेः "—इति सहार्थे ३या । (*a*) Mr. Kale takes the word संवर्त्तकाः to mean " fires that destroy the world at the end of the creation." (*b*) Ramachandra Pandit takes it to mean " प्रलयकालवर्षिमेघविशेषाः "—as has been accepted in this edition. (*c*) Commentator Ramarshi gives one additional sense to it " सकल जलचरजीवविशेषाः " (all aquatic animals).

7. भरसहम्—सहते इति सहः सह्+अच् (पचादित्वात्) ; भरस्य सहः (ष० त०), Qu. neuter.

8 सिन्धोः वपुः—The body of the ocean is very expansive as it can contain even Viṣṇu who sleeps here withdrawing entire universe within himself see

Digitization by Arya Samaj Charitable Foundation, Chennai

Raghu XIII. अमुं युगान्तो etc. Moreover it is very energetic and powerful as it can hold even burning fire like वडवानलः। Further more the ocean is very enduring as it can bear the heavy burden of so many mountains hiding here.

9. Figure is therefore अधिक प्रभेदोऽलंकारः। We can-trace out here अप्रस्तुतप्रशंसालंकार also.

जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्टं
श्लाघ्यं जन्म ध्रुवस्य भ्रमति नियमितं यत्र तेजस्विचक्रम्।
संजातव्यर्थपक्षाः परहितकरणे नोपरिष्टान्न चाधो—
ब्रह्माण्डोदुम्बरान्तर्मशकवदपरे जन्तवो जातनष्टाः ॥७०॥

अन्वयः—एकः सः कूर्मः (एव) जातः येन पृथुभुवनभराय पृष्टम् अर्पितम्। ध्रुवस्य जन्म श्लाघ्यम् यत्र तेजस्विचक्रम् नियमितम् भ्रमति। परहितकरणे संजातव्यर्थपक्षाः अपरे जन्तवः उपरिष्टात् न, अधः च न (वर्तमाना भवन्ति) ब्रह्माण्डोदुम्बरान्तर्मशकवत् जात नष्टाः भवन्ति।

Words—पृथु = big, wide, बड़ा। श्लाघ्य = laudable, प्रशंसनीय। तेजस्विन् = planets, star, luminary ; नियमितम् = regularly, नियमपूर्वक। संजातव्यर्थपक्षाः = who are not able to do good to others *i. e.* who are baffled in doing good ; उदुम्बर = fig-fruit known as, गुल्लरफल ; मशक = worm, कीड़ा।

English Translation—That very tortoise alone was (really) born who offered his back to bear the burden of the vast world. Praiseworthy was the birth of Dhruva, round whom the cluster of luminaries revolves ; other animals being unable to do good to

Digitization by Arya Samaj Charitable Foundation, Chennai

others are neither in upper regions nor in lower regions. They die after they are born like the worms inside the universe like fig-fruit.

हिन्दी अनुवाद—उसी एक कच्छप-देव का जन्म लेना सफल है जिसने पृथ्वी के भार को ढोने के लिये अपनी पीठ अर्पण कर दी। ध्रुव का जन्म लेना प्रशंसनीय है जहाँ यह तारा ग्रह-समूह नियमपूर्वक घूमता रहता। और सब दूसरे प्राणधारी परोपकार करने में असमर्थ हों न तो ऊपर गये और न नीचे; वे इस दुनिया में जनमने के बाद उसी तरह व्यर्थ मर जाते हैं जैसे गूलर के कीड़े ॥ ७० ॥

व्याख्या—एकः केवलः स कूर्मः कच्छपावतारः विष्णोः, एव जातः। जन्मलाभवान् इत्यर्थः। येन क्रमेण पृथु महत् यत् भुवनम् जगत् तस्य भारः तस्मै। भुवनभारवहनार्थम् इत्यर्थः। पृष्टम् निजकूर्परतलम् अर्पितम् दत्तम्। ध्रुवस्य जौतानपादस्य जन्म जननं श्लाघ्यं प्रशंसनीयम्। यत्र यस्मिन् ध्रुवे तेजस्विनां ग्रहनक्षत्रादीनाम् चक्रं समूहः नियमितं नियत-रूपेण नियमपूर्वकम् भ्रमति पर्यावर्तते। परहितकरणे परोपकाराचरणविषये संजातव्यर्थपक्षाः असमर्थपक्षाः अपरे जन्तवः प्राणिनः उपरिष्टात् न उपरिभागे अपि वर्तमानाः न भवन्ति इत्यर्थः। अधः च वर्तमानाः न भवन्तीत्यर्थः। किन्तु ब्रह्माण्डम् एव उदुम्बरम् तस्य अन्तः, तत्र ये मशकाः कीटाः तैः तुल्यम् तद्वत् जाताश्च नष्टाश्च यतः न किमपि तैः साधितम् अस्मिन् लोके। अतः मशकवत् निष्फलं तेषां जन्म। रूपकोपमयोः संकरः। स्रग्धरा वृत्तम्।

NOTES :—1. पृथु भुवन etc. :—पृथु भुवनम् (कर्मधा०), तस्य भरः (ष० त०) पृथुभुवनभरः, तं वोढुम् इति पृथुभुवनभराय चतुर्थी by "क्रियार्थोपदस्य च कर्मणि स्थानिनः"। Hindus believe that Lord Visnu in his tortoise incarnation bore the earth on his back and he is still carrying the load over his back.

Digitization by Arya Samaj Charitable Foundation, Chennai

2. नियमितम्—नि+यम्+णिच्+क्त (कर्मणि) नियमितम् तत् यथा स्यात् तथा नियमितम् क्रियाविशेषणे २या used as an adverb here meaning regularly

3. तेजस्विचक्रम्—(*a*) stars and planets all revolve round the polar region. How ध्रुव attained this ever-steady position is well known ; (*b*) There is constellation of stars known as शिशुमार मण्डल—which revolves round the polar star this meaning also fits in properly.

4. परहितकरणे—परेषां हितानि (ष० त०) तेषां करणम् (ष० त०) तस्मिन् ।

5. संजातव्यर्थपक्षाः—(*a*) व्यर्थः संजातः इति संजातव्यर्थः सुप्सुपेति-समासः तादृशः पक्षः येषां ते संजातव्यर्थपक्षाः । This expression is connected in sense with परहितकरणे as such it should have been compounded with परहितकरण word but it has not been compounded by the dictum सापेक्षत्वेऽपि गमकत्वात् समासः । (*b*) व्यर्थः पक्षः येषां ते व्यर्थपक्षाः (ब० व्री०) ; संजाताः व्यर्थपक्षाः इति संजातव्यर्थपक्षाः (कर्मधा०) । संजात is Superfluous hence अधिकपदन्यदोषः । इति रामचन्द्र ।

6. ब्रह्मण्डोदुम्बरान्तर्मशकवत् etc. :—ब्रह्माण्डम् एव उदुम्बरम् (मयूरव्यंसकादित्वात् रूपकरूपसमासः) । ब्रह्माण्डोदुम्बरम् तस्य अन्तः ष० त०) ; तत्र मशकाः, ब्रह्माण्डोदुम्बरान्तर्मशकाः तद्वत् (तेन तुल्यं क्रिया चेत् वतिः) इति वति-प्रत्ययः उदुम्बरवृक्षस्य फलम् इति उदुम्बर+अण्=उदुम्बरम् ; by " फले लुक् "—अण् is dropped.

7. जातनष्टाः—पूर्वं जाताः पश्चात् नष्टाः जातनष्टाः स्नातानुलि-सवत् तत्पुरुष समासः acc. to पूर्वकालैकसर्वजरत्पुराणनवकेवलाः

Digitization by Arya Samaj Charitable Foundation, Chennai

समानाधिकरणेन् । The sense is as worms are born and they die inside गुल्लर fruit, similarly those persons who do not do any good to others are born uselessly, they live a useless life and die ignoble death.

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम् ।
मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयं
कीर्तिं पालय दुखिते कुरु दयामेतत्सतां लक्षणम् ॥७१॥

अन्वय—तृष्णाम् छिन्धि, क्षमाम् भज, मदम् जहि, पापे रतिम् मा कृथाः, सत्यम् ब्रूहि, साधुपदवीम् अनुयाहि, विद्वज्जनम् सेवस्व, मान्यान् मानय, विद्विषः अपि अनुनय, प्रश्रयम् प्रख्यापय, कीर्त्तिम् पालय, दुःखिते दयाम् कुरु, एतत् सताम् चेष्टितम् (अस्ति) ।

WORDS—तृष्णा = thirst, aspiration, eager desire, रति = attachment, addiction, आसक्ति । अनुनय = win over, प्रसन्न करना । प्रश्रय = modesty, decorum, विनय । लक्षण = characteristic, चिह्न ।

English Translation—Curb your aspiration, have forbearance, shake off pride, donot be addicted to sin, speak truly, follow the footsteps of the good, serve the learned, respect the respectable, win over even your enemies, show modesty, preserve fame, be kind to the distressed, this is the characteristic of the gentlemen.

हिन्दी अनुवाद—लालच छोड़ो, क्षमा करो, घमंड छोड़ो, पाप में मन न लगाओ, सत्य बोलो, सन्त जन जिस मार्ग से चलें उसी से तुम भी चलो, विद्वानों की सेवा करो, पूजनीय लोगों का मान करो, शत्रुओं को

Digitization by Arya Samaj Charitable Foundation, Chennai

भी मिलाये रखो, अपनी नम्रता फैलाओ, अपनी कीर्ति का पालन करो, दुःखियों पर दया दर्शाओ, यही सज्जनों का लोक-व्यवहार है ॥ ७१ ॥

व्याख्या—हे जन ! तृष्णाम् अप्राप्यवस्तुलोभम छिन्धि कृन्त कर्तय, क्षमाम् सहिष्णुताम् भज सेवस्व, मदं गर्वं जहि त्यज, पापे दुष्कर्मणि रतिं प्रीतिं मा कृथाः मा कार्षीः, सत्यं सुनृतं ब्रूहि वद, साधुपदवीम् सन्मार्गम् अनुयाहि अनुसर, विद्वज्जनं पण्डितमण्डलं सेवस्व शुश्रूषस्व ; मान्यान् पूज्यान् मानय पूजय, विद्विषः शत्रून् अपि अनुनय प्रसादय, प्रश्रयं विनयं प्रख्यापय प्रकटय, कीर्त्ति यशः पालय रक्ष, दुःखिते दुःखभाजि दुःखिजने दयां कृपां कुरु । करुणां दर्शय, सहानुभूतिं प्रदर्शय इतिभावः । एतत् सर्वम् तृष्णाच्छेदनादिकम् सताम् सज्जनानाम् लक्षणम् चिह्नम्, इदमेव सज्जनस्य परिभाषा अस्ति । शार्दूलविक्रीडितम् ।

NOTES :—1. छिन्धि = छिद् रुधादि उभ० ; छिनत्ति छिंत्तः छिन्दन्ति etc. छिद् + लोट् + हि = छिन्धि । तृष्णा = तृष् + न + स्त्रियां टाप् । " तृषिशुषिरसिभ्यः कित् " ।

2. पापे रतिं मा कृथाः—पापे has विषयाधिकरणे ७मी । मा कृथाः —" माङि लुङ् " So we have लुङ् here. Then comes " न माङ्योगे " *i. e.* the past tense augment अ does not come when माङ् is used in the prohibitive sense. So we have not got अकृथाः here.

3. साधुपदवीम्—साधूनां पदवी मार्गः ताम् (ष० त०) ।

4. विद्वज्जनम्—विद्वान् एव जनः (मयूरव्यंसकादित्वात् रूपक रूपः स०) ; तम् ।

5. प्रश्रयं प्रख्यापय—show modesty to your elders. 'प्रच्छादय स्वान्गुणान्'—hide your merits, is Kale's reading.

6. दुःखिते—दुःखं संजातं यस्य, दुःख + इतच् (तारकादिभ्यः जातार्थे इतच्) विषयाधिकरणे ७मी ।

7. एतत्—सामान्योपक्रमात् नपुंसकत्वम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून्पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ ७२ ॥

अन्वय—मनसि वचसि काये पुण्यपीयूषपूर्णाः त्रिभुवनम् उपकार-श्रेणिभिः प्रीणयन्तः, परगुणपरमाणून् नित्यम् पर्वतीकृत्य निजहृदि विकसन्तः सन्तः कियन्तः (एव) सन्ति ।

WORDS—पीयूष=nectar, ambrosia, अमृत । परमाणु= atom, minute, an infinitesimal particle ; वि+किस्=to bloom, rejoice (here). कियन्तः—how many ? a few.

English Translation—How many good men are there, who, full of the ambrosia of virtues in thought, word and action, and delighting the three worlds with the series of their acts of beneficence, bloom (rejoice) in their heart in ever making mountain of the minutest merits of others ?

हिन्दी अनुवाद—मन, वच और शरीर द्वारा पुण्यरूपी अमृत से भरे हुए, अपने उपकारों द्वारा तीनों लोकों को प्रसन्न रखने वाले, दूसरों के परमाणु जैसे छोटे से छोटे गुणों को बढ़ाकर पहाड़ के ऐसा सर्वदा बड़ा दिखलाने वाले, अपने मन में सन्तुष्ट रहने वाले सन्त जन दुनियाँ में कितने हैं ? ॥ ७२ ॥

व्याख्या—मनसि वचसिकाये मनोवाक्कायेषु पुण्यम् एव पीयूषम् अमृतम् तेन पूर्णाः । मनसा वाचा कर्मणा सुकर्म आचरन्तः इति भावः । त्रयाणां भुवनानां समाहारः इति त्रिभुवनम् त्रिलोकी । तत् लक्षणया त्रिभुवनस्य जनम् । उपकारश्रेणिभिः हिताचरणपरम्पराभिः प्रीणयन्तः संतोषयन्तः, परेषां गुणाः तेषाम् परमाणून् । अल्पगुणानपि इत्यर्थः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

पर्वतीकृत्य महत्तरान्कृत्य । अधिकीकृत्य प्रशंसन्तः इत्यर्थः । निजहृदि स्वान्तःकरणे विकसन्तः सन्तुष्यन्तः आत्मतुष्टिमनुभवन्तः स्वान्तःसुखमनुभवन्तः वा । सन्तः सत्पुरुषाः सज्जनाः कियन्तः कतिपये सन्ति । मालिनीवृत्तम् ।

NOTES :—1. मनसि वचसि काये—अधिकरणे ७मी ।

2. पुण्यपीयूषपूर्णाः—पुण्यम् एव पीयूषम् (मयूरव्यंसकादित्वात् रूपकरूप स०) तेन पूर्णाः (३या तत्) । पॄ + क्त कर्मणिपूर्ण ।

3. त्रिभुवनम्—त्रयाणां भुवनानां समाहारः इति त्रिभुवनम् । "तद्धितार्थोत्तर पदसमाहारे च"—इत्यनेन समाहारद्विगु । "पात्राद्यन्तस्य न स्त्रीत्वम् " ।

4. उपकारश्रेणिभिः - करणे ३या । उपकाराणां श्रेणयः (ष० त०) ताभिः ।

5. परगुण etc.—परमाः अणवः परमाणवः (कर्मधा) ; गुणानां परमाणवः गुणपरमाणवः, (ष० त०) । परेषां गुणपरमाणवः (ष० त०), तान् (कर्मणि २या) ।

6. पर्वतीकृत्य—अपर्वतान् पर्वतान् करोति इति । पर्वत + च्विः (अभूततद्भावे) + कृ + लट्ति = पर्वतीकरोति । "कृभ्वस्तियोगे संपद्यकर्तरिच्विः अभूततद्भावे—"अस्यच्वौ"—अनेन अकारस्य ईकारः । पर्वतीकृत्य = पर्वत + अभूततद्भावे च्विः + कृ + ल्यप् । why ल्युप् ? why not क्त्वा । Ans :—पर्वतीकृत्य being च्विप्रत्ययान्त is a समास by "ऊर्यादिच्विडाचश्च which makes the च्विप्रत्ययान्त word a गतिसंज्ञक word. Then comes the rule "कुगतिप्रादयः" —allowing them to be compounded with the words connected in sense. These compounds are तत्पुरुष compounds. So समासेऽनञ्पूर्वेक्त्वोल्यप् applies. Hence ल्यप् is used here and not क्त्वा । त् has come by ह्रस्वस्य पिति कृति तुक् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

7. सन्तः—कर्तृपदम् of पर्वतीकृत्य, विकसन्तः and सन्ति। अस्+शतृ=सत्। Present participle used as a noun. "विशेषण मात्रप्रयोगः विशेष्य प्रतिपत्तौ"।

8. विकसन्तः—वि+कस्+शतृ=विकसत्। लक्षणहेत्वोः क्रियायाः allows शतृ to be used to denote "mode or cause of an action"—Here शतृ denotes mode of action. सन्ति।

9. कियत्—"How many or how much." इयत्—"so much or so many," एतावत्=this much यावत्=as many, तावत्=so many—all these are declined like गुणवत्—in masculine. Mark कियान्, कियन्तौ, कियन्तः। कियन्तम्, कियन्तौ, कियतः।

अथ धैर्यपद्धतिः।

रत्नैर्महाब्धेस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम्।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः॥७३॥

अन्वयः—देवाः महाब्धेः रत्नैः न तुतुषुः, भीमविषेण भीतिम् न भेजिरे, सुधाम् विना विरामम् न प्रययुः, धीराः निश्चितार्थात् न विरमन्ति।

Words—महाब्धि=महा+अब्धि=great ocean महासमुद्र; भीम-भयङ्कर deadly, fatal, terrible, भीति=fear; विराम=cessation, stop, rest; ठहराव, विश्राम। निश्चित=fixed, determined; अर्थ=purpose, object, उद्देश।

English Translation—Gods were not satisfied with the gems of the ocean; nor were they terrified with (its) deadly poison they did not take rest

Digitization by Arya Samaj Charitable Foundation, Chennai

until they obtained ambrosia. Firm-minded people do not swerve (or desist) from their fixed purpose.

हिन्दी अनुवाद—समुद्र के रत्नों को मथकर निकाल कर देवता लोग संतुष्ट न रहे, भयानक हलाहल को पाकर भी डरकर बैठ न गये, अमृत को पाये बिना वे लोग विश्रान्त न हुए—उन्हें चैन न मिला। धीर पुरुष अपने निश्चित उद्देश को पूरा किये बिना कभी नहीं रहते, बिना पूरे किये नहीं हटते ॥ ७३ ॥

व्याख्याः—देवाः अमराः महाब्धेः क्षीरसागरस्य रत्नैः कौस्तुभादि-मणिभिः न तुतुषुः न सतोषं प्रापुः। मन्थनसमये इति शेषः। भीमेन भयङ्करेण विषेण गरलेन भीतिम् भयम् न भेजिरे न प्रापुः। सुधाम् अमृतम् विना विरामं विश्रामम् अवसानं वा न प्रययुः गताः। मथनात् न विरताः इति भावः। धीराः मनस्विनः निश्चितः प्रतिज्ञातः योऽर्थः उद्देशः लक्ष्यम् वा तस्मात् न विरमन्ति। विरामं न प्राप्नुवन्ति। आफलोदयात् प्रयतन्ते एव। न फलोत्पत्तिं यावत् विश्रामं लभन्ते इति भावः। उपजातिवृत्तम्। अर्थान्तरन्यासालंकारः।

NOTES :—1. देवाः—कर्तृपद of तुतुषुः ; भेजिरे and विरामं प्रययुः। दिव्यति इति देवः दिव् + अच् (पचादित्वात्)।

2. महाब्धेः—महान् अब्धिः (कर्मधा)। "आन्महतः समानाधि-करणजातीययोः" आपः धीयन्तेऽस्मिन् इति अप् "कर्मण्यधिकरणे च" इति घोः किः।

3. रत्नैः—हेतौ ३या। रमयति इति रत्नम् रम् + णिच् + नः (उणादि) रमेस्त च। "रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्" इति मेदिनी। रत्न means the best of its class. "जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते" इति वचनात् ऐरावतोच्चैः श्रवः कल्पवृक्षादि श्रेष्ठजातीयवस्तुभिः हेतुभिः न तुतुषुः इति रामचन्द्रः।

4. भीम विषेण—भीमं विषम् (कर्म) तेन। बिभ्यति अस्मात् भीमादस्योऽपादाने इति अपादानार्थे भी + म (उणादिः)। हेतौ ३या।

Digitization by Arya Samaj Charitable Foundation, Chennai

In भीमविषेण, we should expect पञ्चमी by भीत्रार्थानां भयहेतुः as it is the भयहेतु of भीतिः। But not so, as the causal relation is desired here. "तथापि हेतुत्वमात्रविवक्षायां निर्देशः इति मन्तव्यम्"।

5. सुधाम्—"पृथग्विना नानाभिः तृतीयान्यतरस्याम्"। अनेन विनायोगे द्वितीया।

6. विरामं प्रययुः—विरेमुः इत्यर्थः। वि+रम्+घञ् (भावे)। प्र+या+लिट् उस्।

7. निश्चितार्थात्—निश्चितः अर्थः (कर्मधा); तस्मात्। पञ्चमी अपादाने। by the rule जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्।

8. विरमन्ति—रम् is आत्मनेपदी but it becomes परस्मैपदी after वि आङ् and परि by the rule "व्याङ्परिभ्योरमः"।

9. Figure is अर्थान्तरन्यास here.

N. B.—लक्ष्मीः कौस्तुभ पारिजातकसुरा धन्वंतरिश्चंद्रमा, गावः कामदुघाः सुरेश्वरगजो रम्भादिदेवांगना। अश्वः सप्तमुखः विषं हरिधनुः शंखोऽमृतं चाम्बुधेः, रत्नानीह चतुर्दश प्रतिदिनं कुर्वन्तु नो मंगलम्। These are the 14 gems.

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः।
विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ॥ ७४ ॥

अन्वयः—नीचैः विघ्नभयेन न प्रारम्भते खलु, मध्याः प्रारम्भ विघ्ननिहताः विरमन्ति, उत्तमजनाः विघ्नैः मुहुः मुहुः प्रतिहन्यमानाः अपि प्रारब्धम् (कर्म) न परित्यजन्ति।

Words—नीच=mean, mean-minded, low; निहत=baffled, thwarted; मुहुः मुहुः=again and again, repeatedly; प्रारब्ध=begun, work begun.

Digitization by Arya Samaj Charitable Foundation, Chennai

English Translation—For fear of obstacles, the low-class people begin nothing at all. The middle-class people begin, but desist when obstructed by obstacles, while the first class people, though repelled repeatedly by obstructions, do not give up what they have (once) begun.

हिन्दी अनुवाद—विघ्न के भय से नीच पुरुष कार्य में हाथ ही नहीं लगाते, मध्यम वर्ग के लोग कार्य आरम्भ करने के बाद विघ्न आ जाने पर झटपट काम से हाथ खींच लेते हैं, परन्तु उत्तम वर्ग के मनुष्य विघ्नों के बार बार आघात करने पर भी अपने शुरू किये काम को नहीं छोड़ते (समाप्त ही कर दिखाते हैं, चाहे कितनी विघ्न वाधायें क्यों न आ पड़ें) ॥ ७४ ॥

व्याख्याः—नीचैः अधमैः विघ्नेभ्यः अन्तरायेभ्यः यत्भयम् तेनहेतुना न प्रारभ्यते खलु, न उत्क्रम्यते। कार्यमिति शेषः। मध्याः मध्यमास्तु प्रारभ्य कार्यम्. उपक्रम्य विघ्नैः प्रत्यूहैः निहताः प्रतिहताः विह्वलीकृताः सन्तः विरमन्ति विरताः भवन्ति। उत्तमजनाः उत्कृष्टाः लोकाः विघ्नैः अन्तरायैः मुहुः मुहुः पुनः पुनः प्रतिहन्यमानाः विहन्यमानाः अपि प्रारब्धम् उपक्रान्तं कर्म न परित्यजन्ति न विसृजन्ति। वृत्तं वसन्ततिलकम्।

NOTES :—1. नीचैः—अनुक्ते कर्त्तरि ३या Low-spirited people.

2. विघ्नभयेन—विघ्नेभ्यः भयम् इति (५मी तत्) ; तेन। हेतौ ३या विघ्न = वि + हन् + क। (मूलबुभुजादिभ्यः कः) भी + अच् = भयम् (एरच्)।

3. नीचैः and मध्याः—these words are adjectives used as nouns here ; "विशेषणमात्र प्रयोगः विशेष्यप्रतिपत्तौ"—इति वामनः।

Digitization by Arya Samaj Charitable Foundation, Chennai

4. विरमन्ति—रम् originally is आत्मनेपदी but "व्याङ्-परिभ्यो: रमः"—makes it परस्मै after वि, आङ् and परि, उपसर्ग।

5. प्रतिहन्यमानाः—प्रति+हन्+कर्मणियक्+शानच्।

6. उत्तमजनाः—उत्तमाः जनाः इति (कर्मधा) : उत्+तमप् (अतिशायने तमप् इष्ठनौ)।

7. प्रारब्धम्—प्र+आ+रभ+क्त (कर्मणि) ; Qual. कर्म—understood. See above विशेषणमात्र प्रयोगः विशेष्यप्रतिपत्तौ। Variants—पुनः पुनरपि in place of मुहुर्मुहुरपि ; उत्तमगुणाः for उत्तमजनाः।

N. B.—This verse is a famous verse of मुद्राराक्षस। It seems to have been culled from that book.

क्वचित्पृथ्वीशय्यः क्वचिदपि च पर्यंकशयनः
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥७५॥

अन्वयः—···कार्यार्थी मनस्वी न दुःखम्, न सुखम्-गणयति।

Words—शय्या=bed ; पर्यंक=couch, sofa, पलँग। शाक=vegetable ; शालि=a superior kind of paddy ; कन्था=a tattered garment, rags, patched garment, गुदड़ी। दिव्य=fine, उत्कृष्ट। अम्बर=cloth, कपड़ा।

English Translation—Sometimes sleeping on ground and sometimes on a couch, sometimes living on (simple) vegetables and sometimes tasting rice of Sali paddy, sometimes wearing rags and sometimes superfine clothes, a high-minded man, seeking to serve his purpose does not care for comforts or sufferings.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—कभी पृथ्वी पर सोते, कभी पलँग पर, कभी साग खाकर दिन काटते कभी बढ़िया चावल का भात खाकर, कभी फटा पुराना चिथड़ा पहनते और कभी बढ़िया रेशमी वस्त्र, यों अपना काम पूरा करने-वाले मनस्वी लोग सुख दुख की परवाह नहीं करते ॥ ७५ ॥

व्याख्या:—क्वचित् कदाचित् कस्मिंश्चित्काले पृथ्वीशय्या यस्य तादृशः भूशायी, क्वचित् च पर्यंके महार्हशय्यायाम् शयनं निद्रा यस्य तादृशः अपि । महार्हशय्याशायी इत्यर्थः ।

क्वचित् शाकः एव आहारः यस्य सः शाकाहारी, क्वचित् शाल्योदने रुचिः स्वादः यस्य सः षड्भोजनसंतुष्टः अपि स्वादुभोजनभोजी, क्वचित् कन्थां धारयति इति कंथाधारी जीर्णशीर्णवस्त्रधारी, क्वचित् च दिव्यम् रम्यम् अम्बरम् वस्त्रम् चीनांशुकधारी, कार्यार्थी कार्यसाधनाभिलाषी मनस्वी धीरः महामनाः पुरुषः दुःखम् पृथ्वीशयनादिना दुःखम् क्लेशम् न गणयति पर्यङ्कशय्यादिना सुखम् च न गणयति । धीरस्तु सुखदुःखयोः समानावस्थया एव कार्यसाधनपरः भवति इति शिखरिणीवृत्तम् ।

NOTES :—1. क्वचित् = It means "at some place" but here it means "at one time." It is an adverb of time here.

2. पृथ्वीशय्यः—पृथ्वी शय्या यस्य (ब० व्री) । शी + क्यप + टाप् शय्यते अस्याम् इति शय्या ।—"भूमीशायी" is another reading.

3. पर्यंकशयनः—पर्यङ्के शयनम् यस्य सः (ब० व्री) । शी + ल्युट् शयनम् ।

4. शाकाहारः—शाकः आहारः यस्य सः (ब० व्री) । आ + हृ + घञ् = (भाव) Other Reading. "शाकाहारी" ।

5. शाल्योदनरुचिः—शाल्योदने रुचिः यस्य सः (ब० व्री) । शाल्याः ओदनः इति (ष० त०) । स्वादिष्टान्नभोजी । Having a liking or taste for dainty dishes.

Digitization by Arya Samaj Charitable Foundation, Chennai

6. कन्थाधारी=कन्था जीर्णशीर्णवस्त्रशकलानि धारयति इति (उपपदतत्)। कन्था+धृ+णिनिः (सुप्यजातौ णिनिः ताच्छील्ये)।

7. दिव्याम्बरधरः—दिव्यम् अम्बरम् (कर्मधा) रम्यं वस्त्रम्। तस्य धरः इति (ष० त०)। धरति इतिधरः। पचादित्वात् अच्।… दिव्+यत् =दिव्यम्। दिवि भवम् इति।

8. कार्यार्थी (*a*) कार्यम् अर्थयते इति कार्य+अर्थ+णिनिः (ताच्छील्ये)=कार्यार्थिन् one that seeks to serve his object. (*b*) अर्थः अभिलाषः तद्वान् इति अर्थ+इनिः (अस्त्यर्थे इनिः)=अर्थी= अभिलाषवान्। कार्येण अर्थी इति कार्यार्थी। Q. which of these two is preferable? Ans. the latter one कार्येण अर्थी इति कार्यार्थी, for the dictum is कृद्वृत्तेः तद्धितवृत्तिः वलीयसी इति महाभाष्यम्।

9. मनस्वी=मनस्+विनिः (अस्मायामेधास्रजो विनिः)। महामना high-minded.

cf. सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ etc. गीता० आर०।

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥७६॥

अन्वयः—नीतिनिपुणाः निन्दन्तु वा, यदि स्तुवन्तु वा। लक्ष्मीः समाविशतु, यथेष्टम् गच्छतु वा, अद्य एव मरणम् अस्तु, युगान्तरे वा अस्तु, धीराः न्याय्यात् पथः पदम् न प्रविचलन्ति।

Words—निपुण=well-versed, skilful, चतुर; नीति= state-policy, state-craft; यथेष्टम्=according to one's will, इच्छानुसार; युगान्तर=another age; न्याय्य=just, right.

Digitization by Arya Samaj Charitable Foundation, Chennai

English Translation—The firm-minded people do not swerve even a step from the just path, whether men well-versed in the conduct of life's affairs may praise or blame, whether goddess of fortune may come in or go away at her sweet will or whether death may occur just to-day or after an age.

हिन्दी अनुवाद—नीतिज्ञ लोग निन्दा करें या प्रशंसा, लक्ष्मी इच्छानुसार आये या चली जाय, आज ही मरण हो या युगों के बाद—परन्तु धीर पुरुष न्याय के मार्ग से कभी विचलित नहीं होते ॥ ७६ ॥

व्याख्या—नीतिनिपुणाः नयविशारदाः निन्दन्तु दूषयन्तु वा यदि अथवा स्तुवन्तु प्रशंसन्तु वा । लक्ष्मीः संपत् समाविशतु आगच्छतु वा उत यथेष्टम् यथेच्छम् यदृच्छया गच्छतु वा । अद्य एव अस्मिन् एव दिने, इदानीम् एव मरणम् मृत्युः अस्तु भवतु, युगान्तरे कल्पान्तरे वा अस्तु । धीराः धैर्यशालिनः स्थिरचित्ताः जनाः न्याय्यात् पथः न्यायमार्गात् पदम् पदविन्यासमात्रम् अपि न प्रविचलन्ति न भ्रश्यन्ति । वसन्ततिलकं वृत्तम् ।

Notes :—1. नीतिनिपुणा—नीतौ निपुणाः इति (७मी तत्) ।

2. लक्ष्मी :—लक्षयति इति लक्ष्मीः ; लक्ष् + ई ; (लक्षेर्मुट् च) लक्ष + म + ई = लक्ष्मी ।

3. यथेष्टम्—इष्टम् अनतिक्रम्य इति यथेष्टम् (अव्ययीभावसमास) इष् + क्त (भावे) = इष्टम् । इष्, इच्छति इयेष, ऐषीत् ।

4. युगान्तरे—अन्यः युगः युगान्तरम् (मयूरव्यंसकादित्वात् नित्यसमासः); तस्मिन् ।

5. न्याय्यात्—Qual. पथः which has अपादाने ५मी । न्याय्यात् अनपेतः इति न्याय + यत् = न्याय्य by "धर्मपथ्यर्थन्यायात् अनपेते यत्" । नि + अय + घञ् = न्यायः ।

6. पदम्—अत्यन्तसंयोगे २या कालाध्वनोरत्यंतसंयोगे adverbial object.

Digitization by Arya Samaj Charitable Foundation, Chennai

7. धीराः—धियं बुद्धिम् ईरयन्ति सर्वतः प्रवर्तयन्ति इति । धी+ईर+अच्—धीरः । the wise.

कान्ताकटाक्षविशिखा न लुनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः ।
कर्षन्ति भूरिविषयाश्च न लोभपाशै-
र्लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥ ७७ ॥

अन्वय :—यस्य चित्तम् कान्ताकटाक्षविशिखाः न लुनन्ति, कोपकृशानुतापः न दहति, भूरिविषयाः लोभपाशैः च न कर्षन्ति, स धीरः कृत्स्नम् इदम् लोकत्रयम् जयति ।

WORDS :—कान्ता = a lovely woman ; कटाक्ष = side-long glance, awry look. विशिख = arrow तीर ; लुनन्ति = cut, pierce, लूञ् छेदने । पाश = फंदा noose, snare, trap, कृत्स्न whole सम्पूर्ण ।

English Translation—That equanimous-minded man conquers the triple world, whose mind, the arrows of side-long glances of lovely woman do not pierce, the heat of the fire of danger does not burn and the numerous sensual objects do not attract with their snares of temptations.

हिन्दी अनुवाद—जिसके मन को सुन्दरी रमणी का कटाक्ष रूपी शर नहीं वेध सकता, और क्रोध रूपी अग्नि का ताप नहीं जला सकता तथा विविध प्रकार की सांसारिक विषय-वासनायें अपने लोभपाशों द्वारा आकृष्ट नहीं कर सकतीं, वही धीर पुरुष इस सम्पूर्ण त्रिभुवन को जीतता है ॥ ७७ ॥

व्याख्या—यस्य धीरपुरुषस्य चित्तम् मनः कान्तायाः कामिन्याः कटाक्षाः अपाङ्गवीक्षितानि, ते एव विशिखाः शराः न लुनन्ति न भिन्दन्ति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

न संमोहयन्ति इति भावः। तथा कोपः क्रोधः एव कृशानुः अग्निः, तस्य तापः संतापः उष्णता न निर्दहति भस्मसात्करोति। तथा भूरयः बहुलाः विषयाः इन्द्रियार्थाः च लोभाः एव पाशाः वागुराः तैः कर्षन्ति आकर्षन्ति स्वायत्तीकुर्वन्ति सः वीरः कृत्स्नम् अखिलम् लोकत्रयम् भुवनत्रयम् जयति आत्माधीनम् करोति। तस्य न किञ्चिदपि असाध्यम् इति तात्पर्यम्। वृत्तं वसन्ततिलकम्।

NOTES: 1. कान्ता etc.—कान्तायाः कटाक्षाः (ष० त०) ते एव विशिखाः कान्ताकटाक्षविशिखाः (मयूरव्यंसकादित्वात् रूपक रूपः) समासः)।

2. कोप etc.—कोपः एव कृशानुः (मयूर etc रूपकरूप) तस्य तापः (ष० त०)।

3. भूरिविषयाः—भूरयः विषयाः इति (कर्मधा)

4. लोभपाशैः—लोभाः एव पाशाः (मयूरव्यंस...रूपकरूपस०) ; तैः करणे ३या।

5. लोकानां त्रयम् लोकत्रयम् (ष० त०) ; त्रि + अयच् = त्रयम्, "द्वित्रिभ्यां तयस्य अयच्वा" इति त्रितयम् or त्रयम्, द्वितयम् or द्वयम्।

6. पाठान्तरम्—तर्षन्ति for कर्षन्ति, लोभपाशा for लोभपाशैः।

कदर्थितस्यापिहिधैर्यवृत्तेर्न शक्यते धैर्यगुणः प्रमार्ष्टुम्।
अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखायान्ति कदाचिदेव ॥७८॥

अन्वय :—कदर्थितस्य अपि धैर्यवृत्तेः (जनस्य) धैर्यगुणः प्रमार्ष्टुम् न शक्यते हि। अधोमुखस्य कृतस्य अपि वह्नेः शिखाः कदाचित् एव अधः न यान्ति।

WORDS—कदर्थित = slighted, teased, (तिरस्कृत) धैर्य = patience, fortitude, धैर्यवृत्ति = धीर fortitudinous, heroic brave.

Digitization by Arya Samaj Charitable Foundation, Chennai

English Translation—The fortitude of the fortitudinous, though they be slighted cannot be wiped out. The flames of the fire, turned downwards seldom go downwards.

हिन्दी अनुवाद—धीर पुरुष का धैर्यगुण मिटाया नहीं जा सकता चाहे वह कितना क्लेशापन्न क्यों न हो। उलट देने पर भी अग्नि की शिखा नीचे की ओर कभी नहीं जाती, उसकी ज्वाला ऊपर को ही भागती है ॥ ७८ ॥

व्याख्या—कदर्थितस्य कुत्सितः अर्थः इति कदर्थः, कदर्थीकृतः कदर्थितः न्यक्कृतः तस्य, नीचैः कृतस्यापि सतः, धैर्येण वृत्तिः वर्त्तन यस्य तस्य धैर्यवतः धीराचारस्य, धैर्यम् एव गुणः इति धैर्यगुणः प्रमार्ष्टुम् निराकर्तुम् न शक्यते। अत्र दृष्टान्तः दीयते । अधोमुखस्य कृतस्य अवाङ्मुखीकृतस्य अपि वह्नेः अग्नेः शिखाः ज्वालाः कदाचिदेव अधः नीचैः न यान्ति। किन्तु ऊर्ध्वमेव प्रसरन्ति इत्यर्थः दृष्टान्तालंकारः। वृत्तम् उपजातिः।

Notes :—1. कदर्थितस्य—कुत्सितः अर्थः कदर्थः। कु becomes कत् in तत्पुरुष before any vowel कु + अर्थः = कद् + अर्थः = कदर्थः। कदर्थयति, कुत्सितार्थं करोति slights, disdains, teases कदर्थयति is a नामधातु। कदर्थितः = न्यक्कृतः = despised, teased etc.

2. धैर्यवृत्तेः—धैर्येण वृत्तिः यस्य इति धैर्यवृत्तिः (व्यधिकरण बहुव्रीहिः) तस्य धीरस्य भावः इति धीर + ष्यञ् = धैर्यम्। वृत् + क्तिन् = वृत्तिः। संबन्धे षष्ठी।

3. धैर्यगुणः—धैर्यम् एव गुणः इति (मयूरव्यंसकादित्वात् रूपक रूप समासः)। उक्ते कर्मणि प्रथमा। प्रादिपदिकार्थमात्रे १ मा।

Digitization by Arya Samaj Charitable Foundation, Chennai

4. प्रमार्ष्टुम्—प्र + मृज् + तुमुन् । तुमुन् by शकधृषज्ञा etc Mark the conjugation of this root.

5. अधोमुखस्य—अधः अधोगतं मुखम् यस्य सः अधोमुखः । तस्य । अधोमुखस्य कृतस्य is an unusual construction. It should be अधोमुखीकृतस्य । Mr. Telang accepts the reading, तनूनपातः । तनूनपात् = अग्निः This reading will set every thing right. "अधोमुखस्यापि तनूनपात:"—is really a better reading. Mr. Kale objects to this as an obscure word rarely used in literature and though found in dictionary. So अप्रयुक्तत्वदोष arises according to him here.

6. Figure is दृष्टान्त here.

वरं श्रृंगोत्संगाद्गुरुशिखरिणः क्वापि विषमे
पतित्वायं कायः कठिनदृषदन्ते विगलितः ।
वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः ॥ ७६ ॥

अन्वय—अयम् कायः गुरुशिखरिणः श्रृङ्गोत्संगात् क्वापि विषमे कठिनदृषदन्ते पतित्वा विगलितः वरम् । हस्तः तीक्ष्णदशने फणिपतिमुखे न्यस्तः वरम् । वह्नौ पातः वरम् । तदपि शीलविलयः कृतः सन् न वरम् ।

Words :—काय = body, गुरु lofty, high, उच्च शिखरिन् = mountain, one having a peak ; उत्संग = lap or top here, गोद ; दृषद् = stone, पत्थल । विगलितः = चूर्ण smashed or crushed to pieces ; दशन = tooth, fang ; दाँत । विलय = dissolution, destruction, wreck विनाश ।

English Translation—Better if this body falling from the top of a peak of a mountain on some rugged

Digitization by Arya Samaj Charitable Foundation, Chennai

part of a hard rock, be crushed to pieces ; better that the hand be thrust into the sharp fanged mouth of a deadly serpent ; better to fall into fire, still it is not better to wreck (*i. e.* to lose) one's character.

हिन्दी अनुवाद—ऊँचे पहाड़ के शिखर पर से अपने को नीचे किसी कठिन पथरीली जमीन पर गिरा कर जान दे देना कहीं अच्छा है, बड़े विषैले साँप के दाँतों के बीच हाथ डाल देना कहीं अच्छा है, जलती हुई धधकती आग में कूद पड़ना कहीं अच्छा है—परन्तु शील भ्रष्ट होना—चरित्र हीन होना किसी हालत में अच्छा नहीं ॥ ७९ ॥

व्याख्या—अयं कायो देहः गुरुः उन्नतः यः शिखरी पर्वतः तस्य शृङ्गोत्संगात् शिखरोपरिभागात् क्वापि कस्मिंश्चिद्विषमे विकटे कठिनदृषदन्ते कर्कशपाषाणोपरि पतित्वा विगलितः शकलितः चूर्णितश्चेत् वरम् ईषत्प्रियम् तथा हस्तः करः. तीक्ष्ण दशने उग्रद्रंष्ट्रापूर्णे फणिपतिः सर्पाधिराजः तस्य मुखे वक्त्रे न्यस्तः निहितः चेत्, वरम् मनाक्प्रियम् । तथा वह्नि पातः प्रवेशः वरम् । किन्तु शीलविलयः चरित्र भ्रंशः कृतः चेत्, न वरम् । सद्वृत्तभ्रष्टेन न भवितव्यम् । प्राणसंकटे अपि शीलं रक्षणीयम् इति तात्पर्यम् । शिखरिणीवृत्तम् । "दैवाद्वृतेवरः श्रेष्ठे त्रिषु क्लीवं मनाक्प्रिये" इत्यमरः ।

NOTES :—1. गुरुशिखरिणः—गुरुः शिखरी (कर्मधा) ; तस्य । शिखर+इनिः (अस्त्यर्थे) शिखरिन् । सम्बन्धे षष्ठी ।

2. शृङ्गोत्संगात्—शृङ्गस्य उत्संगः (ष० त०) ; तस्मात् । अपादाने ५मी ।

3. कठिनदृषदन्ते—कठिना दृषत् (कर्मधा) ; तस्याः अन्तः (षष्ठी त०) । तस्मिन् । अधिकरणे ७मी ।

4. तीक्ष्णदशने—तीक्ष्णाः दशनाः यस्मिन् तत् तीक्ष्णदशनम् Qual. फणिपतिमुखे । दश्यते अनेन इति दशनम् । करणे ल्युट् । दंश+ल्युट् । or दशति इति दशनः । नन्द्यादित्वात् ल्युः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

5. फणिपतिमुखे—फणिनां पतिः, तस्य। फणिपतेः मुखम् (६ त०), तस्मिन्। अधिकरणे ७मी।

6. शील विलयः—शीलस्य सद्वृत्तस्य विलयः भ्रंशः ध्वंसः इति (६ठी तत्)। शीलविलयः कृतश्चेत् न वरम् The sense is that one should prize character above everything else.

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा—
न्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते।
यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति॥ ८०॥

अन्वयः—यस्य अङ्गे अखिललोकवल्लभतमम् शीलम् समुन्मीलति तस्य वह्निः जलायते, जलनिधिः कुल्यायते तत्क्षणात् मेरुः स्वल्पशिलायते, मृगपतिः सद्यः कुरङ्गायते, व्यालः माल्यगुणायते, विषरसः पीयूषवर्षायते।

Words—वल्लभ = dear, prizable, प्रिय। कुल्यायते = acts like a canal, कुल्या = नहर canal; कुरङ्ग = dear, हरिण। माल्यगुण = string of garland; पीयूष = ambrosia, nectar.

English Translation:—Fire acts like water, the ocean becomes a canal, the Meru mountain becomes at once a small slab of stone, the lion behaves immediately like a deer, the serpent like a string of garland and the poisonous juice becomes a shower of nectar to that man in whose body flourishes good character, the most prized thing in the entire world.

हिन्दी अनुवाद—जिस मनुष्य के शरीर में सारे संसार की प्यारी, वस्तु शील है उसके लिये आग पानी हो जाती, समुद्र नहर हो जाता, मेरु पहाड़ तत्काल ही छोटी शिला हो जाता, सिंह तुरंत ही हरिण हो जाता, सर्प पुष्पमाला हो जाता और उसके लिये विष अमृत हो जाता है॥ ८०॥

Digitization by Arya Samaj Charitable Foundation, Chennai

व्याख्या :—यस्य पुरुषस्य अङ्गे शरीरे अखिललोकानाम् समस्तजनानाम् वल्लभतमम् प्रियतमम् अत्यन्तमनोहरम् शीलम् सद्वृत्तम् सच्चरित्रम् समुन्मीलति समुल्लसति तस्य पुंसः वह्निः दाहकः अपि सन् जलायते जलमिव आचरति। शीतलः भवति इति भावः। जलनिधिः समुद्रः तत्क्षणात् तस्मिन् एव क्षणे, अविलम्बेन कुल्यायते कुल्या इव अल्पनदी इव आचरति। दुस्तरोऽपि समुद्रः क्षुद्रनदीवत् सुतरां भवति इति भावः। मेरुः मेरुपर्वतः अल्पशिलायते अल्पदृषत् इव आचरति, मृगपतिः सिंहः सद्यः सत्वरम् कुरङ्गायते हरिणः इव आचरति। हिंस्रोऽपि सिंहः हिंसारहितः भवति इति भावः। व्यालः सर्पः माल्यगुणायते मालागुण इव पुष्पस्रग् इव आचरति। विषम् एव रसः द्रवः। प्राणहरणहेतुः अपि। पीयूषवर्षायते अमृतवृष्टिः इव आचरति। जीवनदायकः भवति इति भावः। सर्वे दुःख हेतवः शीलसंपन्नस्य नरस्य सुखहेतवः एव भवन्ति। "सर्वत्र कर्तुः क्यङ् सलोपश्च" इति क्यङ्। 'अकृतसार्वधातुकयोः'—इति दीर्घम्। अलंकारः उपमाभेदः। कृञर्थात् औपम्य प्रतीतिः। शार्दूलविक्रीडितवृत्तम्।

NOTES—1. अखिललोक etc.—अखिलाः लोकाः (कर्म०) तेषां वल्लभतमम् (षष्ठी तत्)। वल्लभ+तमप्। Qual. शीलम्।

2. तस्य=towards him or in his case. षष्ठी is used in the sense of तदर्थ ; *i. e.* in the sense of तस्मै। अश्वघासादिवत् तादर्थ्ये षष्ठी। अश्वस्य घासः अश्वघासः means grass for the horse, धर्मस्य पत्नी धर्मपत्नी means wife for religious rites; similarly तस्य, means here not 'his' but 'for him' towards him, in his case, etc.

3. जलायते—नाम धातु from जलम्, जलम् इव आचरति इति जलायते "कर्तुः क्यङ् सलोपश्च" इति क्यङ्। जल+क्यङ् लट् ते। अकृतसार्वधातुकयोः—इति दीर्घः।—Similarly in case of all denominative verbs occurring in this verse.

Digitization by Arya Samaj Charitable Foundation, Chennai

4. कुल्या (canal) इव आचरति इति कुल्यायते । कुल्या+क्यङ् +लट् ते स्वल्पशिला इव आचरति । स्वल्पशिलायते, स्वल्पशिला+क्यङ+ लट् ते । कुरङ्गः इव आचरति कुरङ्गायते । *i. e.* becomes tame like a deer. माल्यानांगुणः माल्यगुणः इव आचरति माल्यगुणायते । पीयूषस्य वर्षाः ; पीयूषवर्षाः इव आचरति पीयूषवर्षायते । produces the enlivening effects of *a shower* of nectar.

5. Figure is उपमा । But it is not उपमा clear and manifest. It is suggested by the verbs " क्यङर्थात् औपम्यप्रतीतेः उपमाभेदः" इति रामचन्द्रः ।

छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः
इति विमृशन्त-सन्तः संतप्यन्ते न विप्लुता लोके ॥८१॥

अन्वयः—तरुः छिन्नः (सन्) अपि पुनः रोहति, चन्द्रः क्षीणः अपि पुनः उपचीयते इति विमृशन्तः सन्तः लोके विप्लुताः अपि न संतप्यन्ते ।

Words :—छिन्न=mowed down, cut down कटा, क्षीण =waned ; उपचीयते=waxes बढ़ता है । वि+मृश=to reflect, विचारना । विप्लुत=overflooded by miseries, दुःखपीडित ।

English Translation :—A tree, though cut down, grows again ; the moon, though waned, waxes again ; thus reflecting, the good are not afflicted in this world though plunged in miseries.

हिन्दी अनुवाद—काटने पर भी वृक्ष बढ़ता है, क्षीण होने पर भी चन्द्रमा फिर बढ़ जाता है, यह सोच कर सन्त लोग संसार में दुःख-पीड़ित होने पर भी दुःखित नहीं होते ॥ ८१ ॥

व्याख्या—तरुः वृक्षः छिन्नः भिन्नः कर्तितः कृत्तः सन् अपि पुनः भूयः रोहति उद्गच्छति उत्पद्यते । चन्द्रः कृष्णपक्षे क्षीयते, क्षीणः कृशः अपि पुनः शुक्लपक्षे उपचीयते प्रवर्धते इति । एवंविमृशन्तः मनसि

Digitization by Arya Samaj Charitable Foundation, Chennai

चिन्तयन्तः सन्तः सत्पुरुषाः लोके संसारे विप्लुता आपदाभिभूताः अपि न संतप्यन्ते न दुःखम् अनुभवन्ति । आर्याभेदः वृत्तम् ।

NOTES :—1. छिन्नः—छिद् + क्त (कर्मणि) । क्षीणः = क्षि + क्त "क्षियो दीर्घात्" । क्षि क्षये । क्षयति etc.

2. उपचीयते—उप + चि कर्मणि यक् लट् ते means to wax, to increase in bulk. अप + चि, अपचीयते means to decrease in bulk.

3. संतप्यन्ते । (*a*) सम् + तप् + कर्मणि यक् लट् अन्ते । are grieved or afflicted. (*b*) सम् + तप् + कर्मकर्त्तरि यक् लट् अन्ते । But is a serious objection.

4. विप्लुताः = वि + प्लु + क्त वि + प्लु = to become confused; to be ruined ; to be overpowered by miseries of life.

5. पाठान्तरम्—न लोकेषु in place of विप्लुता लोके । Ramachandra explains it लोकेषु बन्धुजनेषु विह्वलेषु सत्सु अपि न संतप्यन्ते । are not grieved though their relations are very much upset in the world :—The reading given in this book is much better in sense.

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमः प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ ८२ ॥

अन्वयः—ऐश्वर्यस्य सुजनता विभूषणम्, शौर्यस्य वाक्संयमः, ज्ञानस्य उपशमः, श्रुतस्य विनयः, वित्तस्य पात्रे व्ययः, तपसः अक्रोधः, प्रभवितुः क्षमा, धर्मस्य निर्व्याजता ; सर्वकारणम् इदम् शीलम् सर्वेषाम् अपि परम् कारणम् (अस्ति) ।

Digitization by Arya Samaj Charitable Foundation, Chennai

WORDS :—ऐश्वर्य=power, supremacy ; उपशम=quietitude शान्ति control of passions ; प्रभवितृ=a man in power, powerful man, शक्तिमान् । निर्व्याजता=candidness, non-hypocrisy निष्कपटता, निश्छलता ।

English Translation :—Gentlemanliness is the ornament of power, restraint over speech, that of bravery ; quietitude is (the ornament) of self-knowledge, modesty that of Vedic knowledge; spending over worthy recipient is (the ornament) of wealth ; non-anger, that of penance ; forgiveness is (the ornament) of great majesty and freedom from hypocrisy, that of piety ; while this good character, the root of all these, is the greatest ornament of all.

हिन्दी अनुवाद—ऐश्वर्य का विभूषण सुजनता, शूरता का वचन-संयम, ज्ञान की शान्ति, शास्त्र पढ़ने का विनय, धन का सत्पात्र में दान करना, तपस्या का क्रोध नहीं करना, प्रभुता का भूषण है क्षमा, और धर्म का निश्छलता—यह शील बड़ा भारी भूषण है, यह सब की जड़ है ॥ ८२ ॥

व्याख्या—ऐश्वर्यस्य स्वाम्यस्य सुजनता सौजन्यं भद्रता विभूषणम् । न तु दौर्जन्यम् । शौर्यस्य वीरतायाः वाक्संयमः वाचादमनम् । न तु व्यर्थप्रलापित्वम् । ज्ञानस्य आत्मज्ञानस्य उपशमः शान्तिः चित्तशान्तिः । न चित्तस्य चंचलता । श्रुतस्य शास्त्रस्य शास्त्रपुराणश्रवणस्य भूषणं तु विनयः विनीतता । न तु गर्वपूर्णता वित्तस्य धनस्य पात्रे सत्पात्रे योग्यपात्रे व्ययः धनदानं विभूषणम । न तु विटनटवेश्या व्ययः । तपसः तपस्यायाः अक्रोधः कोपहीनता विभूषणम् । न तु कोपशीलता । प्रभवितुः निग्रहानुग्रह समर्थस्य प्रभोः अर्थात् सामर्थ्यस्य क्षमा सहिष्णुता भूषणम् । न तु उद्दण्डता । धर्मस्य निर्व्याजता व्याजशून्यता आडम्बरशून्यता । तथा

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वकारणम् सकलमूलम् इदम् शीलम् सच्चरित्रम् सर्वेषाम् अपि सकललोकानाम् अपि परम् उत्कृष्टम् भूषणम् अस्ति। अतः सर्वदा शीलमेव आश्रयणीयम् इति तात्पर्यम्। शार्दूलविक्रीडितम्।

NOTES :—1. ऐश्वर्यस्य—ईश्वर+ष्यञ्; ईश्+वरच् (स्थेशभासपिसकसो वरच्)। सम्बन्धे षष्ठी।

2. विभूषणम्—विभूष्यते अनेन इति वि+भूष्+करणे ल्युट्।

3. शौर्यस्य वाक्संयमः—शूर+ष्यञ्=शौर्य। वाचि संयमः इति वाक्संयमः ७मी तत्। सम्+यम्+अप्=संयमः। यमः समुपनिविषु च अप् वा स्यात् घञ् च भवति।

4. उपशमः—उप+शम्+घञ्। (नोदत्तोपदेशस्य मान्तस्य अनाचमेः) Quietitude of mind, subduing the passions.

5. श्रुतस्य—शास्त्रस्य, शास्त्रज्ञानस्य। "श्रुतं शास्त्रावधृतयोः" इति विश्वः। Modesty is the ornament of a man's being vastly learned in Sastras.

6. अक्रोधः—न क्रोधः इति (नञ् तत्) Sometimes नञ् implying प्रसज्य प्रतिषेध also is compounded as here. "क्वचित् प्रसज्यप्रतिषेधेऽपि नञ् समासः इष्यते" इति रामचन्द्रः।

7. प्रभवितुः—प्रभवितृ=प्र+भू+तृच्; तस्य। This is the only concrete noun used in this sloka for प्रभावस्य।

8. निर्व्याजता—निर्गतः व्याजः यस्मात् सः निर्व्याजः (ब० व्री०) तस्य भावः, निर्व्याज+तल् (भावे)+टाप् स्त्रियाम्=निर्व्याजता freedom from or want of hypocrisy; candidness.

9. (*a*) अपि in सर्वेषामपि seems to be superfluous or (*b*) अपि meaning here "च" is used in समुच्चय sense. No च is used in this verse though one at least should be

Digitization by Arya Samaj Charitable Foundation, Chennai

used in the last sentence to join all the sentences. अपि serves the purpose of च here. "गर्हासमुच्चयप्रश्नशंकासंभावनास्वपि" इत्यमरः ।

अथ दैवपद्धतिः ।

नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावतो वारणः ।
इत्याश्चर्यबलान्वितोऽपि बलभिद्भग्नः परैः संगरे
तद्व्यक्तं ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम् ॥८३॥

अन्वयः—यस्य नेता बृहस्पतिः, प्रहरणम् वज्रम्, सुराः सैनिकाः स्वर्गः दुर्गम् ; हरेः अनुग्रहः खलु, वारणः ऐरावतः 'इति आश्चर्यबलान्वितः अपि बलभित् संगरे परैः भिन्नः । तत् व्यक्तम् दैवम् एव ननु शरणम् ।' धिक् धिक् पौरुषम् वृथा ।

Words—नेता = adviser, guide, प्रहरण = weapon, शस्त्र । दुर्ग = fort, किला । अनुग्रह = favour ; वारणः = हाथी । elephant. बलभित् = enemy of demon Bala इन्द्र ; संगर = battle, युद्ध । भिन्न = routed, worsted, खदेड़ा हुआ । शरण = refuse. पौरुष = valour, manliness, विक्रम ।

English Translation—Indra, though possessed of wonderful prowess was routed in battle by his enemies ; Indra who had बृहस्पति for his adviser (lit. leader), thunder-bolt for his weapon, gods for his warriors, heaven for his fort, and who verily enjoyed the favour of Lord Hari, and had Airavata for his elephant. It is, therefore, clear that fate alone is indeed the (final) refuse ; fie, fie, valour is all futile.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—जिस इन्द्र के नेता (सलाहकार) स्वयं बृहस्पति थे, जिसका हथियार वज्र था और सैनिक सारे देवगण, जिसका कि दुर्ग स्वर्ग था, और जिस पर स्वयं भगवान् विष्णु की कृपा रहती थी, जिसका ऐरावत हाथी था, ऐसा अद्भुतबलसमन्वित इन्द्र भी समर में अपने शत्रुओं से हार खाकर भाग जाते थे। इसलिये यह स्पष्ट है कि भाग्य का ही एक भरोसा है, छी! छी!! पौरुष वृथा है ॥ ८३ ॥

व्याख्या:—यस्य बलभिदः इन्द्रस्य नेता हिताहितोपदेशकः बृहस्पतिः स्वयमेव देवगुरुः, प्रहरणम् आयुधम् वज्रम् कुलिशम्, सैनिकाः योधाः सुराः देवाः, 'न तु दुर्बल लोकाः। स्वर्गः स्वर्लोकः दुर्गम् गुप्तिस्थानम्। न तु मृत्पाषाणादिनिर्मितप्राकारः। हरेः स्वयम् विष्णोः खलु अनुग्रहः दया दृष्टिः। तस्य अनुजरूपेण विष्णोः अवतीर्णत्वात्। वारणः गजः ऐरावतः। न तु यः कश्चित् साधारणः गजः। इति अनेन प्रकारेण आश्चर्यबलान्वितः अद्भुतशक्तिसंपन्नः बलभित् इन्द्रः संगरे रणे परैः शत्रुभिः दानवैः भग्नः विदारितः विद्रावितः। तत् तस्मात् कारणात् व्यक्तम् स्पष्टम् यथा तथा दैवम् भाग्यम् एव रक्षकम्। न तु पौरुषम्। पौरुषम् पुरुषकारम् धिक् धिक्। पुनः पुनः निन्द्यम् इति भावः। वृथा व्यर्थम् निष्प्रयोजनम्। साभिप्राय विशेषणत्वात् परिकरालंकारः। शार्दूलविक्रीडितम्।

NOTES:—1. बलभित्—बलम् भिनत्ति इति बल+भिद्+क्विप्। Bala was a great Vedic demon whom Indra is said to have killed in battle.

2. बृहस्पतिः—बृहतां वाचां पतिः इति बृहस्पतिः। "तद्बृहतोः करपत्योः चौरदेवतयोः सुट् तलोपश्च" *i. e.* त् of तत् and बृहत् is dropped before कर and पति and स is added, when they mean चौर and देवता respectively. बृहस्पति was the spiritual guide and counseller of Indra as is well-known.

3. हरेः अनुग्रहः खलु—who had the favour of Vishnu. It is well-known (खलु) that Indra enjoyed Vishnu's

Digitization by Arya Samaj Charitable Foundation, Chennai

favour : Indra is the elder brother and उपेन्द्र *i. e.* विष्णु his younger brother. So Vishnu always tries to please and obey his elder brother Indra. खलु = implies here प्रकाश्य *i. e.* " as is well-known."

4. ऐरावतः—इरः आपः सन्ति अस्मिन् इति इरावान् (समुद्रः) तत्र भवः born in Ocean, sprung from the sea. This elephant was churned out from the ocean and given to Indra. Probably this elephant was a royal white elephant procured in Burma on the bank of the river Iravati and so its name ऐरावत। Even now-a-days a big white elephant, though very rarely is procured in Assam and Burma.

5. आश्चर्यबलान्वितः—आश्चर्यम् बलम् (कर्मधा) ; तेन अन्वितः (३यात०) आश्चर्य is both adjective and noun meaning wonderful and wonder both.

6. व्यक्तम्—Clearly, व्यक्तं यथा स्यात् तथा। So clearly fate alone is really the protector.

7. दैवमेव शरणम्—शरणम् is always neuter, अजहल्लिंगत्वात्।

8. धिक् धिक् (*a*) governs, वृथा पौरुषम्। Fie, Fie upon the vain valour (*b*) धिक् धिक् is an interjection used separately ; and पौरुषं वृथा is taken separately then Fie, Fie, valour is useless।

9. बृहस्पतिः वज्रं, सुराः स्वर्गः, हरेः अनुग्रहः ऐरावतः etc. are all used to denote some special purpose, hence परिकरालंकारः।

Digitization by Arya Samaj Charitable Foundation, Chennai

भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि परं वृद्धौ क्षये कारणम् ॥ ८४ ॥

अन्वयः—आखुः नक्तम् विवरम् कृत्वा करण्डपिण्डिततनोः क्षुधा म्लानेन्द्रियस्य भग्नाशस्य भोगिनः मुखे स्वयम् निपतितः, तत्पिशितेन तृप्तः असौ सत्वरम् तेन एव पथा यातः ! हे जनाः । स्वस्थाः तिष्ठत, वृद्धौ क्षये च दैवम् एव हि परम् कारणम् ।

WORDS—आखु=rat, mouse, चूहा । नक्तम्—at night, रात । करण्ड=a small box made of bamboo, (पेटारी, झाँपी) ; पिण्डित=coiled, भीड़िआया हुआ । भग्नाश=heart-broken, despondent ; भोगिन्=hooded serpent, सर्प । पिशित=raw flesh, मांस ।

English Translation—A rat, making a hole at night, into a basket-box, fell of his own accord, into the mouth of a heart-broken serpent coiled therein, with all his senses enfeebled by hunger. Being well satisfied with its flesh, the snake soon went out (of the box) through that very path (cut by the rat). Be at ease, O men, it is destiny alone that is the cause of the rise and fall (of men).

हिन्दी अनुवाद—एक साँप पिटारे में बन्द, जान से निराश हो भूख के मारे शिथिल पड़ा गुड़ियाया बैठा था । रात में एक चूहा उस पिटारे में छेद करके आप से आप उस साँप के मुँह में जा गिरा । उसका मांस खा, तृप्त होकर वह साँप उसी छेद में होकर तुरंत बाहर निकल भागा । हे लोगो ! स्थिर रहो, वृद्धि और क्षय का, उन्नति अवनति का बड़ा कारण भाग्य ही है ॥ ८४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

व्याख्या :—आखुः मूषिकः नक्तम् रात्रौ विवरम् विलम्, करण्डे विलम् कृत्वा इति भावः भग्नाशस्य भग्नमनोरथस्य करण्डे वंशमंजूषायाम् पिण्डिकायाम् पिण्डिता पुञ्जीकृता तनु शरीरः यस्य कुण्डलीकृतदेहस्य, क्षुधा बुभुक्षया म्लानेन्द्रियस्य शिथिल करणस्य भोगिनः फणिनः सर्पस्य स्वयम् एव दैववशात् मुखे वदने निपतितः। ततः असौ सर्पः तस्य मूषकस्य पिशितेन मांसेन तृप्तः संतुष्टः सन् तेन एव मूषिककृतेन विवरमार्गेण एव शीघ्रम् यातः वहिर्गत्वा पलायितः। अतः हे जनाः। इति शेषः स्वस्थाः विश्रान्ताः स्थिरचित्ताः तिष्ठत। कुतः। वृद्धौ क्षये उन्नतौ अवनतौ च दैवम् एव नियतिः भाग्यम् वा हि परम् उत्कृष्टम् कारणम् अस्ति। न तु अन्यत्। किञ्चित्। शार्दूलविक्रीडितम्।

NOTES :—1. करण्डपिण्डिततनोः—Qual. भोगिनः। करण्डे पिण्डिता इति करण्डपिण्डिता (७मी तत्), तादृशी तनुः यस्य (ब० व्री०), तस्य। पिण्डः अस्य संजातः इति पिण्ड+इतच् (जातार्थे)=पिण्डितः heaped up. *i. e.* coiled ; "तदस्य संजातम् इति तारकादिभ्यः इतच्"।

2. म्लानेन्द्रियस्य=म्लानानि इन्द्रियाणि यस्य सः (ब० व्री), whose senses were weakened by hunger. म्लै+क्त=म्लानः। इन्द्र+घः=इन्द्रियम्। क्षुधा has हेतौ तृतीया, क्षुध्+क्विप्=क्षुध्, तया। क्षुधा is connected in sense with म्लान and so these two should have been compounded together. "सापेक्षत्वेऽपि गमकत्वात् समासः" allows. compounding, with other words, in spite of inter-connection of two other words as the connection is clear (गमकत्वात्)।

3. भग्नाशस्य—भग्नाः आशाः यस्य (ब० व्री०) ; whose hopes of escape, and life were shattered.

4. भोगिनः—सम्बन्धे षष्ठी। भोगः—hood ; भोग इनिः having a hood, hooded serpent.

Digitization by Arya Samaj Charitable Foundation, Chennai

5. स्वयमेव—The mouse of its own accord fell into the serpent's mouth. See the powerfulness of fate.

6. पिशितेन—करणे तृतीया । तृप् + (कर्तरि) = तृप्तः ।

7. सत्वरम्—त्वरया सह वर्त्तमानं यत् तत् (तेन सह इति तुल्ययोगे ब० व्री०) तत् यथा स्यात् तथा । क्रियाविशेषणे द्वितीया ।

8. तेनैव पथा—through the path, *i. e.* the hole cut by the mouse, करणे ३या ।

9. वृद्धौत्तये:—when a word meaning cause is used then the effect often takes सप्तमी । This is the general idiom of Sans. Lit. *Vide* Apte's Guide A. 95.

यथा कन्दुकपातेनोत्पतत्यार्यः पतन्नपि
तथा तु अनार्यः पतति मृत्पिण्डपतनं यथा ॥ ८५ ॥

अन्वयः—आर्यः पतन् अपि कन्दुकपातेन यथा उत्पतति तथा तु अनार्यः मृत्पिण्डपतनम् यथा पतति ।

English Translation—A noble man, though fallen, rebounds like the throw (fall) of a ball, the ignoble one falls like the downward fall of a lump of clay.

हिन्दी अनुवाद—भले लोग गेंद के ऐसे गिर गिर कर फिर भी ऊपर उठते हैं, पर नीच लोग ढेले के ऐसे गिर कर फिर नहीं उठते, (गिरे के गिरे ही रह जाते हैं) ॥ ८५ ॥

व्याख्या—आर्यः दैवायत्तिकः पतन् अपि कुतश्चित् कारणात् नीचैः भवन् अपि कन्दुकपातेन यथा उत्पतति उच्छ्रूयं प्राप्नोति, किन्तु अनार्यः मृत्पिण्डपतनम् यथा पतति चूर्णितं भवनि लीनो भवति । इववद्वा यथाशब्दौ इति आचार्य दण्डी । अनुष्टुभ् वृत्तम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

Notes :—1. आर्य=a noble or a cultured man. But रामचन्द्र बुधेन्द्र says that it means दैवायत्तिकः one who depends on fate.

2. कन्दुकपातेन—करणे ३या ।

3. यथा is used in the sense of वत् or इव *i. e.* like मृत्पिण्डपतनम् यथा=like the fall of a lump of clay.

खल्वाटो दिवसेश्वरस्य किरणैः संतापिते मस्तके
गच्छन्देशमनातपं द्रुतगतिस्तालस्य मूलं गतः ।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र दैवहतकस्तत्रैव यान्त्यापदः ॥ ८६ ॥

अन्वय :—खल्वाटः दिवसेश्वरस्य किरणैः मस्तके संतापिते सति द्रुतगतिः सन् अनातपम् देशम् गच्छन् तालस्य मूलम् गतः । तत्र अपि पतता महाफलेन अस्य शिरः सशब्दम् भग्नम् । दैवहतकः यत्र गच्छति आपदः प्रायः तत्र एव यान्ति ।

Words :—खल्वाट=bald-headed man; द्रुतगति=speeding fast ; अनातप=sun-less, *i. e.* shady. सशब्दम्, with a great noise, with a crash.

English Translation—A bald man, being scorched up on his head by the rays of the sun, speeding fast, looking for a shady (lit. sun-less) place, went to the root of a Palmyra tree. There, too, his head was broken with a great crash by a big Tala fruit falling from the tree. Misfortunes go wherever the ill-fated man goes. Or misfortunes follow the unlucky, wherever they go.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—कोई गंजा मनुष्य सूर्य की किरणों से संतप्त हो, छायादार जगह की खोज में तेजी से चलता चलता एक ताल के वृक्ष के नीचे जा खड़ा हुआ। पर वहाँ पर भी ताल का बड़ा भारी फल जोर से उसके शिर पर गिर पड़ा, जिससे उसका सिर फट करके फूट गया। प्रायः देखा जाता है कि अभागा जहाँ जहाँ जाता है विपत्ति भी उसके पीछे ही पीछे लगी जाती है ॥ ८६ ॥

व्याख्या—खल्वाटः लुप्तलोमशिरस्कः जनः मस्तके निजशिरसि दिवसेश्वरस्य दिनेशस्य किरणैः रश्मिभिः संतापिते सति द्रुता गतिः यस्य तादृशः द्रुतगतिः शीघ्रगामी सन् अनातपम् आतपरहितम् देशम् स्थानम् गच्छन् तालस्य तालवृक्षस्य मूलं गतः अधस्तात् अतिष्ठत्। तत्रापि तालमूले अपि पतता वृन्तात् गलता महातालफलेन अस्य शिरः मस्तकम् सशब्दम् यथा तथा महता रवेण भग्नम् विदलितम् कुतः इत्थम् भोः ? दैवहतकः दैवोपहतः जनः दुर्भाग्यः जनः यत्र गच्छति आपदः उपद्रवाः अपि प्रायः तत्रैव यान्ति गच्छन्ति। अर्थान्तरन्यासः अलंकारः। शार्दूलविक्रीडितम्।

NOTES :—1. खल्वाट = A man on whose head there is very little growth of hair, a bald-headed man. He is unfortunate that he has no hair on his head ; he is heated by the sun-rays, runs hither and thither for shade, finds a Tala tree which gives little or no shade. There too as his ill luck would have it, a big Tala fruit falls from the tree just over his bald head. Lo ! the head of that luckless man is cracked with a great noise. Ah ! Fate pursues him whersover he goes.

2. मस्तके—भावे ७मी। मस्तके संतापिते सति।

3. अनातपम्—अविद्यमानः आतपः यस्मिन् सः अनातपः (ब० व्री०) तम्। Qual. देशम्। " नञस्त्यर्थानाम् etc. "। देशम्—कर्म of गच्छन्।

Digitization by Arya Samaj Charitable Foundation, Chennai

4. द्रुतगतिः—द्रुता गतिः यस्य सः (ब० व्री०) ।

5. सशब्दम्—शब्देन सह वर्त्तमानम् यत् (तुल्ययोगे बहु) तत् यथा स्यात् तथा । क्रियाविशेषणे २या ।

6. दैवहतकः— (*a*) दैवेन हतः इति दैवहतः+स्वार्थे कन् ; an ill-fated man. (*b*) हतम् दैवम् यस्य स हतदैवः or दैवहतः by "वाहिताग्न्यादिषु" । Then "शेषात् विभाषा" समासान्त कप् ।

गजभुजंगविहंगमबन्धनं शशिदिवाकरयोर्ग्रहपीडनम्
मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ॥८७॥

अन्वयः—गजभुजंगविहंगमबन्धनम्, शशिदिवाकरयोः ग्रहपीडनम् मतिमताम् दरिद्रताम् च विलोक्य अहो विधिः बलवान् इति मे मतिः ।

English Translation—Seeing the capture of the elephant, the serpent and the bird ; seeing the oppression of the sun and the moon by the planet Rahu ; and seeing the poverty of the talented people, I do think, " Ah ! Destiny is all powerful."

हिन्दी अनुवाद—हाथी, साँप और पक्षी का बाँधा जाना, चन्द्रमा और सूर्य में ग्रहण लगना, और बुद्धिमानों की दरिद्रता को देखकर मेरी राय में तो यही बात ठीक जँचती है कि "भाग्य बलवान् है" ॥ ८७ ॥

व्याख्या—स्पष्टार्थः अयंश्लोकः । ग्रहेण राहुणा पीडनम् ग्रासः, मतिमताम् प्राज्ञानां दरिद्रताम् धनहीनताम् विलोक्य दृष्ट्वा अहम् मन्ये यत् विधिः सर्वेषामपि बलिष्ठम् ।

Notes :—1. गजभुजंग etc.—गजश्च भुजंगश्च विहंगमश्च गज-भुजंगविहंगमाः (द्वन्द्वः) तेषां बन्धनम् (ष० त०) भुजं वक्रं गच्छति इति । भुज+गम्+खच् (गमेः सुपि वाच्यः)=भुजङ्गमः or भुजंगः (खच डिद्वा वाच्यः) भुज+गम्+ड gives भुजगः only विहायसा आकाशेन गच्छति इति विहायस+गम्+खच (गमेः सुपि वाच्यः) ।

Digitization by Arya Samaj Charitable Foundation, Chennai

"विहायसो विह इति वाच्यम्" । विह+गम्+खच्=विहंगमः or विहंगः । म् in भुजम् and विहम् comes by "अरुष्—द्विषत् अजन्तस्य खित् मुम्" ।

2. शशि etc.—शशी च दिवाकरश्च शशिदिवाकरौ (इतरे द्वन्दः) तयोः कर्मणि षष्ठी by कर्तृकर्मणोः कृति षष्ठी ।

3. ग्रहपीडिनम्—ग्रहेण पीडनम् इति (३या तत्) ग्रह+अच् (पचादित्वात्)=ग्रहः "ज्योतिषिग्रहः" "विभाषा ग्रहः" says that affix 'णः' is added optionally to ग्रह् । पक्षे अच् । ग्रह्+णः=ग्राहः (मकरः); जलचरे ग्राहः । ज्योतिषि ग्रहः । इति सि० कौमुदी ।

4. (*a*) There is one कर्त्ता अहम् of विलोक्य and मतिः । and so समानकर्तृकयोः पूर्वकाले क्त्वा applies. (*b*) Better supply स्थितस्य after विलोक्य then the कर्त्ता of विलोक्य and स्थितस्य would be the same (अहम्) दरिद्रतां विलोक्य स्थितस्य मे मतिः । 'स्थितस्य' इति पदाभ्याहारात् एककर्तृकता संपाद्या इति शिरोमणिपादाः ।

Cf. "विधुरपि विधि योगाद्ग्रस्यते राहुणासौ
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः" हितोपदेशः ।

Mr. Telang notes that this verse गजभुजंग etc. is given as वेतालभट्ट's composition in काव्यसंग्रहः ।

5. Figures are अर्थान्तरन्यास and काव्यलिङ्गम् ।

सृजति तावदशेषगुणाकरं पुरुषरत्नमलंकरणं भुवः
तदपि तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता विधेः ॥८८॥

अन्वयः—(विधिः) तावत् अशेषगुणाकरम् भुवः अलंकरणम् पुरुषरत्नम् सृजति । तत् अपि तत्क्षणभङ्गि करोति चेत्, विधेः अपण्डितता, अहह कष्टम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

WORDS—आकरः = mine, खान। अशेष = complete, संपूर्ण। पुरुषरत्न = a gem among men, *i. e.* an excellent man, तत्क्षणभङ्गि = frail at that very time ; अपण्डितता = folly, indiscretion, मूर्खता।

English Translation :—The Creator does create a gem of man, an ornament of the world, a mine of all good qualities; still if he makes that (gem in form of a man) very frail, then alas ! woe to the folly of the Creator !

हिन्दी अनुवाद—ब्रह्मा सर्वगुण सम्पन्न, पृथ्वी का भूषण, पुरुष रत्न की सृष्टि तो करता है सही परन्तु उसे वह क्षणभंगुर बना देता है, हाय ! दुःख ! ब्रह्मा की कैसी मूर्खता है ? ॥ ८८ ॥

व्याख्या—विधिः स्रष्टा अशेषगुणाकरम् सकलगुणनिधिम भुवः पृथिव्याः अलंकरणम् भूषणम् पुरुषरत्नम् नरश्रेष्ठम् तावत् करोति, निर्मांति-खलु। ततः किम् ? अतः आह। तत् अपि तथापि सृजन् अपि इत्यर्थः। तत् पुरुषरत्नम् क्षणभङ्गि क्षणभंगुरम् नश्वरम् करोति चेत्, विधेः स्रष्टुः अपण्डितता मूर्खता अस्ति अहह कष्टम्। अतिकृच्छ्रम्। वृत्तं द्रुतविलम्बितम् अहह इति अद्भुते खेदे इत्यमरः। श्रेय खेदो।

NOTES—1. विधिः—Nom. of सृजति is understood here. Should be supplied from the context.

2. तावत्—Some commentators interpret this as 'प्रथमम्' But here it seems to have been used in अवधारणे *i. e.* in the sense of strong affirmation or emphasis. यावतावश्चौ साकल्येऽवधौ मानेऽवधारणे इत्यमरः। सृजति तावत् सृजति खलु = does create (in emphatic tone).

3. पुरुषरत्नम्—(*a*) पुरुषः एव रत्नम् इति (मयूरव्यंसकादित्वात् रूपकरूपः समासः, a gem of man, a gem in the shape of

Digitization by Arya Samaj Charitable Foundation, Chennai

man. It can't be explained correctly as पुरुषः रत्नम् इव (jewel-like man). as 'क्षणभङ्गि' neuter word clearly shows that प्रधानता is given to रत्न in the comp. पुरुषरत्नम् (1) Hence रूपकरूप समास and no उपमितसमास is available. (2) पुरुषेषु रत्नम् श्रेष्ठः (७मी तत्); जातो जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते।

4. अशेष गुणाकरम्—अशेषाः गुणाः इति (कर्मधा); अशेषगुणानाम् आकरः (ष० त०) तम्। Qual. पुरुषरत्नम्।

5. तदपि=तथापि; still, yet. Mr. Kale takes तत् to mean पुरुषरत्नम् but he does not seem to be right; the second तत् in तत्क्षणभङ्गि refers to पुरुषरत्नम् otherwise this तत् is useless as the sense of क्षणभङ्गि is complete and does not require तत् at all; as it means "breaks at that very moment" a man does not die as soon as created or *born* says Kale "स एव क्षणः, तत्क्षणः, the moment a man becomes Purusharatna तस्मिन् भज्यते इत्येवं शीलम्"। what a novel interpretation.

6. क्षणभङ्गि=क्षणेन क्षणमात्रेण भंक्तुम् शीलं यस्य तत् क्षण+भञ्ज्+घिनुण (ताच्छील्ये)=क्षणभङ्गिन्।

7. अहह—shows *i. e.* sorrow or regret। "अहह! अद्भुतेखेदे"। Alas!

अयममृतनिधानं नायकोऽप्यौषधीनाम्
शतभिषगनुयातः शंभुमूर्ध्नोऽवतंसः।
विरहयति न चैनं राजयक्ष्मा शशाङ्कं
हतविधि परिपाकः केन वालङ्घनीयः॥ ८६॥

अन्वय:—अयम् अमृतनिधानम् अपि औषधीनाम् नेता अपि

Digitization by Arya Samaj Charitable Foundation, Chennai

शतभिषगनुयातः अपि शम्भुमूर्ध्नः अवतंसः अपि (तथापि) राजयक्ष्मा एनम् शशाङ्कम् च न विरहयति । हतविधिपरिपाकः केन वा लङ्घनीयः ।

WORDS—भिषक् = physicians, वैद्य । अवतंस = ear-ring or head ornament, कर्णभूषण । राजयक्ष्मा—consumption ; क्षयरोग । परिपाकः—ordinance, result, consequence. विधान, फल ।

English Translation—Though he is the repository of ambrosia, and the lord of herbs ; though he is followed by hundred physicians (or the constellation Sátábhiṣak) and is the crest-ornament of the head of Lord Shiva, yet consumption does not spare the moon. Or who can transgress the ordinance (consequence) of accursed fate ?

हिन्दी अनुवाद—यद्यपि यह चन्द्रमा अमृत का खजाना है, संजीवनी आदि औषधियों का मालिक है, सौ वैद्यों से घिरा रहता और स्वयं शिव के शिर का भूषण है तथापि इस चन्द्रमा को भी राजयक्ष्मा रोग नहीं छोड़ता—इसे भी धर दबाता है । अथवा भाग्य का लिखा —विधि के विधान को कौन मिटा सकता है ? (दुर्भाग्य के फल को कौन लाँघ सकता है ?) "विधि का लिखा को मेटन हारा" ॥ ८६ ॥

व्याख्या—अयम् परिदृश्यमानः चन्द्रः अमृतस्य पियूषस्य विधानम् स्थानम् अपि, ओषधीनाम् संजीवन्यादीनाम् नायकः नेता अपि, शतभिषजा नक्षत्रेण, शतेन भिषग्भिः वैद्यैश्च अनुयातः अनुसृतः अपि, किं बहुना ? शम्भोः शंकरस्य मूर्ध्नः शिरसः अवतंसः शिरोभूषणम् अपि, एनम् उक्त विशेषणविशिष्टम् शशाङ्कम् चन्द्रम् राजयक्ष्मा क्षयरोगः न च विरहयति त्यजति । तमपि पीडयति हि । अतः हतविधेः नष्टदैवस्य परिपाकः नियोगः केन वा पुंसा लंघनीयः । न केनापि इत्यर्थः । मालिनी वृत्तम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

NOTES—1. अमृतनिधानम्—अमृतस्य निधानम् (ष० त०); निधीयते अस्मिन् इति नि+धा+ल्युट् (अधिकरणे)।

2. ओषधीनाम्—ओषः पाकः धीयते अत्र इति ओषधिः a plant. a medicinal drug, a herb which dies on the riping of its fruits. The moon is called the Lord of Herbs, for the plants thrive probably under the influence of the moon. *Cf.* Rig. Veda. X. 84. सोमेनादित्याः बलिनः सोमेन पृथिवी मही Sayana comments on this अमृतसेकेन ओषध्याभिवृद्ध्या पृथिव्याः बलवत्वम्। The real fact seems to be that the plant सोम is called ओषधिनाथ, the lord of all the herbs. When सोम word came to mean 'the moon' then all the epithets of plant सोम came to be ascribed to सोम the moon.

3. शतभिषगनुयातः—(*a*) शतम् भिषजः (कर्मधा), शतभिषग्भिः अनुयातः इति (३या तत्) followed by a hundred physicians. (*b*) शतभिषक् is the name of the 24th mansion (शततारकाः) containing one hundred stars. Then, followed by the constellation शतभिषक् by name.

4. शम्भुमूर्ध्नः—शम्भोः मूर्धा (ष० त०); तस्य (संबन्धे षष्ठी) The moon is the abode of nectar and quite inaccessible to any disease, he is the Lord of the medicine, so he can be well treated with his medicines; he is followed by so many physicians, and enjoys the divine favour of Lord Shiva as well, so he has all the means of getting rid of the fell disease phthisis; still consumption assails him every month. Ah! how powerful is the ordinance of fate?

Digitization by Arya Samaj Charitable Foundation, Chennai

5. राजयक्ष्मा —(*a*) राज्ञः चन्द्रस्य यक्ष्मा इति (ष० त०) (*b*) यक्ष्माणां रोगाणां राजा इति राजयक्ष्मन् like राजदन्तः। "राजदन्तादिषु परम्" *cf.* "राजयक्ष्मेव रोगाणां समूहः स महीभृताम्" Sisupal II 96. यथाह वाहटः—"अनेकरोगानुगतो बहुरोग पुरोगमः। राजयक्ष्मा क्षयोऽशेषरोगराडिति च स्मृतः"। (*c*) राजा चासौ यक्ष्मा च इति राजयक्ष्मा" नक्षत्राणां द्विजानां च राज्ञोऽभूद् यदयंपुरा, यच्चराजा च यक्ष्मा च राजयक्ष्मा ततो मतः। The moon paid sole attention to Rohini. So दक्षप्रजापति, the father-in-law of the moon, cursed him to be eternally consumptive for his neglecting his (दक्ष's) other daughters. At the intercession of his wives the punishment of eternal consumption was commuted to one of periodical consumption.

6. हतविधिपरिपाकः—हतः विधिः इति (कर्मधा) तस्य परिपाकः नियोगः विधानम् वा (ष० त०) ; the ordinance of fate or the consequence of fate.

प्रियसख ! विपद्दण्डाघातप्रपातपरम्परा
परिचयचले चिन्ताचक्रे निधाय विधिः खलः।
मृदमिव बलात्पिण्डीकृत्य प्रगल्भकुलालवद्-
भ्रमयति मनो नो जानीमः किमत्र विधास्यति ॥ ९० ॥

अन्वय—हे प्रियसख ! खलः विधिः प्रगल्भकुलालवत् मनः मृदम् इव बलात् पिण्डीकृत्य विपद्दण्डाघात प्रपातपरम्परा परिचयचले चिन्ताचक्रे निधाय भ्रमयति, अत्र किम् विधास्यति इति नो जानीमः।

Words—प्रगल्भ = bold and skilful ; कुलाल = potter ; पिण्डीकृत्य = rolling into a ball (of clay) ; आघात = blow, stroke, चोट। प्रपात = fall. पतन। परिचय = familiarity.

Digitization by Arya Samaj Charitable Foundation, Chennai

English Translation—Dear friend, wicked fate, like a skilful potter, having perforce rolled our mind, like a lump of clay, whirls it round and round by placing it on the wheel of anxiety, revolving on, being driven by the series of the fall of the strokes of the rod in the form of adversity ; we donot know what fate will do in this matter.

हिन्दी अनुवाद—प्यारे दोस्त ! दुष्ट ब्रह्मा ढीठ कुम्हार की भाँति मेरे चित्त को माटी का लोना (मृत्पिण्ड) बना कर चिन्ता रूपी चाक पर उसे चढ़ा विपत्ति रूपी डण्डे की मार से घुमा (नचा) रहा है। मैं नहीं जानता वह क्या करेगा। कैसी कैसी विपत्ति मुझ पर पड़ेगी मैं नहीं जानता ॥ ९० ॥

व्याख्या—प्रियश्चासौ सखा च इति प्रियसखः तस्य संबुद्धौ हे प्रियसख। खलः शठः विधिः प्रगल्भः चतुरः कुलालः कुम्भकारः तेन तुल्यम् प्रगल्भकुलालवत् चतुरकुम्भकारतुल्यः मनः अस्मदीयं चित्तम् मृदम् मृत्तिकाम् इव बलात् बलात्कारेण पिण्डीकृत्य कपालीकृत्य विपद् एव दण्डः विपद्दण्डः, तस्य आघाताः तेषां, प्रपाताः, तेषां परम्परा पुनरावृत्तिः तस्याः परिचयः, तेन चलति इति चलम् गमनशीलम् तस्मिन् चिन्ता एव चक्रम्, तस्मिन् निधाय भ्रमयति। अत्र भ्रमणे सः विधिः किं करिष्यति इति नो जानीमः। हरिणी वृत्तम्।

NOTES—1. प्रियसख ! संबोधने प्रियश्चासौ सखा च इति प्रियसखः, प्रिय+सखि=टच्। "राजाहः सखिभ्यष्टच्"।

2. विपद्दण्डा etc.—विपत् एव दण्डः, (मयूरव्यंसकादित्वात् रूपक-रूपः) विपद्दण्डः, तस्य आघाताः (ष० त०) ; तेषां प्रपाताः (ष० त०) ; तेषां परम्परा (ष० त०) ; तस्याः परिचयः (familiarity, association) ; तेन चलम् (३या तत्) ; तस्मिन् Qual. चिन्ताचक्रे। चलति इति चल्+अच् (पचादित्वात्)।

Digitization by Arya Samaj Charitable Foundation, Chennai

3. चिन्ताचक्रे—चिन्ता एव चक्रम् (मयूरव्यंसकादित्वात् रूपकरूपः समासः) ; तस्मिन् ।

4. बलात्—हेतौ पञ्चमी ।

5. पिण्डीकृत्य—अपिण्डं पिण्डम् करोति इति पिण्ड+अभूततद्भावे च्विः+कृ+ल्यप् । "ह्रस्वस्यपिति कृतितुक्" ।

6. प्रगल्भकुलालवत्—प्रगल्भश्चासौ कुलालश्च इति (कर्मधा) तेन तुल्यम् प्रगल्भकुलालवत् । वतिः has come by. तेन तुल्यम् क्रिया चेत् इति वतिः ।

7. Fig. is उपमा ।

N. B.—Fate is identified with a potter, anxiety is identified with a wheel, Mind is identified with a clay-lump, and calamity is identified with the potter's rod. A potter places clay-lump on the wheel and strikes the wheel with his rod making it revolve round and round till a pot, as desired by him is shaped. Similarly, fate places (our) mind on anxiety *i. e.* fate subjects our mind to anxiety and strikes it again and again with calamity. But we do not know what shape is to be given to *our mind.* " Fate whirls the mind of man by causing them anxiety and plunging them into miseries."—Kale.

विरम विरमायासादस्माद्दुरध्यवसायतो
विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे ।
अयि ! जड विधे ! कल्पापायेऽप्यपेतनिजक्रमाः
कुलशिखरिणः क्षुद्रा नैतेन वा जलराशयः ॥ ६१ ॥

अन्वय—अस्मात् दुरध्यवसायतः आयासात् विरम विरम अयि ।

Digitization by Arya Samaj Charitable Foundation, Chennai

जडविधे कल्पापाये अपि एते कुलशिखरिणः क्षुद्राः सन्तः अपेतनिज क्रमाः न ; न वा जलराशयः (तादृशाः) ।

Words—दुरध्यवसाय = wicked pursuit or perseverance, आयास = toil, endeavour, प्रयास । धैर्य = fortitude. ध्वंस = giving way, wreck, नाश । कल्पापाये = at the end of the life of the universe, कल्पान्त । कुलशिखरिन् = कुल पर्वत, seven mountains (of India). See notes.

English Translation—O fate ! if you desire to see the fortitude of the magnanimous give way in adversity, desist, please desist from this endeavour, your wicked pursuit. O block-headed fate ! Even at the time of the final destruction of the world, neither the Kula-mountains nor the oceans are so mean as to transgress their usual bounds (*i. e.* they remain within their bounds). Or O ye block-head, they are not mean-minded Kula-mountains or the oceans, who transgress their bounds at the time of destruction of the creation.

हिन्दी अनुवाद—रे मतिमन्द विधि ! तुम जो विपत्ति-काल में महापुरुषों का धैर्य-नाश देखने की चेष्टा करता है, अपने उस दुष्ट प्रयास को छोड़ो । कल्पान्त होने पर भी कुल पर्वत और समुद्र इतने छोटे नहीं होते कि अपनी मर्यादा को लाँघ जायँ ॥ ६१ ॥

व्याख्या—अस्मात् दुरध्यवसायतः दुष्टः अध्यवसायः यस्मिन् सः दुरध्यवसायः तस्मात् आयासात् प्रयासात् विरम विरम आभीक्ष्ण्येन विरतो भव । कोऽसौ आयासः ? विपदि त्वत्कृतापदि महतां महात्मनां धैर्यध्वंसम् धैर्यभ्रंशम् ईक्षितुं द्रष्टुम् ईहसे इच्छसित्वम् । इति अस्मात् आयासात् विरम । व्यर्थस्ते । प्रयासो भविष्यति न कदापि महान्तः स्वधैर्यं त्यजन्ति इति भावः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

दृष्टान्तं ददाति। (क) अयि जड ! मतिमन्द ! विधे ! दैव ! कल्पापाये कल्पान्ते अपि एते कुलशिखरिणः क्षुद्राः नीचाः सन्तः अपेतनिजक्रमाः विनष्टमर्यादाः अतिक्रान्तस्वमर्यादाः न भवन्ति। न वा जलराशयः सप्तसमुद्राः व्यपेतनिजक्रमाः सन्ति। दृष्टान्तः अलंकारः। (ख) अथवा एते महापुरुषाः कल्पापाये कल्पान्ते व्यपेतनिजक्रमाः नष्टस्वमर्यादाः कुलशिखरिणः कुलपर्वताः न, जलराशयः न वा समुद्राः न वा। कुलपर्वताश्च समुद्राश्च कल्पान्ते स्वस्वमर्यादांत्यजन्ति परन्तु एते महापुरुषाः महासंकटे अपि स्वमर्यादां न त्यजन्ति इति भावः। अतः व्यतिरेकालंकारः। हरिणीवृत्तम्।

Notes :—1. दुरध्यवसायतः—दुर् दुष्टः अध्यवसायः यस्मिन् सः (ब० व्री०) तस्मात्। Qual. आयासात् पञ्चम्यां तसिल्। अधि+अव +सो+घञ्।

2. आयासात्—पञ्चमी by जुगुप्सा विरामप्रमादार्थानाम् उपसंख्यानम्। " विरम " इति योगे = अपादाने ५मी।

3. धैर्यध्वंसम्—धैर्यस्यध्वंसः (ष० त०), तम्। कर्म of ईक्षितुम्।

4. कल्पापायः—कल्पस्य सृष्टेः अपाये नाशे अपि महाप्रलये अपि इति भावः।

5. अपेतनिजक्रमाः—अपेताः नष्टाः निजक्रमाः निजमर्यादा येषां ते अपेतनिजक्रमाः नष्टस्वमर्यादाः (ब० व्री०)। (*a*) Who depart from their usual course, *viz.* (1) Remaining firm and supporting the world. (2) Keeping within their limits. Men truly great are not अपेतनिजक्रम in adversity (विपदि) but the mountains and oceans are so at the time of महाप्रलय। Thus the former are superior to the latter. So व्यतिरेकालंकार। (*b*) " कुलशिखरिणः अपेतनिजक्रमाः क्षुद्राः च न भवन्ति। न वा एते जलराशयः " Says Telang. Compare. Virach. p. 110 (Trith.). " न कम्पन्ते झञ्झामारुतिकिलवाति प्रतिदिशम्। समुन्मूर्च्छसाराः कुलशिखरिणः

Digitization by Arya Samaj Charitable Foundation, Chennai

क्चिदपि ते । Again कदापि सत्पुरुषाः शोकवास्तव्याः न भवन्ति । न नु प्रवातेऽपि निष्कम्पाः गिरयः । Shakuntal VI. Mr. Jogleka Quotes " गिरयो गुरवस्तेभ्योऽप्युर्वीगुर्वी ततोऽपि जगदण्डम् । तस्मादपि अतिगुरवः प्रलयेऽपि अचला महात्मानः " Bhaur. VII. 1.

6. कुलशिखरिणः—" महेन्द्रो मलयः सह्यः सानुमानृक्षपर्वतः विन्ध्यश्च पारिपात्रश्च सप्तैते कुलपर्वताः " These are the seven mountain ranges (in India).

7. जलराशयः—There are seven oceans. " लवणेक्षु. सुरासर्पिर्दधिक्षीरजलार्णवाः " इति सप्तसमुद्राः ।

8. व्यतिरेकालंकारः or दृष्टान्तालंकारः ।

दैवेन प्रभुणा स्वयं जगति यद्यस्य प्रमाणीकृतं
तत्तस्योपनमेन्मनागपि महान्नैवाश्रयः कारणम् ।
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं
सूक्ष्मा एव पतन्ति चातकमुखे द्वित्राः पयोबिन्दवः ॥६२॥

अन्वयः—प्रभुणा दैवेन जगति यस्य यद् स्वयम् प्रमाणीकृतम् तत् तस्य स्वयम् उपनमेत्, महान् आश्रयः मनाक् अपि नैव कारणम् । सर्वाशापरिपूरके जलधरे प्रत्यहम् वर्षति अपि चातकमुखे सूक्ष्माः एव द्वित्राः पयोबिन्दवः पतन्ति ।

Words—प्रभु = all powerful, सर्वशक्तिमान । प्रमाणीकृत = allotted, निर्दिष्ट ; apportioned, fixed ; मनाक् = little, slightly, थोड़ा । द्वित्राः = two or three, दो या तीन ।

English Translation—Whatever is allotted to a man by all powerful Destiny, presents itself to him. Great patronage is not at all the cause (of his getting anything). Though the cloud, the fulfiller of the desires of all, showers rain everyday, still only two

Digitization by Arya Samaj Charitable Foundation, Chennai

or three small drops of water fall into the mouth of the Chataka bird.

हिन्दी अनुवाद—सर्वशक्तिमान् दैव ने जिसको जितनी वस्तु अपने आप लिख दी है, उसको वह वस्तु उतनी मिलेगी ही। बड़ा आश्रय इसका तनिक भी कारण नहीं। सबों की आशा पूरी करनेवाला मेघ रोज बरसता रहता है तौ भी चातक के मुँह में दो ही तीन बूँदें गिरती हैं॥ ६२॥

व्याख्या—प्रभुणा शक्तिशालिना समर्थेन दैवेन नियत्या जगति लोके यस्य नरस्य यद् वस्तु प्रमाणीकृतम् निर्दिष्टम्, प्राप्यत्वेन निर्णीतम्, भाग्ये विहितम्, तद् वस्तु तस्य नरस्य स्वयम् बिना कस्यापि साहाय्येन, उपनमेत, संगच्छेत्। महान् आश्रयः महताम् आश्रयः आश्रितत्वम् मनाक् ईषद् अपि कारणम् साधनम् न एव। बहुफलप्राप्तौ इति शेषः। अत्र दृष्टान्तम् उत्क्षिपति। सर्वेषाम् सकलानाम् लोकानाम् आशा मनोरथः तस्य परिपूरकः दायकः सकलमनोरथदायके सकलदिगन्तव्यापके वा जलधरे मेघे प्रत्यहम् प्रतिदिनम् वर्षति सति अपि चातकस्य पक्षिणः मुखे वदने चञ्चुपुटे सूक्ष्माः अत्यल्पाः अणाः एव द्वौ वा त्रयः वा द्वित्राः एव पयोबिन्दवः जलबिन्दवः जलकणाः पतन्ति। दृष्टान्तालंकारः। शार्दूलवि०।

Notes—1. प्रभुणा—all-powerful; it does not mean here 'master or lord.' By "एकाजुत्तरपदे णः"। भु is एकाजुत्तरपद and therefore णत्वम् by रषाभ्यां नोणः समानपदे। प्रभवति इति प्र+भू+डु (उणादिः)=प्रभुः।

2. प्रमाणीकृतम्=allotted, apportioned. अप्रमाणम् प्रमाणम् कृतम् इति प्रमाण+अभूततद्भावेच्विः+कृ+क्त (कर्मणि)। कृभ्वस्तियोगे संपद्यकर्त्तरि च्विः। अभूततद्भावे। "अस्य च्वौ इत्यनेन अकारस्य ईकारः।

3. उपनमेत्—संभावनायाम् लोट्। उप+नम्=to fall to

Digitization by Arya Samaj Charitable Foundation, Chennai

one's share, to present, to offer, compare " कस्यात्यन्तं सुखमुपरतं दुःखमेकान्ततो वा " उ० मेघ। " इदमुपनतमेवं रूपमक्लिष्टकान्ति "—Sak. V. 19.

4. महान् आश्रयः मनाक् अपि नैव कारणम्—The patronage of the great is not the least cause of getting anything. A man gets whatever fate has allotted to him. No big man, a prince or a king can give him more than his allotted portion.

5. सर्वाशापरिपूरके—(*a*) सर्वाः आशाः दिशः (कर्मधा०) तासाम् परिपूरके (ष० त०)। तस्मिन्। Qual. जलधरे। The cloud who fills up all the quarters etc. (*b*) सर्वेषाम् आशाः मनोरथाः (ष० त०); तेषां परिपूरकः (ष० त०) तस्मिन् जलधरे। The cloud who fulfills the desires of all.

6. जलधरे—धरति इति धरः धृ+अच् (पचादित्वात्)। जलस्य धरः इति (ष० त०)। भावे ७मी। वर्षति जलं वर्षति सति।

7. प्रत्यहम्—अहनि अहनि इति प्रत्यहम् (अव्ययीभावः)। " अनश्च " " नपुंसकादन्यतरस्याम्। समासान्त टच् is added to अव्ययीभाव compounds ending in अन्। This टच् is optional with a neuter base in the अव्ययीभाव as उपचर्मम् or उपचर्म।

8. द्वित्राः—द्वौ वा त्रयो वा इति द्वित्राः (वार्थे बहुव्रीहिः)। " संख्यया अव्ययासन्नादूराधिकसंख्याः संख्येये " अनेन ब० व्री०। So द्वौ वा त्रयो वा द्वित्रि, then comes 'डच्' प्रत्यय by बहुव्रीहौ संख्येये डच् अबहुगणात् "। द्वित्रि+डच्+द्वित्राः why बहुवचनम्? " तत्रयुक्ते बहुवचनम् " इति भाष्यकारः।

9. Figure is दृष्टान्त।

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ कर्मपद्धतिः

नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियत कर्मैकफलदः ।
फलं कर्मायत्तं यदि किमपरैः किं च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ ६३ ॥

अन्वयः—देवान् नमस्यामः, ते अपि हतविधेः वशगाः ननु, विधिः वन्द्यः सः अपि प्रतिनियतकर्मैकफलदः, यदि फलम् कर्मायत्तम्, तर्हि अपरैः किम् ? विधिना च किम् ? तत् कर्मभ्यः नमः, येभ्यः विधिः अपि न प्रभवति ।

Words—वशगा = subject to, to be under the power of. वशीभूत । नियत = predetermined, fixed, आयत्त = अधीन, dependent on.

English Translation—We salute gods, they, too are subject to accursed fate; the fate ought to be worshipped; but even fate gives only the well-adjusted fruit of one's action. If the fruit be dependent on one's actions, what to do with gods or what over with destiny? Therefore all our obeisance to actions, which even fate cannot prevail.

हिन्दी अनुवाद—देवताओं को प्रणाम करता हूँ, पर वे भी दुष्ट विधि के वश में हैं। तब वह विधि ही वन्दनीय है, पर वह भी कर्म के अनुसार ही निश्चित फल देता है। यदि फल कर्म ही पर निर्भर है, तब दूसरों की क्या जरूरत ? विधि से भी क्या प्रयोजन ? इसलिये कर्म को ही प्रणाम, जिन पर विधि का भी कुछ भी वश नहीं चलता ॥ ६३ ॥

व्याख्या—देवान् इन्द्रादीन् नमस्यामः अभिवादयामः पूजयामः । न ते स्वतंत्राः । ते देवाः अपि हतविधेः नियतेः वशगाः अधीनाः वशीभूताः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अतः विधिः नियतिः वन्द्यः पूज्यः । खलु तस्य स्वातंत्र्यम् । सः अपि विधिः अपि प्रतिनियतम् निर्णीतम् यत् कर्मैकफलम् तत् एव ददाति इति प्रतिनियत कर्मैकफलप्रदः कर्मयोग्यफलदाता अस्ति । न तु स्वतंत्रः । फलं कर्मायत्तम् कर्माधीनं यदि चेत् अपरैः देवैः किम् साध्यम् । न किञ्चित् इत्यर्थः । विधिना ब्रह्मणा वा किम् ? तत् तस्मात् कारणात् कर्मभ्यः नमः । येभ्यः कर्मभ्यः विधिः अपि ब्रह्मा अपि न प्रभवति प्रबलो भवति । पूर्वपूर्वस्य उतरोत्तरं प्रति उत्कर्षवहत्वात् मालादीपकम् अलंकारः इति रामचन्द्रः । " उत्तरोत्तरमुत्कर्षो भवेत् सारः परावधिः " इत्यतः सारालंकारः इति कालेपण्डितः । शिखरिणी वृत्तम् ।

NOTES—1. नमस्यामः—नमः कुर्मः इति । नमस्+क्यच्+लट् मः । A nominal verb is from नमस् etc. by adding क्यच् affix by. " नमोवरिवश्चित्रङः क्यच् " in the sense of paying homage etc. नमस्यति देवान् । पूजयति इत्यर्थः । सि० कौ० " उपपदविभक्तेः कारकविभक्तिः बलीयसी " अतः द्वितीया and not ४र्थी in कर्म with नमः ।

2. ननु—It is अव्यय used here in introducing an objection or a contrary proposition. It means, " but are they not all subject to accursed fate."

3. हतविधेः—हतः विधिः (कर्म०) ; तस्य । सम्बन्धे ६ठी ।

4. वशगाः—वशं गच्छन्ति इति वश+गम्+ड । All gods, Indra, and others are under the influence of fate, their separate identities terminate at the end of theKalpa.

5. प्रतिनियत etc.—एकं केवलम् फलम् इति एक फलम् (कर्मधा०) by पूर्वकालैकसर्व etc. कर्मणः एकफलम् इति कर्मैकफलम् (ष० त०) । प्रतिनियतम् कर्मैकफलम् इति (कर्मधा०) प्रतिनियत कर्मैकफलम् ददाति इति प्रतिनियतकर्मैकफलदः (उपपद तत्) । प्रतिः

Digitization by Arya Samaj Charitable Foundation, Chennai

फल+दा+कः (आतोऽनुपसर्गे कः) । Who gives the adjusted only fruit of one's actions. Even विधि is not free to give fruits.

6. अपरैः विधिना—करणे ३या । " गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका " । अपरैः किम् साध्यम् साधनक्रियां प्रति करणत्वम् । Similarly विधिना has करणे ३या ।

7. कर्मभ्यः—" नमः " शब्दयोगे ४थी by नमः स्वस्ति etc. Every action must bear its fruit, good or bad.

Cf. " नामुक्तं क्षीयते कर्म " स्मृतिः ।
" नहि कर्माणि क्षीयन्ते "—महाभारतम् ॥

8. येभ्यः प्रभवति—येभ्यः has चतुर्थी by नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च " – । प्रभवति=प्रभुः भवति, अलम् ; so अलमर्थे ४थी प्रभ्वादियोगे षष्ठी अपि साधु ; तस्मै प्रभवति । प्रभुः बुभूषुः भुवनत्रयस्य इति सिद्धम् । सि० कौ० ।

9. Figure is मालादीपकम् Mr. Kale finds सारालंकार here.

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं सेवते
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ ६४ ॥

अन्वयः—येन (कर्मणा) ब्रह्मा ब्रह्माण्डभाण्डोदरे कुलालवत् नियमितः, येन विष्णुः महासंकटे दशावतारगहने क्षिप्तः ; येन रुद्रः कपालपाणिपुटके भिक्षाटनम् सेवते, सूर्यः (च) नित्यम् एव गगने भ्राम्यति, तस्मै कर्मणे नमः ।

Words—ब्रह्माण्ड=the mundane egg, the universe ; कुलाल=potter, कुम्हार । नियमित=was restrained, (नियुक्त

Digitization by Arya Samaj Charitable Foundation, Chennai

किया गया) । was employed ; महासंकट=great fix, difficulty ; (ख़तरा) । गहन=painful, distressing, (दुखदायी) ; कपाल=human skull, (नर खोपड़ी) ।

English Translation—Salutation to that action, by whom Brahma was employed like a potter in the interior (lit. belly) of the pot-like mundane egg. (*i. e.* Universe) ; by whom Vishṇu was thrown into a great fix painful on account of ten incarnations ; by whom Rudra was made to resort to begging Skull in hand ; and (in obedience to whom) the sun constantly roams about in the sky.

हिन्दी अनुवाद—उस कर्म को नमस्कार है जिसने ब्रह्मा को ब्रह्माण्ड रूपी बर्तन को बनाने में कुम्हार के जैसा नियुक्त किया, जिसने विष्णु को दश अवतार धारण करने के महासंकट में डाल दिया, जिसने शिव से नर-मुण्ड हाथ में ले भीख मँगाई, और जो सूर्य से रोज आकाश में चक्कर मरवाता है ॥ ९४ ॥

व्याख्या—येन कर्मणा कर्त्रा ब्रह्मा चतुर्मुखः ब्रह्माण्डम् एव भाण्डम् ब्रह्माण्डभाण्डम्, तस्य उदरे अभ्यन्तरे कुलालेन कुम्भकारेण तुल्यम् कुम्भकारतुल्यम् नियमितः नियोजितः । येन विष्णुः दशावतारैः गहनम् कष्टकरम् दुःखदायकम् , तस्मिन् महासंकटे घोरकृच्छ्रे क्षिप्तः निक्षिप्तः । येन कर्मणा रुद्रः शिवः कपालं ब्रह्मशिरः एव पाणिपुटकम् तस्मिन् भिक्षाटनम् सेवते । करोति इत्यर्थः । कपालस्थभिक्षान्नं भुङ्क्ते इति भावः । येन सूर्यः अपि सकललोकप्रकाशकोऽपि नियमितः सन् नित्यमेव अविश्रान्तम् सदैव गगने आकाशे भ्राम्यति अटति । तस्मै कर्मणे तस्मै सकल नियन्त्रे कर्मणे नमः शार्दूलवि० ।

NOTES—1. ब्रह्माण्डभाण्डोदरे—ब्रह्माण्डम् एव भाण्डम् इति

Digitization by Arya Samaj Charitable Foundation, Chennai

(मयूरव्यंसकादित्वात् रूपकरूप समासः), तस्य उदरम् (ष० त०), तस्मिन् ।

2. कुलालवत्—कुलाल + वतिः । " तेन तुल्यं क्रिया चेत् वतिः" । कुलालवत् सृष्टिनिर्माणकर्मणि नियमितः नियोजितः । By karma, the Creator (ब्रह्मा) was confined into the interior of the pot-like primordial egg to evolve creation of the universe. " अपः एव ससर्जादौ " Manu. When God wanted to create, he created first of all water ; in that water a golden primordial egg was found floating. Bursting out this egg, came out Brahma and thence sprang up the universe. See Manu ch. I. II.—13.

3. विष्णुः—विश् + नु (उणादिः) ; विश् to pervade. "यस्मात् विश्वमिदं सर्वं तस्य शक्त्या महात्मनः । तस्मादेवोच्यते विष्णुः विशधातोः प्रवेशनात् " ।

Viṣṇu was cursed by Durbasas to undergo the penalty of being born on earth ten times. In Matsya Purana Bhrigu says to Viṣṇu.

यस्मात्ते जानतो धर्ममवन्ध्या स्त्रीनिषूदिता
तस्मात्त्वं सप्तकृत्वेह मानुषेषुपपत्स्येति ।
ततस्तेनाभिशापेन नष्टे धर्मे पुनः पुनः
लोकस्य च हितार्थाय जायते मानुषेष्विह ॥

Matsya. X. L. VII. 103—4.

मत्सः कूर्मो वराहश्च नरसिंहोऽथ वामनः । रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश । These are the ten incarnations of Viṣṇu.

4. दशावतारगहने—(*a*) दश अवताराः दशावताराः तैः

Digitization by Arya Samaj Charitable Foundation, Chennai

गहनम् कष्टकरम् दुःखदायकम् (३या तत्)। where गहन is an adjective meaning painful, distressing. दशावतारगहनम् Qualifies महासंकटे। महत् संकटम् इति महासंकटम्=great strait or difficulty. (*b*) दशावताराः एव गहनम् अरण्यम् (forest) इति दशावतारगहनम् तस्मिन्। महासंकटे means महाकठिने then महासंकटे दशावतारगहने क्षिप्तः means "thrown in the very difficult (महासंकटे) forest of ten incarnations. (दशावतारगहने)।

The first interpretation is preferable.

अव+तॄ+घञ्=अवतारः। By ऋदोरप्, अप् should come after तॄ and so we should expect अवतर।

अवतर is correct and अवतार is wrong altogether. Therefore Vamana remarks. "अवतरावचायशब्दयोः दीर्घव्यत्यासो बालानाम्" V. 2. 40. Correct words are अवतर and अवचाय, but school boys write अवतार and अवचय respectively. These two words inspite of Vaman's branding, are written in their wrong forms by all great writers.

5. रुद्रः—रोदयति असुरान् इति रुद्+रं (उणादिः)। It is derived differently in Srutis. *cf.* "सोऽरोदीत् यदरोदीत् त त् रुद्रस्य रुद्रत्वम्"।

6. कपालपाणिपुटके—(*a*) पाणिः एव पुटकम् इति (मयूरव्यंसकादित्वात् रूपकरूपः)। पुटक=a vessel made of leaf. (पुरिया, दोना) कपालसहितं पाणिपुटकम् तस्मिन्। (*b*) पाणिः पुटकम् पाणिपुटकम्; पुटक means shallow concavity. कपालम् एव पाणिपुटकम् (मयूरव्यं······) तस्मिन्।

Digitization by Arya Samaj Charitable Foundation, Chennai

The story of Shiva's begging alms with a human skull in hand is given in स्कन्दपुराण ।

The sense is " on account of which ; Rudra begs alms in a skull held in his hand or Rudra eats food obtained by begging out of a skull held in his hand. येन has therefore हेतौ तृतीया । Or if नियमित is supplied then अनुक्ते कर्त्तरि ३या as in first two lines.

7. कर्मणे नमः—" नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च "—इत्यनेन नमः शब्दयोगे चतुर्थी ।

N. B.—This verse is found in काव्यसंग्रहः page 6.

Mr. Kale notes :—

It is a very faulty verse. In every line there is some defect. (*a*) कुलालवत् does not fit in well here. (*b*) गहने troublesome; it can be interpreted differently. (*c*) कपालपाणिपुटके is a मध्यमपद लोपी समासः what is the sense in कपालपाणिपुटके भिक्षाटनं सेवते ? Mr. Kale suggests that poet had written कपालपाणिपुटकः Qualifying रुद्रः but through the scriber's fault it has become पुटके । (*d*) In the fourth line causal sense disappears भ्राम्यति being used, and thus there is प्रक्रमभंग दोष ।

या साधूंश्च खलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितम्
हे साधो ! व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥८४॥

अन्वय—या (सत्क्रिया) खलान् साधून् करोति, मूर्खान् विदुषः, द्वेषिणः हितान् , परोक्षम् प्रत्यक्षम् कुरुते, हालाहलम् तत्क्षणात् अमृतम्

Digitization by Arya Samaj Charitable Foundation, Chennai

कुरुते । हे साधो ! वाञ्छितम् फलम् भोक्तुम् ताम् भगवतीम् सत्क्रियाम् आराधय । व्यसनैः विपुलेषु गुणेषु वृथा आस्थाम् मा कृथाः ।

Words—परोक्ष = beyond the range of one's senses, इन्द्रियातीत, अतीन्द्रियम् ; प्रत्यक्ष = within the range of senses, (इन्द्रियगोचर) ; हालाहल = deadly poison ; (विष) । सत्क्रिया = good action, virtuous conduct, (सुवृत्त, सुकर्म) व्यसन = अभिनिवेश = persistence or trouble. विपुल = large, extensive, (बड़ा) । आस्था = regard, care, *i. e.* attachment, (परवाह, आसक्ति) ।

English Translation—O goodman, to enjoy your desired fruit, worship that goddess the virtuous action, that changes the wicked into the good, fools into the learned, foes into friends, the thing past our senses into a thing comprehensible to senses and the deadly poison into nectar in an instant. Donot have vain attachment for other qualities full of difficulties.

हिन्दी अनुवाद—जो सत्क्रिया दुष्ट को साधु, मूर्ख को विद्वान्, द्वेषियों को हितैषी, परोक्ष को प्रत्यक्ष, और विष को तुरत अमृत बना देती है, हे सज्जन वृन्द ! अपने वाञ्छित फल को भोगने के लिये उसी भगवती सत्क्रिया की आराधना कीजिये कठिनाइयों से भरे और और गुणों में अनुरक्त मत हूजिये ॥ ६५ ॥

व्याख्या—या सत्क्रिया खलान् दुर्जनान् साधून् सज्जनान् करोति, मूर्खान् अज्ञानिनः विदुषः पण्डितान् करोति ; द्वेषिणः शत्रून् अपि हितान् सुहृदः करोति । परोक्षम् अतीन्द्रियमपि वस्तु प्रत्यक्षम् इन्द्रियगोचरम् करोति । हालाहलम् विषम् अपि तत्क्षणात् सद्यः एव अमृतम् सुधाम्

Digitization by Arya Samaj Charitable Foundation, Chennai

करोति। अतः हे साधो! हे सज्जन! वाञ्छितं कांक्षितं फलं भोक्तुम् इच्छसि चेत् इति शेषः। ताम् प्रक्रान्ताम् भगवतीम् सर्वशक्तिमतीम् देवीम् सत्क्रियाम् सत्कर्म आराधय पूजय। तस्याः अशेषफलदायकत्वात् इति भावः। किन्तु व्यसनैः विपुलेषु आपद्भूयिष्ठेषु गुणेषु वृथा व्यर्थम् आस्थाम्, आसक्तिम् अनुरक्तिम् वा मा कृथाः मा कुरु। विशेषालंकारः। शार्दूलविक्रीडितम्।

NOTES—1. द्वेषिणः—द्विष् + णिनिः (ताच्छील्ये) द्वेषिन्। द्वेष्टि etc.

2. हितान्—हित means a well-wisher, हितैषी। *cf.* 'हितान्न यः संशृणुते स किं प्रभुः' Kir. I. 5.

3. प्रत्यक्षम् and परोक्षम्—अक्ष्णोः प्रति अभिमुखम् इति प्रति + अक्षि + टच् (समासान्त affix); प्रत्यक्षम्। "प्रतिपरसमनुभ्योऽक्ष्णः टच्" *i. e.* समासान्त affix टच् is added to an अव्ययीभाव ending in अक्षि when it is preceded by प्रति, पर, (changed to परो), सम् and अनु upsargas. अक्ष्णोः परम परोक्षम्, पर + अक्षि + टच्। Panini has written 'परोक्षे लिट्' from which it is clear that he wants the change of पर into परो। The word अक्षि when compounded has the general sense of all organs. "वृत्तिविषये अक्षिशब्दः इन्द्रिय मात्रपरः" इति तत्त्वबोधिनी।

4. (*a*) व्यसनैः विपुलेषु—व्यसन बहुलेषु आपद्बहुलेषु, विपद्भूयिष्ठेषु ; Qual. गुणेषु ; Do not have too much fondness for other qualities, abounding in difficulties. (*b*) व्यसनैः—Used adverbially here meaning with persistent application (for the acquisition of merits). Kale's notes.

Digitization by Arya Samaj Charitable Foundation, Chennai

5. मा कृथाः—कृ—लुङ् II. S. (आत्मने) ; अकृथाः " माङि लुङ् " । लुङ् is used in connection with माङ् । Then comes " न माङ् योगे " which says. The argument अट् (enjoined in लङ् , लुङ् and लृङ्) disappears before माङ् and so मा कृथाः । Never मा अकृथाः ।

शुभ्रं सद्म सविभ्रमा युवतयः श्वेतातपत्रोज्ज्वला
लक्ष्मीरित्यनुभूयते चिरमनुस्यूते शुभे कर्मणि ।
विच्छिन्ने नितरामनङ्गकलह क्रीडात्रुटत्तन्तुकं
मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दिशो दृश्यताम् ॥ ६६ ॥

अन्वय—शुभे कर्मणि चिरम् अनुस्यूते सति शुभ्रम् सद्म, सविभ्रमाः युवतयः श्वेतातपत्रोज्ज्वला लक्ष्मीः इति (सर्वम्) अनुभूयते विच्छिन्ने सति नितराम् अनङ्गकलहक्रीडात्रुटत्तन्तुकम् मुक्ताजालम् इव भ्रश्यत् (सद्मादिकम्) झटिति दिशः प्रयाति इति दृश्यताम् ।

Words—अनुस्यूत = संलग्न, uninterrupted, sewn-on, continuous, (लगातार जारी, अविच्छिन्न) । सविभ्रमा = sportive, amorous, (विलासिनी) । विभ्रम = amorous, अनङ्गकलह = love-quarrel. (प्रणय-कलह) । झटिति = at once, soon, instantaneously, शीघ्र ।

English Translation—When good luck continues long to be favourable (lit. uninterrupted), a splendid mansion, amorous damsels and prosperity all bright with the white umbrella,—all this is enjoyed well, but when it is unfavourable. (lit. snapped *i. e.* interrupted) ; behold all these vanish altogether in all directions like a necklace of pearls, whose string is broken in the sport of love-quarrel.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—बढ़ियाँ घर, विलासवती युवतियाँ, श्वेत छत्र से चमचमाती हुई राजलक्ष्मी—ये सब तब तक ही भोगे जाते हैं जब तक (अपना किया) शुभ कर्म चलता रहता है, परन्तु देखो—जब यह (कर्म) विच्छिन्न हो जाता, घट जाता—तब ये सब के सब चारों दिशाओं में उसी तरह विलीन हो जाते हैं, जिस तरह रतिक्रीडा में टूट जाने से हार के मोती के दाने इधर-उधर बिखर जाते हैं ॥ ६६ ॥

व्याख्या—शुभे कर्मणि चिरम् चिरकालम् अनुस्यूते अनुवर्त्तमाने संलग्ने सति। अनुकूले सति इत्यर्थः। शुभ्रं सद्म सौधम्, सविभ्रमाः सविलासाः युवतयः तरुण्यः श्वेतातपत्रेण श्वेतच्छत्रेण उज्ज्वला देदीप्यमाना लक्ष्मीः राजलक्ष्मीः इति। एतत् अखिलम् इत्यर्थः। अनुभूयते अनुभुज्यते। विच्छिन्ने शुभकर्मणि नष्टे सति अनङ्गकलहः रतिरणः, स एव क्रीडा केलिः तया हेतुना त्रुटन् तन्तुः यस्य तत् तथोक्तम् रतिकेलि त्रुटितगुणम् मुक्ताजालम् मुक्ताहारः इव भ्रश्यत् सत्। सद्मादिकम् इति शेषः। झटिति द्राक् शीघ्रम् दिशः प्रयाति अन्तर्हितम् भवति। इति दृश्यताम् अवलोक्यताम्। शार्दूलविक्रीडितम्।

NOTES—1. शुभे कर्मणि—भावे ७मी। कर्मन् means action, luck. "पूर्वजन्मकृतं कर्म तदेवभाग्यमुच्यते"—action done in the previous birth is called भाग्य or luck. So we may say luck is the consequence of action.

2. अनुस्यूते—अनु+सिव्+क्त=sewn। सिव् दिवा पर सीव्यति etc.

3. सविभ्रमाः—विभ्रमैः=सह वर्तमानाः याः (तुल्ययोगे बहु०) विभ्रम=amorous sports.

4. श्वेता etc.—श्वेतम् आतपत्रम् (कर्म०) तेन उज्ज्वला (३या तत्) White umbrella is an insignia of sovereignty. An emperor uses it only.

Digitization by Arya Samaj Charitable Foundation, Chennai

5. विच्छिन्ने—Qual. कर्मणि understood । वि + छिद् (to cut) + क्त (कर्मणि) ; when the continuity of the good luck is broken.

6. अनङ्गकलह etc.—अनङ्गकलहः प्रणयकलहः एव क्रीडा (मयूरव्यंसकादित्वात् समासः रूपकरूपः), तया त्रुटन् (श्या तत्) तादृशः तन्तुः यस्य तत् (ब० व्री०) ; शेषात् विभाषा इति कप् ।

7. झटिति भ्रश्यत्—slipping or dropping soon ;—भ्रश्यत् Qualifies सङ्गादिकम्—All these things disappear instantaneously.

8. Figure is उपमा ।

गुणवदगुणवद्वा कुर्वता कर्मजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ६७ ॥

अन्वय—गुणवत् अगुणवत् वा कर्मजातम् कुर्वता पण्डितेन परिणतिः यत्नतः अवधार्या । अतिरभसकृतानाम् कर्मणाम् विपाकः आविपत्तेः शल्यतुल्यः हृदयदाही भवति ।

Words—गुणवत् = meritorious ; कर्मजातम् = collection of actions, all kinds of works. परिणतिः = result, consequence, फल । यत्नतः = carefully ; अतिरभस = hot-haste, जल्दीबाजी । विपाकः = फल, नतीजा, ripeness, development, consequence, sequel ; आविपत्तेः = till death, मरण-पर्यन्त । शल्य = dart, shaft, spear. बाण, बरछा ।

English Translation—A wise man, doing all kinds of works, meritorious or immeritorious should carefully consider their consequence. The sequel of

Digitization by Arya Samaj Charitable Foundation, Chennai

actions done in hot haste becomes poignant to the heart like a dart till death.

हिन्दी अनुवाद—अच्छा या बुरा, जिस किसी काम को पण्डित लोग करें, उसका परिणाम वे पहले अच्छी तरह से सोच लें। जल्दीबाजी में किये गये कामों का फल मरणपर्यन्त तीर के जैसा दिल में खलता रहता है ॥ ९७ ॥

व्याख्या—गुणवत् गुणयुक्तम् अगुणवत् गुणरहितम् वा कार्यजातम् कर्मसमूहम् कुर्वता अनुतिष्ठता पण्डितेन बुद्धिमता जनेन परिणतिः परिणामः परिपाकः कार्यफलम् यत्नतः अतिप्रयत्नेन अवधार्या विचारणीया अनुसंधेया वा। यत्नतः एव कर्मजातम् आरब्धतव्यम्। अतिरभसेन सहसा त्वरया कृतानाम् अनुष्ठितानाम् कर्मणाम् विपाकः फलम् आविपत्तेः मरणकाल पर्यन्तम् शल्येन वाणेन तुल्यः समानः हृदये दहति इति तच्छीलः मनः संतापकारी इत्यर्थः भवति। मालिनी वृत्तम्।

Notes—1. गुणवत्—गुणाः, सन्ति अस्मिन् इति गुण + मतुप् = गुणवतुप् = गुणवत् ; "मादुपधायाश्चमतोर्वः अयवादिभ्यः" इत्यनेन सूत्रेण यस्य वः। Qual. कार्यजातम्।

2. कार्यजातम्—कार्यानाम् जातम् समूहः तत्। कृ + ण्यत् = कार्यम् of an action.

3. परिणतिः—परिणामः, result, consequence should be carefully considered.—परि + नम् + क्तिन्।

4. यत्नतः—यत्नेन। यत्न + नः। तृतीयार्थे तसिल्। सार्वविभक्तिकः तसिल्।

5. अतिरभसकृतानाम् अतिरभसेन अतिवेगेन सहसा वा कृतानि (३या तत्)। तेषाम्।

6. आविपत्तेः—"आङ् मर्यादाभिविध्योः"—आङ् is optionally compounded in अव्ययीभाव। so आमुक्ति संसारः or

Digitization by Arya Samaj Charitable Foundation, Chennai

आ मुक्तेः। Similarly आविपत्तेः or आविपत्ति। अव्ययीभाव। विपत्ति = calamity, death (as here); आविपत्तेः = till death; *cf.* तस्यास्तथाविधनरेन्द्रविपत्तिशोकात् Raghu. VIII. 45 and XIX 56.

7. विपाकः—वि + पच् + घञ्; means derivatively 'cooking'. Or maturing, hence ripeness, development, consequence. *cf.* ममैवजन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः Raghu. XIV. 62 Sita's lament.

8. शल्यतुल्यः—शल्येनतुल्यः इति (३या तत्) or शल्यस्य तुल्यः (ष० त०)। like a dart.

9. हृदयदाही—हृदयं दग्धुम् शीलं यस्य हृदय + दह् + णिनिः (ताच्छील्ये) = हृदयदाहिन्। Burning the vitals of the heart like a barb of a poisoned arrow *cf.* "सविषमिव शल्यं दहति माम्" Sak. VI. 9.

स्थाल्यां वैदूर्यमय्यां पचति तिलखलीं चान्दनैरिन्धनौघैः
सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कतूलस्य हेतोः।
छित्वा कर्पूरखण्डान् वृतिमिह कुरुते कोद्रवाणां समन्ता-
त्प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः॥६८॥

अन्वय—यः मन्दभाग्यः मनुजः इमाम् कर्मभूमिम् प्राप्य तपः न चरति स वैदूर्यमय्याम् स्थाल्याम् चान्दनैः इन्धनौघैः तिलखलीम् पचति, अर्कतूलस्य हेतोः सौवर्णैः लाङ्गलाग्रैः वसुधाम् विलिखति, कर्पूरखण्डान् छित्वा कोद्रवाणाम् समन्तात् इह वृतिम् कुरुते।

Words—कर्मभूमि = lit. the land of religious rites; *i. e.* this world of action as opposed to, भोगभूमि (such as स्वर्गलोक, चन्द्रलोक etc.); वैदूर्य = a kind of gun, Lapis Lazuli. स्थाली = kettle, बटुआ, बटलोही। इन्धन = fuel, wood.

Digitization by Arya Samaj Charitable Foundation, Chennai

तिलखली=the oil-cake of sesamum ; अर्क=a kind of plant known as आक or अकवन ; तूल=cotton ; लाङ्गल= plough हल ; कर्पूर=camphor, *i. e*. camphor tree. खण्ड= collection, multitude, कर्पूर may mean, कर्पूरकदली, a camphor-plaintain tree, कपुरिया केला ; कोद्रव=कोदो= grain.

English Translation—That unlucky fellow who does not practise penance on coming to this world of action, cooks, with sandal fuel, the oil-cake of sesamum in a kettle made of Vaidurya-gems, ploughs the earth with golden plough shares for the sake of cotton of the Arka-plants, cuts down the camphor-trees and makes a fence of them round the Kodo-crop.

हिन्दी अनुवाद—जो अभागा इस कर्मभूमि में आकर तपस्या नहीं करता, वह चन्दन की लकड़ी जलाकर, मरकत मणि की बटलोही में तिल की खल्ली पकाता है, आक की रूई उपजाने के लिये सोने के फाल से पृथ्वी को जोतता है ; तथा कपूर वृक्ष को काट काट कर कोदो के खेत में चारों ओर घोरान (घेरा) लगाता है ॥ ६८ ॥

व्याख्या—यः मन्दभाग्यः हतभाग्यः मनुजः मनुष्यः इमाम् कर्मभूमिम् कर्माचरणयोग्यभूमिम्, कर्मक्षेत्रम् मर्त्यलोकम् प्राप्य तपः न चरति तपस्यां न करोति स वैदूर्यमय्याम् वैडूर्यमणिनिर्मितायाम् स्थाल्याम् पात्रे चान्दनैः चन्दनतरोः इन्धनौघैः काष्टभारैः तिलखलीम् तिलपिष्टम् पचति। तथा सौवर्णैः सुवर्णाधिकारैः लाङ्गलाग्रैः हलमुखैः अर्कतूलस्य हेतोः अर्कवृक्षस्य तूलार्थम् वसुधाम् भुवम् क्षेत्रम् वा विलिखति कर्षति। तथा कर्पूरखण्डान् कर्पूरवृक्षसमूहान कर्पूरकन्दलीकाण्डान् वा छित्त्वा कर्त्तित्वा कोद्रवाणाम् सस्यविशेषाणाम् समन्तात् चतुर्दिक्षु वृतिम् आवरणम्

Digitization by Arya Samaj Charitable Foundation, Chennai

कुरुते । सर्वथा सत्कर्म अनुष्ठेयम् इति तात्पर्यम् । यः तपः न चरति स तिलखलीम् पचति । असंभवद्वस्तु संबन्धवाक्यार्थवृत्तिः निदर्शनाभेदः अलंकारः । स्रग्धरा वृत्तम् ।

NOTES—1. चान्दनैः—चन्दनस्य अयम् इति चन्दन + अण् ; belonging to sandal, Qual. इन्धनौघैः ।

2. इन्धनौघैः—इन्धनानाम् ओघाः समूहाः (ष० त०), तैः । करणे ३या ।

3. वैदूर्यमय्याम्—विदूरात् प्रभवति इति or विदूरे पर्वते भवम् इति वैदूर्यम् । विदूर + ञ्यः (विदूराञ्ञ्यः) । "वैदूर्यं बालवायजम" इत्यमरः । वैदूर्य + मयट् + स्त्रियां ङीप् = वैदूर्यमयी । वैदूर्याणाम् विकारः इति विकारार्थे मयट् । made of Vaidurya gems. Qual. स्थाल्याम् । which has अधिकरणे ७मी ।

4. तिलखलीम्—कर्मणि २या । कर्म of पचति । तिल-खली is the oil cake of sesamum after the oil has been pressed out.

5. सौवर्णैः—सुवर्णस्य विकारः इति सौवर्णः । विकारार्थे अण् । Golden, made of gold. Qual. लाङ्गलाग्रैः ।

6. लाङ्गलाग्रैः—लाङ्गलानाम् अग्राणि (ष० त०) तैः । करणे ३या ।

7. अर्कतूलस्य – अर्कस्यतूलम् (ष० त०), तस्य हेतोः । "षष्ठी हेतुप्रयोगे" इति षष्ठी ।

8. कर्पूरखण्डान्—(*a*) कर्पूराणाम् वृक्षाणाम् खण्डाः समूहाः (ष० त०) । तान् । कर्म of छित्वा । (*b*) Acc. to रामचन्द्रः कर्पूरखण्डान् कर्पूरकदलीकाण्डान् , trunks of the karpoor-plaintain trees.

9. कोद्रवाणाम्—"कोरदूषस्तुकोद्रू च" इत्यमरः । a kind of very low class grain, known as कोदो in Bihar कोदो

Digitization by Arya Samaj Charitable Foundation, Chennai

and मरुश्रा are low class grains consumed by the poor class of the Indian people.

10. वृति = वृ + क्ति ; fence, hedge, round any crop to protect it from stray cattle ; कर्म of करोति ।

11. मन्दभाग्यः—मन्दं भाग्यं यस्य सः (ब० व्री०) ।

12. तपः न चरति—Does not practise penance. तपस् is used here in wider sense. It means performance of one's religious duties of all sorts, necessary to elevate one to heaven. The idea is this—men, wasting opportunity of securing heaven by practising penance, the opportunity given to them by birth in this world are as foolish as one who cooks sesamum oil-cake in a jewelled pot etc.

13. The figure is मालानिदर्शना ।

नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा खलु संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षः ॥ ६६ ॥

अन्वय—आकृतिः न एव फलति, कुलम् न एव, शीलं न, विद्या अपि न एव यत्नकृता सेवा अपि च न, पूर्वतपसा संचितानि पुरुषस्य भाग्यानि वृक्षाः यथा काले एव फलन्ति ।

WORDS—आकृति = handsome form, or feature, चेहरा, यत्नकृता = assiduously done, (यत्न से किया हुआ) । भाग्य = good luck.

English Translation—A handsome form does not bear fruit, neither does race nor character, nor

Digitization by Arya Samaj Charitable Foundation, Chennai

even learning, nor service assiduously done. Fate, acquired by man, by means of his previous penance (in his former birth), bears fruit in time as do the trees.

हिन्दी अनुवाद—सुन्दर आकृति नहीं फलती, न कुल और न शील। न विद्या फलती और न यत्नपूर्वक की गई सेवा ही। जैसे वृक्ष फल फलते, उसी तरह पूर्व की तपस्या से सञ्चित किये हुए मनुष्य के कर्म (जिन्हें भाग्य कहते हैं) समय पाकर फल धारण करते हैं ॥ ६६ ॥

व्याख्या—आकृतिः शोभनाकृतिः आकारसंपत्तिः नैव फलति। फलकारणं न भवति इत्यर्थः। कुलं सद्वंशो वा न फलति। विद्या चतुर्दशविद्या अपि नैव फलति। यत्नकृता प्रयासविहित सेवा राजादि-परिचर्या च न फलति। किन्तु पूर्वतपसा पुराकृतसुकृतेन पूर्वजन्मकृतपुण्येन संचितानि संगृहीतानि अर्जितानि पुरुषस्य नरस्य भाग्यानि वृक्षाः यथा तरवः इव काले उचितकाले। काले प्राप्ते सति इत्यर्थः। फलन्ति खलु। तपोजनितभाग्यव्यतिरिक्तं फलजनकं न किञ्चित् अस्ति। वसन्ततिलकं वृत्तम्।

NOTES—1. विद्या—विद्+क्यप्+स्त्रियां टाप्। विद्या is 14 in number. " अंगानि वेदाश्चत्वारो मीमांसान्यायविस्तरः पुराणं धर्म-शास्त्रं च विद्या ह्येताश्चतुर्दश "। अंगानि वेदाः मीमांसा=न्याय पुराण taken together, धर्मशास्त्र taken together.

2. यत्नकृता—यत्नेन कृता इति (३या तत्)। यत्+न=यत्न, सेव=अ+टाप् गुरोश्चतलः।

3. पूर्वतपसा—पूर्वं तपः (कर्मधा०) तेन। करणे ३या। Fate is nothing but the result of action done in previous birth or previously. *cf.* " पूर्वजन्म कृतं कर्म तदेव भाग्यमुच्यते " Fate *i. e.* भाग्य is of three kinds, संचित, प्रारब्ध and

Digitization by Arya Samaj Charitable Foundation, Chennai

क्रियमाण Here the first kind of fate *i. e.* संचित भाग्य is referred to.

4. वृक्षाः यथा—यथा means इव here. "इववत् वायथा-शब्दौ" इति दण्डिपादाः ।

5. In the first two lines, figure is दीपकम्, the predicate expressing the सामान्य धर्म is expressed by फलति । There is उपमा in वृक्षाः यथा ।

मज्जत्वम्भसि यातु मेरुशिखरं शत्रूञ्जयत्वाहवे
वाणिज्यं कृषि सेवने च सकला विद्याः कलाः शिक्षतु ।
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशगो भाव्यस्य नाशः कुतः ॥ १०० ॥

अन्वय—अम्भसि मज्जतु, मेरुशिखरम् यातु, आहवेशत्रून् जयतु, वाणिज्यम् कृषिसेवने सकलाः विद्याः कलाः च शिक्षतु, परम् प्रयत्नम् कृत्वा खगवत् विपुलम् आकाशम् प्रयातु (तथापि) कर्मवशतः अभाव्यम् इह न भवति, भाव्यस्य कुतः नाशः भवति ।

Words—आहव=battle, युद्ध । वाणिज्य=trade, कृषि, खेती, agriculture ; सेवन=service ; कला=art ; विपुल=बहुत, vast, infinite, भाव्य=that which is to happen, (होनहार) ।

English Translation—A man may dive into water, ascend the peak of the Meru Mountain, conquer foes in battle, may learn trade, agriculture, service, and all other arts and sciences, may fly like a bird with great effort through the vast sky ; still that, which is not fated to happen shall never happen ; how can that be destroyed which is destined

Digitization by Arya Samaj Charitable Foundation, Chennai

to happen in this world (*i. e.* that which is to happen, must happen).

हिन्दी अनुवाद—चाहे जल में डूबे, चाहे मेरु शिखर पर चढ़ जाय, चाहे संग्राम में शत्रु को जीत ले, चाहे वाणिज्य करे, खेती चाकरी करे, सब कला और सब विद्या सीखे, बहुत प्रयत्न करके आकाश में चिड़ियों के ऐसा उड़े, चाहे जो करे, पर जो होने वाला नहीं, वह कभी नहीं होगा, और जो होनेवाला है वह अवश्य होगा, उसका नाश नहीं हो सकता, वह कभी नहीं रुक सकता ॥ १०० ॥

व्याख्या—अम्भसि जले मज्जतु मग्नो भवतु, मेरुशिखरम् यातु गच्छतु। योगबलेन इति भावः। आहवे समरे शत्रून् रिपून् जयतु। वाणिज्यं क्रयविक्रयादि कृषिं क्षेत्रकर्षणम् सस्योत्पादनम्, सकलाः समस्ताः विद्याः चतुर्दशविद्याः, कलाः चतुःषष्टि कलाः च शिक्षतु अभ्यस्यतु, तथा परम् उत्कृष्टम् यत्नम् पादुकासिद्ध्यात्मकम् कृत्वा खगवत् विहगतुल्यम् विपुलम् अनन्तम् आकाशम् अन्तरिक्षम् प्रयातु विचरतु। तथापि कर्मवशतः कर्मानुरोधात् भागवशतः अभाव्यम् अभावि इह न भवति, भाव्यस्य अवश्य भाविनः कुतः केनकारणेन नाशः? भाव्यं तु भवति एव इत्यर्थः। अवश्य-भाविनः तु ब्रह्मणापि निवारयितुम् अशक्यत्वात्। "यदभावि न तद्भावि, भावि चेन्न तदन्यथा" इति न्यायात्। शार्दूलविक्रीडितम्।

Notes—1. अम्भसि मज्जतु *i. e.* for collecting pearls; मेरुशिखरं यातु for bringing gold; शत्रून् जयतु for acquiring kingdom, वाणिज्यं etc. for getting much wealth. But no wealth comes if it is not destined to come.

2. आहूयन्ते अरयः अस्मिन् इति आ+ह्वे+अप्=आहवः। "आङि युद्धे संप्रसारणम्"।

3. वणिक्+ष्यञ=वाणिज्यम्। कृष्+इन् (उणादिः)। "सर्वधातुभ्यः इन् इगुपधात् कित्"।

Digitization by Arya Samaj Charitable Foundation, Chennai

4. विद्या—(*a*) Accor, to some विद्याः are three ; I. आन्वीक्षिकी or Metaphysics (आध्यात्म विद्या) II. वेदत्रयी three Vedas together III. दण्डनीतिः or नीतिविद्या (administrative art.) (*b*) Acc. to कामन्दकनीतिशास्त्रम्, विद्याs are four. "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चशाश्वती" इति कामन्दकः। (*c*) Vidyas are usually considered to be fourteen. चतुर्दशविद्या "अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः, पुराणं धर्मशास्त्रं व विद्या ह्येताः चतुर्दश"।

5. कलाः—गीतवाद्यनृत्यादिकाः चतुः षष्टिसंख्यकाः कलाः। Arts are 64 in number, singing, music, dancing, painting etc. See Vatsyana's kamasutra.

6. कर्मवशतः—कर्मणः वशः (ष० त०) तस्मात्। पञ्चम्यां तसिल्। Through the influence of fate.

भीमं वनं भवति तस्य पुरं प्रधानं सर्वोजनः स्वजनतामुपयाति तस्य।
कृत्स्ना च भूर्भवति संनिधिरत्नपूर्णा यस्यास्ति पूर्वसुकृतं विपुलंनरस्य १०१

अन्वय—यस्य विपुलम् पूर्वसुकृतम् अस्ति, तस्य भीमम् वनम् प्रधानम् पुरम् भवति, सर्वः जनः तस्य स्वजनताम् उपयाति, कृत्स्ना च भूः तस्य संनिधिरत्नपूर्णाभवति।

Words—विपुल = immense, much ; सुकृत = पुण्य, merit ; स्वजन = one's own man, own people, (आत्मीय)। निधि = treasure, खजाना।

English Translation—To a man, having immense merit acquired in previous life (lit. previously), a terrible forest becomes a capital city, all people become his own men (friendly to him), and the whole earth becomes full of good gems and fine treasures.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—जिस आदमी ने पूर्व जन्म में बहुत पुण्य जमाकर रखा है, उसके लिये भयङ्कर वन अच्छा नगर हो जाता है, सब लोग उसके अपने आत्मीय हो जाते हैं, सारी पृथ्वी उसके लिये रत्नों से परिपूर्ण हो जाती है ॥ १०१ ॥

व्याख्या—यस्य नरस्य विपुलम् बहुलम् पूर्वसुकृतम् पुराकृतसत्कर्मजातम् पुण्यम् अस्ति वर्त्तते तस्य नरस्य भीमम् भयङ्करम् वनम् प्रधानम् मुख्यम् पुरम् नगरम् भवति। मुख्यनगरवत् अशेषभोगसाधनम् भवति इत्यर्थः। तस्य सर्वः सकलः जनः स्वजनताम् आत्मीयताम् उपयाति गच्छति। आत्मीयाः इव हितैषिणः भवन्ति इति भावः। कृत्स्ना समग्रा भूः पृथ्वी च संनिधिरत्नपूर्णा शोभनैः निधिरत्नैः परिपूर्णा भवति। भूः समस्तफलानि तस्मै प्रसूते इत्यर्थः। अतः श्रेयः कामिनां प्रचुरः पुण्यसंचयः कार्यः इति तात्पर्यम्। शार्दूलविक्रीडितम्।

Notes—1. भीमं वनम्—बिभेति अस्मात् इति भी + मक् (उणादिः) = भीमम् = In dreary forest a lucky man finds all pleasures of a town-life.

2. स्वजनता—स्वस्य जनाः (ष० त०) or स्वेजनाः (कर्मधा०) ; तेषां भावः स्वजनता, ताम् उपजाति, become friendly to him. All behave with him like his own people, like his own near kiths and kins.

3. संनिधिरत्न etc.—निधयः च रत्नानि च इति निधिरत्नानि (द्वन्द) सत् सन्ति शोभनानि च तानि निधिरत्नानि च इति संनिधिरत्नानि (कर्मधारय) । सत् Qualifies निधिरत्नानि सत् + निधिरत्नानि = सन्निधिरत्नानि तैः। पूर्णा (३या तत्) Ramarshi takes संनिधि to mean समीप says सन्निधौ समीपे रत्ने उत्कृष्टवस्तुभिः गवाश्वान्नवस्त्रादिभिः पूर्णा इति।

4. पूर्वसुकृतम्—पूर्वम सुकृतम् (पुण्यम्) इति (कर्मधा०) ;

Digitization by Arya Samaj Charitable Foundation, Chennai

पूर्व means former, previous, सुकृत means merit or piety.

वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानिपुराकृतानि ॥१०२॥

अन्वय—वने·····पुरा कृतानि पुण्यानि रक्षन्ति ।

English Translation—Merits acquired in previous life protect man in a forest, in a battle, in the midst of enemy, water and fire or in a big ocean or on the top of a mountain whether he be asleep, intoxicated or placed in danger.

हिन्दी अनुवाद—रण में, वन में, शत्रुओं के बीच में, जल में, अग्नि में, महासमुद्र में या पर्वत शिखर पर, चाहे सोया हो या बदहोश, कैसी ही विषम स्थिति में मनुष्य क्यों न हो, परन्तु पूर्व-कृत पुण्य उसकी उस हालत में भी रक्षा करती ही है ॥ १०२ ॥

व्याख्या—स्पष्टार्थः अयम् श्लोकः। उपजाति वृत्तम्।

NOTES—1. शत्रु etc.—शत्रवः च जलम् च, अग्निः च इति शत्रुजलाग्नयः (द्वन्द) ; तेषां मध्ये (ष० त०) ।

2. महार्णवे—महान् अर्णवः (कर्मधा०) ; तस्मिन्। अर्णांसि जलानि सन्ति अस्मिन् इति अर्णस्+व (मतुवर्थे) ; स् is irregularly dropped. पर्वतस्य मस्तकम् (ष० त०) तस्मिन्। सर्वत्र अधिकरणे ७मी।

3. विषमस्थितम्—विषमे सभयस्थाने स्थितम् standing in a dangerous place, विषम means difficulty 'fix' *cf.* कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्। गीता० २२. विषमे सभयस्थाने इति शंकराचार्यः।

Digitization by Arya Samaj Charitable Foundation, Chennai

4. पुराकृतानि पुण्यानि—meritorious deeds done in previous birth. Buddhism does not believe in pre-vious birth. Was our poet then a Buddhist? See Introduction.

विविधविषयका श्लोकाः।

आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥ १ ॥

English Translation—Idleness is a great enemy dwelling in the body of a man. There is no friend like diligence, doing which a man does not suffer (lit. perish).

हिन्दी अनुवाद—आलस्य मनुष्य के देह में रहने वाला बड़ा भारी शत्रु है, उद्यम के समान मित्र नहीं, उद्यम करने से मनुष्य कभी दुःख नहीं उठाता, कभी निराश नहीं होता ॥ १ ॥

एकेनापि हि शूरेण पादाक्रान्तं महीतलम्।
क्रियते भास्करेणेव स्फारस्फुरिततेजसा ॥ २ ॥

English Translation—The entire surface of the earth is trodden under feet by a single-handed hero. Just as the world is overflooded with rays by the sun of the profusely glittering light.

हिन्दी अनुवाद—सारा महीतल एक ही वीर से पादाक्रान्त होता है, जिस तरह से अति जाज्वल्यमान, अति चमकीले एक ही सूर्य की किरणों से सारी दुनियाँ आक्रान्त हो जाती है ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

को न याति वशंलोके मुखे पिण्डेन पूरितः।
मृदङ्गो मुखलेपेन करोति मधुरध्वनिम् ॥ ३ ॥

English Translation—Who does not submit in the world when his mouth is filled with a ball of rice (*i. e.* when bribed)? A Mradanga makes sweet sound when its face is coated with dough (kneaded flour).

हिन्दी अनुवाद—जब मनुष्य का मुँह (पिण्ड से, कुछ खिलापिला कर) भर दिया जाता है तब कौन आदमी वश में नहीं आ जाता ? जब मृदङ्ग के मुँह पर (सूर पर) आटा लेप कर ओहन लगा दिया जाता है तो वह बहुत मीठी आवाज करता है ॥ ३ ॥

यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातम्।
अवकरनिकरं विकिरति तत्किं कृकवाकुरिव हंसः ॥ ४ ॥

English Translation—If perchance, the world ever becomes devoid of lotuses, would the swan then scratch a heap of sweepings like a cock ?

हिन्दी अनुवाद—अगर संयोगवश संसार कमल विहीन हो जाय, तो क्या हंस, मुरगे के जैसा, भाँसकुस के थाक को (गननौरे को) खरोंचेगा ? ॥ ४ ॥

एको देवः केशवो वा शिवो वा एकं मित्रं भूपतिर्वा यतिर्वा।
एकोवासः पत्तने वा वने वा एकाभार्या सुन्दरी वा दरी वा ॥ ५ ॥

English Translation—Let us have one and only one god Kesava or Shiva, only one friend—the king or a hermit ; only one abode—in the city or in a forest ; one and only one beautiful wife or a cave.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—हम एक ही देव कृष्ण या शिव की उपासना करें, हमें एक ही मित्र मिले—राजा या यति ; एक ही वास मिले नगर में या वन में, और एक ही स्त्री हो—सुन्दरी या गुहा ॥ ५ ॥

परिचरितव्याः सन्तः यद्यपि कथयन्ति नो सदुपदेशम् ।
यास्त्वेषां स्वैरकथास्ता एव भवन्ति शास्त्राणि ॥ ६ ॥

English Translation—Goodmen should be waited upon though they do not give good advice. For what are their random talks, become scriptures, (*i. e.*, the teaching of the scriptures).

हिन्दी अनुवाद—यद्यपि सन्त जन उपदेश न भी दें तो भी उनकी सेवा करनी चाहिये । उनके मुँह से जब तब जो कुछ बातें निकल पड़ती हैं वे ही शास्त्र हैं अर्थात् शास्त्रोक्त बातें हैं ॥ ६ ॥

वचो हि सत्यं परमं विभूषणं लज्जाङ्गनायाः कृशता कटौ च ।
द्विजस्य विद्यैव पुनस्तथाक्षमा शीलं हि सर्वस्य नरस्य भूषणम् ॥७॥

English Translation—True speech is the greatest ornament (for man), bashfulness for a woman and slenderness for the waist, learning alone for the twice-born and forgiveness too, in addition. Good conduct is the ornament for all men.

हिन्दी अनुवाद—सत्य वचन मनुष्य का बड़ा भारी भूषण है लज्जा स्त्री का, पतलापन कमर का, विद्या द्विजों का और क्षमा भी, सच्चरित्र तो सभों का भूषण है ॥ ७ ॥

को लाभो गुणिसंगमः, किम् सुखं, प्राज्ञेतरैः संगतिः,
का हानिः, समयच्युतिर्निपुणता का, धर्मतत्त्वे रतिः ।
कः शूरो, विजितेन्द्रियः, प्रियतमा कानुव्रता, किं धनं
विद्या, किं सुखमप्रवासगमनं, राज्यं किमाज्ञाफलम् ॥ ८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

English Translation—What is a profit ? The company of the virtuous. What is misery ? The company of those that are not wise. What is a loss ? Waste of time. What is dexterity ? Devotion to the principles of righteousness. Who is a hero ? A self controlled man. Who is the most beloved ? She who is constanty devoted. What is wealth ? Learning. What is happiness ? Not going abroad. What is a kingdom ? The power to command.

हिन्दी अनुवाद—लाभ क्या है ? गुणियों की संगति ; दुःख क्या ? बेवक़ूफों की संगति ; हानि क्या ? समय का नाश ; चतुराई क्या ? धर्म के सिद्धान्तों में भक्ति ; शूर कौन ? जिसने इन्द्रियों को वश में कर लिया है ; प्रियतमा कौन ? जो सतत अनुरक्त रहे ; धन क्या ? विद्या ; सुख क्या ? विदेश नहीं जाना (अपने देश में रहना) ; राज्य क्या ? हुक्म चलाना (हुकूमत जारी करना) ॥ ८ ॥

अग्राह्यं हृदयं यथैव वदनं यद्दर्पणान्तर्गतं
भावः पर्वतसूक्ष्ममार्गविषमः स्त्रीणां न विज्ञायते ।
चित्तं पुष्करपत्रतोयतरलं विद्वद्भिराशंसितं
नारी नाम विषांकुरैरिव लता दोषैः समं वर्धिता ॥ ९ ॥

English Translation—Like the face reflected in a mirror, the heart of women cannot be caught (understood) ; their feeling (of love), difficult like a narrow track on a mountain cannot be known. Their mind has been described by the learned as fickle like water on a lotus-leaf ; a woman, growing with faults, is really like a creeper, growing with its poisonous sprouts.

Digitization by Arya Samaj Charitable Foundation, Chennai

हिन्दी अनुवाद—जिस तरह से दर्पण में प्रतिबिम्बित चेहरे को पकड़ना मुश्किल है उसी तरह से स्त्रियों के हृदय को भी जानना कठिन है, उनके अन्तःकरण का भाव जानना उतना ही कठिन है जितना पहाड़ पर की पतली राह का पता लगाना, उनका चित्त तो विद्वानों द्वारा ऐसा चञ्चल बताया गया है जैसा जल-कण कमल के पत्ते पर चञ्चल रहता है, सचमुच में औरत दोषों के साथ साथ बढ़ती हुई उसी तरह की भयानक है जिस तरह विषैले अंकुरों के साथ बढ़ती हुई लता होती है ॥ ९ ॥

क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोद्यताः
स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः ।
दुष्पूरोदरपूरणाय पिवति स्रोतः पतिं वाडवो
जीमूतन्तु निदाघसंभृतजगत्संतापविच्छित्तये ॥ १० ॥

English Translation—There are thousands and thousands of mean-minded fellows busy in supporting themselves. He alone is the foremost among the good who considers other's interests as his own; the submarine fire (बड़वानल) drinks the sea, the lord of streams, to fill its own insatiate maw, but the cloud, (draws water from the ocean) to allay the heat of the world caused by the hot summer.

हिन्दी अनुवाद—हजारों नीच पुरुष हैं जो अपने ही भरण-पोषण में व्यस्त रहते हैं, जो पराये के हित को अपना हित समझता है वही एक पुरुष सज्जनों में अग्रगण्य है। वडवानल अपने कभी नहीं भरने वाले पेट को भरने के लिये नदी पति समुद्र को सोख जाता है, पर जीमूत मेघ ग्रीष्म के ताप से संतप्त संसार की गरमी को कम करने के वास्ते समुद्र को सोखता है उससे जल खींच बादल बना पानी बरसाता है ॥ १० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

किं कूर्मस्य भरव्यथा न वपुषिद्मां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः ।
किन्त्वङ्गीकृतमुत्सृजन्स्वमनसा श्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् ॥ ११ ॥

English Translation—Does the tortoise not feel pain of burden over his body, that he does not throw off the earth, or does not the lord of the day, the sun feel fatigue that he never becomes motionless ? But a praiseworthy man feels ashamed in his mind when going to give up his undertaking ; for carrying on to finish things once undertaken is the hereditary vow of the good.

हिन्दी अनुवाद—कच्छप-देव जो पृथ्वी को अपनी पीठ पर से अलग नहीं फेक देते सो क्या बोझ के मारे उनकी देह में पीड़ा नहीं होती ? सूर्य जो कभी निश्चल हो खड़ा नहीं हो जाते सो क्या उनको कभी थकावट नहीं होती ? सो बात नहीं । बात यह है कि प्रशंसनीय पुरुष अपनी अंगीकृत वस्तुओं को छोड़ने में मन में लजाते हैं । क्योंकि स्वीकृत कामों का अन्त तक निर्वाह करना सज्जनों का कुल व्रत है ॥ ११ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

Some additional Verses adopted by Mr. Kale in this body of नीतिशतकम्

कालेजी सम्पादित नीतिशतक में के कुछ और श्लोक

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥ १ ॥

English Translation—Those who donot possess learning, penance, charity, knowledge, character, merit or righteousness, roam in this world like beasts in the form of men ; a sheer burden to this earth.

हिन्दी अनुवाद—जिनको न विद्या, न तप, न दान, न ज्ञान, न शील, न गुण और न धर्म है, वे मर्त्यलोक में बोझ हैं, मनुष्य के रूप में पशु चरते हैं ॥ १ ॥

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसंपर्कः सुरेन्द्रभवनेष्वपि ॥ २ ॥

English Translation—Better to wander in the fortresses of hills along with the foresters than to dwell in the company of fools in the palaces of the Lord of gods (*i. e.* Indra).

हिन्दी अनुवाद—वनचरों के साथ विकट पर्वतों पर विचरण करना अच्छा है परन्तु मूर्खों के साथ सुरेन्द्र के भवन में रहना अच्छा नहीं ॥२॥

सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः
स्निग्धं मित्रमवञ्चकः परिजनो निष्क्लेशलेशं मनः ।
आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं
तुष्टे विष्टपहारिणीष्टदहरौ संप्राप्यते देहिना ॥ ३ ॥

English Translation—A well-behaved son, a

Digitization by Arya Samaj Charitable Foundation, Chennai

chaste and loving wife, a master ready to favour, an affectionate friend, undeceitful servant; the mind free from the least worry, a handsome form, ever-abiding prosperity, a face glowing with learning, all these can be obtained by a man if Lord Hari, who fulfils desires (of all) and pleases the world is well-propitiated.

हिन्दी अनुवाद—सच्चरित पुत्र, सती साध्वी प्रियतमा, नज़र रखने वाला मालिक, स्नेही मित्र, नहीं ठगने वाला नौकर, चिन्ता-रहित मन, सुन्दर आकृति, चिरस्थायी संपत्ति, विद्या से देदीप्यमान् मुख यह सब मनुष्य तभी पाता है। जब संसार को संतुष्ट करने वाले, सब कामनाओं को पूरा करने वाले हरि प्रसन्न होते हैं ॥ ३ ॥

तानीन्द्रियाणि सकलानि तदेवकर्म साबुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव त्वन्यः क्षणेन भवतीति विचित्रमेतत्॥४

English Translation—The senses are the same; the action the same, the same is the unobstructed intellect, the speech also is the same, and yet the self same man, devoid of the warmth of wealth, strange, it is. becomes instantly a changed being.

हिन्दी अनुवाद—सब इन्द्रियायें वही, कर्म वही, अप्रतिहत बुद्धि भी वही, और वचन भी वही रहता है तो भी धन की गर्मी से रहित होने पर वही मनुष्य क्षण भर में ही दूसरा बन जाता है। कैसी विचित्र बात है ॥ ४ ॥

त्वमेव चातकाधारोसीति केषां न गोचरः ।
किमम्भोदवरास्माकं कार्पण्योक्तिं प्रतीक्षसे ॥ ५ ॥

English Translation—O excellent cloud, who does not know that you are the supporter of the

Digitization by Arya Samaj Charitable Foundation, Chennai

Chataka-birds ? Why do you then wait for our pathetic appeal ?

हिन्दी अनुवाद—हे मेघवर ! कौन नहीं जानता कि तुम चातकों के आधार हो, चातकों को पोसनेवाले हो ? तब क्यों तुम हमारी करुण प्रार्थना की इन्तजारी करते हो ? ॥ ५ ॥

रे रे चातक ! सावधानमनसा मित्र ! क्षणं श्रूयता-
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥ ६ ॥

English Translation—Hallo friend Chataka ! Listen to me attentively for a moment. There are numerous clouds in the sky ; but all of them are not of this type. Some of them (simply) moisten the earth with their showers, while others roar in vain. Therefore, donot utter your piteous cry before each and everyone, you happen to see.

हिन्दी अनुवाद –रे चातक ! सावधान मन से मेरी बातें सुनो। आकाश में बहुत से मेघ हैं पर सब ऐसे ही नहीं हैं। कुछ अपनी वृष्टि से पृथ्वी को भिगो देते हैं और कुछ व्यर्थ ही गरजते तरजते रहते हैं। इसलिये जिस जिस को देखो उसी के सामने अपना दीन वचन मत बोलो—सभों को अपनी कातरोक्ति मत सुनाओ ॥ ६ ॥

किं तेन हेमगिरिणा रजताद्रिणा वा यत्राश्रिताश्च तरवस्तरवस्त एव ।
मन्यामहे मलयमेवयदाश्रयेण कङ्कोलनिम्बकुटजा अपिचन्दनानि ॥७॥

English Translation—What is to do with the mountain of gold or with the mountain of silver, when the trees standing on them remain the same

Digitization by Arya Samaj Charitable Foundation, Chennai

trees as they are ; we honour the mountain Malaya, alone, growing whereon, even the Kamkola, the neem and the kutaya trees become sandal-trees.

हिन्दी अनुवाद—उस स्वर्ण-पर्वत से क्या या उस चाँदी के पहाड़ से क्या लाभ जब वहाँ पर के वृक्ष निरे वृक्ष ही बने रहते हैं—जैसे के तैसे ही रह जाते हैं ? हम मलय पर्वत को ही मानते हैं उसको सराहते हैं, जहाँ रह कर कंकोल नीम और अर्जुन वृक्ष भी चन्दन हो जाते हैं ॥ ७ ॥

पातितोऽपि कराघातैरुत्पतत्येव कन्दुकः
प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः ॥ ८ ॥

English Translation—A ball, struck with the blows of hand, does rebound upwards, generally the misfortunes of the virtuous people are not everlasting.

हिन्दी अनुवाद—हाथ से मारने से गेंद ऊपर उछलता है। प्रायः साधु पुरुषों की विपत्ति क्षणकालीन होती है—वहुत दिनों तक नहीं रहती ॥ ८ ॥

कार्यायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ९ ॥

English Translation—The fruit men get depends on their actions, and the inducement to action is in accordance with fate (action done in previous life), still a wise man should be doing any action after mature consideration.

हिन्दी अनुवाद—मनुष्य जो फल भोगते हैं वह फल उनके कर्म पर निर्भर रहता है जैसा भाग्य में बदा रहता है मनुष्य की काम

Digitization by Arya Samaj Charitable Foundation, Chennai

करने की बुद्धि भी वैसी ही होती है। तौ भी बुद्धिमान लोगों को चाहिये कि जो कुछ करें खूब सोच विचार कर करें ॥ ६ ॥

> पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
> नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम्।
> धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
> यत्पूर्वं विधिनां ललाटलिखितं तन्मार्जितुं कः क्षमः ? ॥१०॥

English Translation—What is the fault of Spring, if there is not a single leaf on the branch of the Karira-tree? What is the fault of the Sun if the owl does not see in the day time? What blame on the cloud if the showers donot fall into the mouth of the Chataka bird? Who is able to wipe out what has been previously written on the forehead by Providence?

हिन्दी अनुवाद—यदि करील गाछ में पत्ता नहीं होता तो वसन्त का इसमें क्या दोष ? यदि दिन में उल्लू नहीं देखता तो इसमें सूर्य का क्या दोष ? यदि जलधारा चातक के मुँह में नहीं गिरती तो मेघ का इसमें क्या कसूर ? विधि ने जो ललाट में पहले ही लिख दिया है उसे कौन मेट सकता है ? " विधि का लिखा को मेटन हारा " तुलसीदास ॥१०॥

" समाप्तम् "

Digitization by Arya Samaj Charitable Foundation, Chennai

IMPORTANT QUESTIONS.

(1) What are the subject-matters described in Nitishataka ? See Introduction.

(2) Give an outline of the general teachings of the following :—(*a*) मानशौर्यपद्धति (*b*) कर्मपद्धति and (*c*) दैवपद्धति (*d*) अर्थपद्धति (*e*) विद्वत्पद्धति See the text.

(3). Quote verses from Nitishataka on the following :—(*a*) The difficulty of befriending fools. (*b*) Necessity of acquiring wisdom. (*c*) The power of riches. Consult text.

(4) Discuss whether Bhartṛhari is a mere compiler or the real author of the Shatakas. What was his religion ?—See Introduction.

(5) Quote verses about (*a*) Difficulty of the duty of servants. (*b*) Comparison of the king with the poet.

(6) What are the important teachings of Nitishataka. Summarise them. See Introduction.

(7) What are the religious and moral views of Bhartrihari. Quote a few lines to illustrate your remarks. (Vide Intro.)

(8) What are the inborn qualities of great men and what is the vow of life of the good. What are

Digitization by Arya Samaj Charitable Foundation, Chennai

the signs of good friends and what of the good people ? See text.

(9) Summarise the views of Bhartrihari. (*a*) On character (*b*) on the changing policy of the king.

(10) What are ten incarnations of Viṣnu ? Is Buddha also regarded by our poet as an incarnation ? Where is the reference ? (दशावतारगहने, महासंकटे)—Ten incarnations. मत्स्यः कूर्मोवराहश्च नरसिंहोथ वामनः । रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश ।"

(11) (*a*) Explain giving contexts—नहि गणयति क्षुद्रोजन्तुः परिग्रहफल्गुताम्, विवेकभ्रष्टानांभवति विनिपातः शतमुखः, अवस्था वस्तूनि प्रथयति संकोचयति च, प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते, कुत्स्याः स्युः कुपरीक्षकाः न मणयो यैरर्घतः पातिताः, वाराङ्गनेव नृपनीतिरनेकरूपा, सेवाधर्मः परमगहनो योगिनामप्यगम्यः, न निश्चितार्थाद्विरमन्ति धीराः, भवन्ति नम्राः तरवः फलागमैः etc. ।

(*b*) Derive the following :—उल्लीढ, आश्यान, तनिम्ना, क्षीण, हिंस्रा, गोचर, मुनि (मन्+इन्, अ changes to इ by Unadi rule) मुखर, पावक, चाटुल, मनस्वी, कदर्थित, इन्द्रिय, प्रमाणीकृत, द्वित्राः, प्रत्यक्षम्, न्याय्य, विदग्ध, प्रतिनिविष्ट, पञ्चषाः, शीर्षविशेषीकृतः, जीवमानः, भागधेयम्, उपस्कृत, मा अवमंस्थाः संस्कृत,

(12) Find out some verses of other writers in Nitishataka ? (See Introduction last portion). Only a few have been given by way of illustrations.

N. B.—These are a few questions to show the way to students, there may be others as well. Students should try to find them out.

Printed by RAMZAN ALI SHAH at the National Press, Allahabad.

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai